॥ अथ श्रीमन्न्यायसुधाटिप्पणी कंभालूररामचंद्रभिक्षुकृता प्रारभ्यते ॥

॥ प्रथमाध्यायः ॥

॥ श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥

॥ कल्याणगुणपूर्णाय कामितार्थप्रदायिने ॥ कंजजादीड्यपादाय कमलापतये नमः ॥ १ ॥ अथ तद्दासदासेन रामचंद्राख्यभिक्षुणा ॥ श्रीमन्न्यायसुधाव्याख्या क्रियते प्रीतये हरेः ॥ २ ॥ मद्वाचि दोषा यदि संभवेयुस्तथाऽपि तान्नैव बुधा भणंतु ॥ गुणैकदृष्टिं परमां विधाय तानेव सम्यक् प्रतिपादयन्तु ॥ ३ ॥ श्रीमज्जयतीर्थमुनिः प्रारिप्सितन्यायसुधाया निरंतराय परिसमाप्तिप्रचयप्रयोजनकमविगीतशिष्टाचारपरंपरावगतमवश्यकर्तव्यं श्रीहरिप्रणामरूपं मंगलं शिष्यान्ग्राहयितुं ग्रंथादौ निबध्नाति ॥ श्रिय इति ॥ व्याप्तिरिति । यस्यानंदतीर्थमुनेर्निजे स्वीयपक्षे । अशेषगुणपूर्णत्वं सर्वदोषसमुज्झितिः । विष्णोरन्यच्च तत्तन्त्रमिति सम्यग्विनिर्णयः । स्वतंत्रत्वं सदा तस्य तस्य भेदश्च सर्वत इत्यादिना वक्ष्यमाणे सत्सिद्धांतरूपे निजेन महसाऽविनाशिना ज्ञानेन व्याप्तिः साकल्येन तद्विषयत्वमिति यावत् । निजौ स्वीयाविनाशिनावित्यभिधानात् । एवं प्रलयकालेऽपि प्रतिभातपरावरः । मुख्यवायुर्नित्यसम इति वक्ष्यमाणरीत्या मुख्यवायोर्वृत्तिरूपज्ञानस्य प्रलयकाले नाशाभाव इति द्रष्टव्यं । महस्तूत्सवतेजसोरित्यभिधानात् तेजोवाचिमहश्शब्दोऽर्थप्रकाशकज्ञानवाची च भवति । पक्षपरिग्रह इत्यस्मान्निष्पन्नः पक्षशब्दः स्वपरिगृहीतसात्सिद्धांतवाची । यद्वा । पक्षः सहायगरुदंतिकसाध्यभित्तिमित्रेषु चुल्लिविवरे नृपकुंजरे चेत्यभिधानात् आनंदतीर्थमुनेः परममित्रभूतः परमात्मा पक्षशब्देनोच्यते । तथा च निजे पक्षे परमात्मनि निजेन महसाऽविनाशिना ज्ञानेन व्याप्तिः । सर्ववेदेषु ये चोक्ता गुणाः सर्वे सुमंगलाः । ज्ञानेन भगवान् ब्रह्मा वेत्ति लक्ष्मीस्ततोऽधिकानिति वचनात् सर्ववेदोक्तसकलपरमा-

तमधर्मविषयकत्वमिति यावत् । अथवा । पक्षः सहायगरुद्ंतिकसाध्येष्वित्युदाहृताभिधानात्पक्षशब्दः साध्यवाची । तथा च निजे पक्षे स्वीये साध्ये प्रतिवादिनं प्रति स्वेन साधनीयार्थे निजेन महसा व्याप्तिः । सपक्षे स्थितिः समानपक्षे स्वसिद्धांतसमानसिद्धांते व्यासकृतभारतादौ । तेषां ब्रह्मसूत्रव्याख्यानकाले सपक्षत्वात्तत्संमत्या सूत्रयोजनायाः क्रियमाणत्वात् । निजेन महसा स्थितिर्व्यावृत्तिश्च विपक्षतो विरुद्धपक्षाद्विरुद्धसिद्धांताद्व्यावृत्तिर्नाम तस्यासत्वेन विषयीकरणं । प्रसिद्धधूमवत्त्वानुमानस्य तु निजे पक्षे पर्वतादौ निजेन महसा स्वीयेन वन्हिना व्याप्तिः सपक्षे महानसादौ स्थितिर्विपक्षतो ह्रदादेर्व्यावृत्तिर्बाधिते विषये सक्तिः संबंधो न वै प्रतिपक्षयुक्तिः साध्यविपरीतसाधिका युक्तिर्नैवास्तीत्यर्थः स्फुटः । आनंदतीर्थमुनेर्विपक्षे बाधितेऽभद्रे विषये शक्तिः स्नेहो न वै प्रमाणबाधिते वा मनः प्रवृत्तिर्न वै । प्रतिपक्षयुक्तिः प्रतिपक्षयोगो नैवास्तीति योज्यम् । यस्यानंदतीर्थमुनेर्निजे पक्षे व्याख्येयत्वेन परिगृहीते ब्रह्मसूत्रात्मकशास्त्रे निजेन महसा व्याप्तिः सपक्षे भारतादौ निजेन महसा स्थितिः । विपक्षतः पाषंडागमाद्व्यावृत्तिरित्यपि योज्यम् । समानस्य छंदस्यमूर्धप्रभृत्युदर्केष्वित्यत्र समानस्येति योगविभाग इष्टप्रसिध्यर्थः क्रियते तेन सपक्ष इत्यादि सिध्यतीति काशिकोक्तेः सपक्षशब्दः साधुः । वायोः प्रलयेऽपि स्वरूपातिरिक्तज्ञाननाशाभावरूपमाहात्म्यसूचनाय निजेनेति पदं । प्रसिद्धानुमाने तु स्वीयवाचिना निजपदेन स्वकारणत्वस्य विवक्षितत्वाद्व्याप्तिग्राहकतर्कसूचनार्थं ॥ पदवाक्यप्रमाणेनेति । पदशब्देन सुप्तिङंतादिपदानुशासनरूपव्याकरणशास्त्रमुच्यते । वाक्यशब्देन श्रुतिवाक्यविचारात्मकमीमांसाशास्त्रमुच्यते । प्रमाणशब्देन प्रमाणनिरूपणपरतर्कशास्त्रमिति ध्येयम् ॥ श्रीमदानंदतीर्थार्यसन्मनःसर-

स

सीभुवीति । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति सूत्रेण भाषितपुंस्कस्याजादितृतीयादिषु वैकल्पिकपुंवद्भावाद्ध्रस्वनुमोरभावः ॥ चंचरीकतीति । चंचरीको भृंगस्तद्वदाचरतीत्यर्थः । सर्वप्रातिपदिकेभ्यः क्विबाचार इति चंचरीकप्रातिपदिकादाचारार्थे क्विपि सनाद्यंता धावत इति धातुसंज्ञायां शप्विबादीति द्रष्टव्यम् ॥ न शब्दाब्धाविति । न च वाच्यमस्मदोर्द्वयोश्चेति प्राप्तस्य बहुवचनस्य सविशेषणस्य प्रतिषेधो वक्तव्य इति निषेधाद्वयमिति बहुवचनमयुक्तमिति । विधेयस्याप्युपासितगुरुप्रज्ञाभिमानोन्नता इत्यत्रोन्नतत्वं विधीयते । न तु विधेयार्थाविशेषणमित्यादेशो भवत्येवेति पदमंजर्यां विधेयस्य विशेषणत्वाभावोक्तेर्न शब्दाब्धौ गाढा इत्यादीनां च विधेयत्वेनाविशेषणतया निषेधाप्रवृत्त्या बहुवचनोपपत्तेः । उत्तरार्धेऽपि वयं केवलं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं प्रपन्ना अत एव किमपि च लोकाविलक्षणं वदंतः स्म तत एव महतामपि मान्याः स्म इति सर्वेषां विधेयत्वमेवेति द्रष्टव्यम् ॥ उत्तमपुरुषप्रयोगादिति । अस्मद्युत्तम इत्यनुशासनादिति भावः । ननु निखिलपूर्णगुणेत्यादिविशेषणानां किं प्रयोजनमित्यत आह ॥ प्रयोजनं चेति । स्तवनं च तत्प्रीत्यर्थमिति भावः । नन्वस्योद्भवादिदमिति नारायणस्य जगज्जन्मादिकारणत्वोक्त्याऽपूर्णस्य पारतंत्र्यादिदोषयुक्तस्य च जगज्जन्मादिकारणत्वायोगेन पूर्णगुणत्वनिर्दोषत्वादिलाभान्निखिलपूर्णगुणैकदेहं निर्दोषमित्यादिविशेषणपदानामार्थिकी पुनरुक्तिरित्यत आह ॥ तत्रेति । तत्र तेषु स्तुतिपदेषु । स्तुतावार्थिकपुनरुक्तिर्न दोष इति भावः ॥ विशिष्टेति । विशिष्टत्वमुत्तमत्वं । अधिकृतत्वं प्रकृतग्रंथप्रतिपाद्यत्वं ॥ तस्येष्ट इति । अधीगर्थदयेशां कर्मणीति षष्ठी अस्येतीदंशब्देन प्रत्यक्षसंनिधापितप्रपंचमात्रपरामर्शे नारायणस्य सकलजगत्कारणत्वं

नोक्तं स्यादित्यतस्तं शब्दं प्रमाणसिद्धतया बुद्धिसंनिहितसकलप्रपंचपरत्वेन व्याचष्टे ॥ प्रत्यक्षादीति । नन्वस्येतीदंशब्दनिर्दिष्टप्रपंचस्योद्भवादिदाने कर्मणा यमभिप्रैति स संप्रदानमिति संप्रदानतयाऽस्मा इति चतुर्थ्या भाव्यमित्यत आह । संबंधमात्र इति । नात्र प्रपंचस्य संप्रदानत्वविवक्षा किंतु शेषत्वविवक्षयैव । अतः षष्ठीशेष इति षष्ठ्युपपत्तिरिति भावः ॥ वियदधिकरणादीति । तत्राभूत्वाभवनलक्षणः पराधीनविशेषावाप्तिलक्षण इत्यादिरूप उद्भवस्यावांतरभेदो वक्ष्यत इति भावः ॥ पूर्ववदिति । धर्मप्राणादिकस्य कदाचित्प्रियत्वेऽपि सदाऽतिशयेन प्रियत्वाभावात्सदाशब्देन तमपा च धर्मादिव्यावृत्तिलक्षणं प्रयोजनं लभ्यत इति ज्ञातव्यमित्यर्थः ॥ नानिर्धारितस्वरूपस्येति । त्वत्तोऽहमपकृष्टो मत्तस्त्वमुत्कृष्ट इत्यनुसंधानपूर्वकत्वात्प्रणामस्य वस्तुस्वरूपनिर्धारणाभावे प्रणामो न युक्त इति भावः ॥ न चांतरेणेति । लक्षणज्ञानं विनेतरव्यावृत्ततया वस्तुनिर्धारणेनेत्यर्थः ॥ कारणानीति । वस्तुनिर्धारणद्वाराऽभिवादने प्रणामे कारणानीत्यर्थः । विभवादनेकानीति पाठे विभवादैश्वर्याल्लक्षणदारिद्र्याभावादनेकानीत्यर्थः ॥ त्रीणीति । समुदितस्यैकलक्षणत्वे व्यर्थविशेषणत्वप्रसंगादिति भावः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ निर्दोषमित्यनेनेति । निर्दोषमित्यनेनैकं लक्षणमुदितमित्यन्वयः । न च वाच्यं निर्दोषपदेन दोषान्यत्वं दोषसंसर्गाभाववत्त्वं चेति लक्षणद्वयमुदितमिति वक्तुं शक्यत्वात्कथमेवमुच्यत इति । निर्गता दोषा यस्मात्स निर्दोष इति दोषसंसर्गाभावस्यैव प्रतीतेः । न चैवमपि दोषसंसर्गाभावस्य प्रागभावध्वंसरूपत्वे ब्रह्मण्यसंभवोऽत्यंताभावरूपत्वे तु प्रामाणिकस्य तदसंभव इति वाच्यं । स्वानुयोगिकदोषप्रतियोगिकसंसर्गविशेषात्यंताभाववत्त्वस्य निर्दोषपदेन

विवक्षितत्वादिति ॥ अथवेति । अस्मिन्पक्षे निखिलेत्यादिकं लक्षणप्रदर्शनपरम् । सुवाक्यैराप्यतममित्यादिकं तु नारायणे प्रमाणप्रदर्शनपरमिति भावः ॥ अन्यथाऽप्युच्यत इति । निखिलपूर्णगुणेत्याद्युक्तदोषलक्षणवैपरीत्येन वेदाद्येकदेशे नारायणः प्रतिपाद्यत इति कथं वेदेनोक्तलक्षणविशिष्टो नारायणः प्रतिपत्तव्य इति भावः ॥ अपरामर्शेति । वेदैकदेशे आपाततोऽन्यथाप्रतीतावप्यखिलवेदविचारे क्रियमाणे उक्तलक्षणविशिष्टनारायणः प्रतीयत इति वेदेन तल्लक्षणविशिष्टनारायणसिद्धिर्युक्तेति भावः ॥ तर्हीति । नारायणस्य यद्यखिलसुवाक्यप्रतिपाद्यत्वं तर्हीत्यर्थः ॥ अमुख्ययेति । अपरममुख्ययेत्यर्थः ॥ अपिशब्द इति । अस्योद्भवादिदमित्यत्र सकलजगन्निमित्तकारणत्वादिना नारायणसिद्धेर्वक्ष्यमाणत्वात्तत्प्रमाणसमुच्चयार्थोऽपिशब्द इत्यर्थः ॥ यद्वेति । अस्मिन्पक्षेऽस्योद्भवादिदमित्यादिकं नारायणस्य लक्षणप्रदर्शनपरं निखिलेत्यादिकं तु जगज्जन्मादिकारणत्वरूपलक्षणस्यासंभवरूपानुपपत्तिनिरासकमिति द्रष्टव्यम् ॥ एतदपीति । नारायणशब्दस्य विशिष्टगुणरूपार्थकथनमपीत्यर्थः ॥ तत्प्रवणतेति । भक्त्यतिशयेन भगवद्विषयकतेत्यर्थः ॥ तद्विशेष इति । मनोवृत्तेस्तत्प्रवणताविशेष इत्यर्थः ॥ तथा च वंद्यमिति । मनोवृत्तेर्भगवत्प्रावण्यरूपवंदनोक्त्या मनोवृत्तेस्तत्प्रवणता विशेषरूपा प्रथमसूत्रार्थभूतजिज्ञासाऽप्युक्ता भवतीति भावः ॥ ब्रह्मेत्युक्तमिति । सूत्र इति शेषः ॥ तस्येति । शास्त्रस्येत्यर्थः ॥ प्रथमाध्यायार्थ इति । प्रथमाध्यायप्रतिपाद्ये जगत्कारणत्वादिगुणके ब्रह्मणि युक्त्यादिभिः समन्वयनिरोधमुखेन शंकितानां दोषाणां निरासो द्वितीयाध्याये विहितस्तमर्थमाह निर्दोषमित्यनेनेत्यर्थः ॥ ल्यब्लोपेति । ल्यब्लोपे कर्मण्यधिकरणे च पंचमी वक्तव्येति ल्यब्लोपनिमित्तायाः कर्मणि पंचम्या अनुशासनेनाशेषवि-

शेषत इत्यस्याशेषान्विषयविशेषान्विहायेत्यर्थाश्रयणाद्विषयवैराग्यलाभेन प्रियतममिति प्रीत्यपरपर्यायस्नेहविषयत्वकथनेन भक्तिला-भादाप्यतमं ज्ञातव्यतममित्यर्थाश्रयणेन भगवत्साक्षात्कारजनकश्रवणमननादिरूपज्ञानलाभाच्चाशेषविशेषतोऽपि प्रियतममाप्य-तममिति तृतीयाध्यायार्थसंग्रह इति भावः ॥ इयदिति । इयदामननादित्यत्र मुख्यप्राणस्याधिकार्युत्तमत्वं प्रतिपादितं तन्मम प्रियतममिति विशेषनिर्देशेनाधिकार्युत्तमस्य मम प्रियतममित्यर्थलाभात्सूच्यत इति भावः ॥ तमपेति । सर्वगतब्रह्मप्राप्तिमात्रस्य नित्यसिद्धत्वेऽप्याप्यतममिति तमप्प्रत्ययमहिम्ना लब्धस्य सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुत्युक्तस्य प्राप्तिविशेषस्य नित्यसिद्धत्वाभावेन पुमर्थत्वसंभवादाप्यतममित्येतच्चतुर्थाध्यायार्थपुमर्थनिरूपणपरमिति भावः । ननु परमाख्यविद्याव्याख्यां करोमीति लट्प्रयोगो न युक्तः । व्याख्यायाः करिष्यमाणत्वेनावर्तमानत्वादित्यत आह ॥ वर्तमानेति । वर्तमानसामीप्ये वर्तमानवद्वेति वर्तमानसामीप्ये वर्तमानार्थकलडनुशासनात्करोमीति लड्व्यपदेशः संभवतीत्यर्थः ॥ संक्षेपत इति । आद्यपद्येऽध्यायचतुष्टयार्थस्य संक्षेपतः कथनेन परमाख्यविद्याव्याख्यानस्योपक्रांतत्वाद्वा करोमीति वर्तमानव्यपदेश इत्यर्थः । यद्यपि संक्षेपतो व्याख्यानस्याद्यश्लोके परिसमाप्तत्वादारब्धापरिसमाप्तक्रियोपलक्षिते क्रियाकाले वाच्ये धातोर्लट्प्रत्ययो भवतीति विहितस्य लट्प्रत्ययस्यानुपपत्तिस्तथाऽपि संक्षेपविस्तराभ्यां व्याख्यानस्य परमाख्यविद्याव्याख्यानत्वेनैकक्रियात्वात्तस्याश्चा-रब्धापरिसमाप्तत्वाल्लट्प्रत्ययोपपत्तिरिति बोध्यम् ॥ गुरुत्वेनेति । गुरुत्वेन निमित्तेन प्रणामाचरणादित्यर्थः ॥ प्रकृतत्वा-दिति । व्याख्येयतया ब्रह्ममीमांसाशास्त्रं प्रकृतं तन्निर्णेतव्यार्थतया वेदादिकं च प्रकृतमिति भावः । ननु शास्त्रशब्देन

ब्रह्ममीमांसाया वेदादेश्चोक्तौ तत्प्रभवत्वं नारायणस्य न युक्तं वेदस्यापौरुषेयत्वादित्यत आह ॥ प्रभवतीति ॥ निमित्तसमावेश इति । उद्गातृप्रतिहर्त्रोः क्रमेणापच्छेदस्थले प्रतिहर्त्रपच्छेदनिमित्तसर्ववेदसदातनकर्तव्यताज्ञानेन पूर्वस्योद्गातृपरिच्छेदनिमित्तादाक्षिण्यकर्तव्यताज्ञानस्य बाधेन नैमित्तिकस्यादाक्षिण्यस्य तत्र लोपेऽप्यन्यत्र तस्य लोपाभावेन निमित्तसमावेशे नैमित्तिकविलोपनियमाभाव इत्यर्थः । एवं चेद्देवतात्वगुरुत्वनिमित्तकयोः प्रणामयोर्बाधकाभावेन कर्तव्यत्वात्पृथक् प्रणामोपपत्तिरिति भावः । ननु तथाऽपि पृथग्गुरुनमस्कारस्य ग्रंथे निवेशनं किमर्थमित्यत आह ॥ शिष्यशिक्षाया इति । शिष्याणां ब्रह्मादयो गुरवः । देवता तु नारायण इति गुरुदेवताभेदोऽस्तीत्यर्थः ॥ अन्यथेति । शिष्याणां गुरुदेवताभेदाभावे तान्प्रति नारायणस्यैव गुरुत्वे विशेषतो मे गुरुमिति विशेषोक्तिरयुक्ता स्यादित्यर्थः ॥ न हीति । अर्थविवक्षापूर्वकत्वरहितानामकारादिमातृकावर्णानां व्याख्याने प्रेक्षावान्कश्चिन्न हि प्रवर्तत इत्यर्थः । नन्वथातो ब्रह्मजिज्ञासेत्यादिसूत्रेभ्यो गृहीतसंगतिकस्यार्थप्रतिभासोदयेन विषहरमंत्रवैषम्यात्तेषामर्थविवक्षापूर्वकत्वं निश्चीयत इत्यत आह ॥ गृहीतसंगतेरिति । अस्तु वा यथाकथंचिद्ब्रह्मसूत्राणामर्थविवक्षापूर्वकत्वनिश्चयस्तथाऽपि न तावन्मात्रेण व्याख्येयत्वमित्याह ॥ न चेति । संज्ञायामिति । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण इत्येतत्सूत्रवृत्तिव्याख्यानावसरे पदमंजर्यां संज्ञायामित्यनुवर्तमाने पुनः संज्ञाग्रहणं भावार्थं । पूर्वसंज्ञाग्रहणं कारके संबद्धमित्युक्तत्वात् । अकर्तरि च कारके संज्ञायामित्यस्मात्कारकसंबद्धस्य संज्ञायामित्यस्यानुवृत्त्या च क्यप्प्रत्ययांतस्य विद्याशब्दस्य यथार्थज्ञाने तत्साधने च रूढिसिद्धिरिति भावः। न च वाच्यं वृत्तौ संज्ञायामित्य-

स्मिन्सूत्रे भाव इति न स्वर्यत इत्युक्तत्वात्कथं भावार्थं पुनः संज्ञाग्रहणमिति । व्रजयजोर्भावे क्यबिति सूत्रे यद्भावग्रहणं तस्येह स्वरितत्वं न प्रवर्तत इत्यर्थप्रतिपादकत्वाद्वृत्तिवाक्यस्य । अत एव वृत्तौ पूर्व एवाधिकार इति स्त्रियां क्तिन्नित्यादौ भावेऽकर्तरि च कारक इति योऽधिकारः स एवात्राधिकार इत्युक्तं । संज्ञायामित्युक्तेरिति पाठे त्वत्र सूत्रेऽकर्तरि च कारके संज्ञायामित्यस्मात्कारकसंबद्धसंज्ञाग्रहणस्यानुवृत्तेश्च विद्याशब्दस्य यथार्थज्ञानतत्साधनयो रूढिसिद्धिरित्याशयो द्रष्टव्यः ॥ श्रौतयेति । यद्यपि श्रुतिशब्दात्संबंधार्थेऽण्प्रत्यये टिड्ढाणित्यादिना ङीपा भवितव्यं तथाऽपि श्रुतिसंबंधि द्वे विद्ये वेदितव्ये इत्यादिवाक्यं श्रौतं वाक्यमस्यास्तीत्यर्थेऽर्शआदिभ्योऽजित्यच्प्रत्यये तदंताच्छ्रौतशब्दादजाद्यतष्टाबिति टापि कृते श्रौतयेति रूपं साध्विति ज्ञेयम् । श्रौतपरविद्याख्ययेति पाठे न काऽप्यनुपपत्तिः । घञंतस्य श्रौतशब्दस्य स्त्रियाः पुंवदित्यादिना पुंवद्भावसंभवात् । ननु यदि परोपकाराय भगवतो व्यासस्य शास्त्रप्रणयनं तर्हि शास्त्रकरणरूपक्रियाजन्यफलस्य कर्तृगामित्वाभावेन चक्र इत्यत्र स्वरितञितः कर्त्रभिप्राये क्रियाफल इति सूत्रविहितमात्मनेपदं न स्यादित्यत आह ॥ अत एवेति ॥ वेदादीति । वेदादिशास्त्रस्यापरविद्यात्वोक्तौ शास्त्रप्रकरणबलात्परविद्याऽपि शास्त्रमेव भवितुमर्हतीत्यर्थः ॥ अन्यथेति । शास्त्रव्यतिरिक्तसाहित्यनाटकादिविद्यायाः परविद्याशब्दितत्वे द्वे विद्ये वेदितव्य इत्यत्र विद्याशब्दस्यापरविद्यात्वेन गृहीतेषु वेदादिषु यथार्थज्ञानसाधनविशेषत्वं प्रवृत्तिनिमित्तं । परविद्याशब्दितसाहित्यनाटकादिविद्यायां तु तदभावादन्यदेव प्रवृत्तिनिमित्तं वाच्यमिति प्रवृत्तिनिमित्तेनान्यत्वेन सकृदुक्तविद्याशब्दस्यानेकार्थत्वकल्पनाप्रसंगादित्यर्थः । चशब्देन वेदादिप्रकरणानुपपत्तिं परमाक्षराधि-

गतिकरणत्वरूपलिंगानुपपत्तिं च समुच्चिनोति । यद्वा । अन्यथेत्येतदर्थविवक्षापूर्वकत्वराहितविषहरमंत्रस्य परविद्याशब्दितत्व इति व्याख्येयम् । अवशिष्टं पूर्ववत् ॥ निर्णेतव्यार्थानामिति । एतच्छास्त्रनिर्णेतव्यार्थानामित्यर्थः । ननु ऋगादिपदेन ब्राह्मणपरिव्राजकन्यायेनोपनिषद्व्यतिरिक्तानामेव ऋगादीनां ग्रहणान्नोक्तदोष इत्यत आह ॥ ब्राह्मणेति ॥ अधिगतीति । उपनिषज्जन्यज्ञानस्याक्षरविषयाधिगतिरूपत्वेनाथ परा यया तदक्षरमधिगम्यत इत्युक्ताधिगतिकरणत्वानुपपत्तेर्नोपनिषज्जन्यज्ञानं परविद्याशब्दार्थ इत्यर्थः । ननु यया तदक्षरमधिगम्यत इत्यनेनाक्षरशब्दितब्रह्मप्राप्तिकरणत्वमेवोच्यते तच्च ज्ञाने संभवतीति चेन्न । ऋगादीनां ज्ञानसाधनानां प्रकरणे यया तदक्षरमधिगम्यत इत्यस्य ज्ञानसाधनार्थत्वावश्यंभावात् । इयांस्तु विशेषः । परविद्यात्वेन गृहीतस्य शास्त्रस्य विष्णुज्ञानसाधनत्वमपरविद्यात्वेन गृहीतस्य ऋगादेस्तु विष्ण्वन्यविषयज्ञानसाधनत्वमित्यने- मिति।अ
कार्थतेति । द्वे विद्ये वेदितव्य इत्यत्र विद्याशब्दस्यापरविद्यात्वेन गृहीते वेदादौ यथार्थज्ञानसाधनत्वं प्रवृत्तिनिमित्तं परविद्यात्वेन गृहीते तज्जन्यज्ञाने तु यथार्थज्ञानत्वं प्रवृत्तिनिमित्तमिति प्रवृत्तिनिमित्तभेदेन सकृत्प्रयुक्तविद्याशब्दस्यानेकार्थकत्वकल्पनापत्तेश्चेत्यर्थः ॥ यद्यपीति । वेत्ति तत्त्वं शिष्योऽनयेति विद्याशब्दः शिष्यव्यापारानुबंधी । शास्ति तत्त्वमाचार्योऽनेनेति शास्त्रशब्द आचार्यव्यापारानुबंधीति विद्याशास्त्रशब्दयोरैकार्थ्याभावेन परविद्याख्यं शास्त्रमिति तयोरैकार्थ्योक्तिरयुक्तेति शंकाभिप्रायः ॥ उभयानुगतमिति । विद्याशब्दवाच्ये शास्त्रशब्दवाच्ये चानुगतं शिष्यगततत्त्वज्ञानकरणत्वमात्रमुपादाय विद्याशास्त्रशब्दयोरैकार्थ्यमुक्तमित्यर्थः । ननु यदि ब्रह्ममीमांसाशास्त्रव्युत्पादितन्यायोपकृतानां विष्णुप्रतिपादकत्वं

तर्हि केवलस्य ब्रह्ममीमांसाशास्त्रस्याक्षरशब्दितविष्ण्वधिगतिसाधनत्वाभावेन केवलस्य परविद्यात्वं न लब्धमित्यभिप्रेत्य शंकते ॥ तथाऽपीति । इष्टापत्त्या परिहरति ॥ मालाभीति । वेदेतिकर्तव्यतारूपस्यास्य शास्त्रस्य वेदानुग्राहकतामंतरेण ब्रह्मप्रमितिजनकत्वाभावात्केवलवेषेण परविद्यात्वाभावेऽपि वेदानुग्राहकत्वविशिष्टवेषेण तज्जनकत्वात्स्वाभिमतं परविद्यात्वं युक्तमिति भावः ॥ प्रामाण्यमात्र इति । अनुत्तमत्वे तु प्रमाणं तदनंतरं वक्ष्यत इति भावः ॥ वक्तुमिति । आप्तवाक्यत्वरूपं प्रामाण्यसाधकमनुमानं वक्तुमाहेत्याप्तवाक्यतासिध्यर्थं वक्त्राद्यानुकूल्यं व्युत्पादयतीत्यर्थः ॥ यथासंभवमिति । शास्त्रशब्दितवेदानामभिव्यंजकत्वेन भारतादीनां चोत्पादकत्वेन प्रभव इत्यर्थः ॥ ब्रह्मरुद्रादिदेवेष्विति । ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तम इत्यागमादित्यर्थः ॥ अनुक्तमिति । अनुक्तं पंचभिर्वेदैर्न वस्त्वस्ति कुतश्चनेति वचनं वेदाद्यागमस्याशेषार्थप्रतिपादकत्वे प्रमाणं । उत्सन्नान् भगवान्वेदानुज्जहार हरिः स्वयमित्यादिवचनं तु वेदव्यासस्य सच्छास्त्रप्रभवत्वे प्रमाणमिति द्रष्टव्यम् ॥ सपक्षाप्रवेशित्वेनेति । भारताद्यशेषसच्छास्त्रप्रणयनविशिष्टेन भारतादेरप्रणीततया भारताद्यशेषसच्छास्त्रप्रणेतृत्वरूपहेत्वंशस्य सपक्षे भारतादावसत्वादसाधारण्यमित्यर्थः ॥ तेष्विति । भारताद्यशेषसच्छास्त्रप्रभवप्रणीतत्वं नाम भारतादिप्रणयनोपलक्षितप्रणीतत्वं विवक्षितं । तस्य च भारतादिषु सपक्षेषु सत्वान्नासाधारण्यमिति भावः । ननु भारतादेः प्रामाण्यानिश्चयात्कथं सपक्षत्वमित्यत आह ॥ तत्प्रामाण्यस्येति ॥ तथात्व इति । वक्त्राद्यानुकूल्यस्यानुमानांतरत्वे बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वेन प्रामाण्यसाधनप्रकार एकः ।

वक्त्राद्यानुकूल्येनापरः। श्रुतिमूलत्वयुक्तिमूलत्वाभ्यां प्रामाण्यसाधनप्रकारौ द्वाविति चातुर्विध्यापत्त्या प्रामाण्यं त्रिविधं महत्। दृश्यते ब्रह्मसूत्राणामिति वक्ष्यमाणं त्रैविध्यं विरुद्धं स्यादिति भावः ॥ विजातीयेति। ब्रह्मसूत्रात्मकं शास्त्रं प्रमाणं बादरायणेन ब्रह्मादीन्प्रति तन्मोक्षार्थमुपदिष्टत्वात् वक्त्राद्यानुकूल्योपेतत्वादित्यनयोर्ब्रह्मसूत्रप्रामाण्यसाधकयोरर्थसत्ताघटितप्रामाण्यविषयीकरणमुखेन तद्घटकब्रह्मसूत्रार्थविषयकतया विजातीयत्वादनयोर्विजातीयसंवादित्वेनैक्यमिति भावः ॥ श्रुतियुक्तिसंवादोऽपीति। प्रामाण्यविषयीकरणमुखमंतरेण ब्रह्मसूत्रार्थविषययोः श्रुतियुक्त्योर्ब्रह्मसूत्रसजातीयत्वेन तत्संवादोऽपि सजातीयसंवादतयैक्यः स्यादित्यर्थः ॥ त्रित्वानुपपत्तिरिति। उक्तप्रकारेण प्रामाण्यसाधनप्रकारयोर्द्वित्वेन प्रामाण्यं त्रिविधमिति वक्ष्यमाणत्रित्वानुपपत्तिरेवेत्यर्थः ॥ मा भूदिति। न च वाच्यमस्ति सिचोऽपृक्त इत्यस्तिसिज्भ्यां परस्य सार्वधातुकापृक्तस्य विधीयमान ईट् गतिस्थेत्यादिना सिचो लुक्यपि प्रत्ययलक्षणेनात्र कस्मान्न भवतीति। सिचोऽल्पाज्कत्वाद्बहुविषयत्वेनाभ्यर्हितत्वाच्च पूर्वनिपाते कर्तव्येऽस्ति सिच इति वचनात्तंत्रादिना विद्यमानसिच इत्यस्यार्थस्य लाभान्नेडिति पूर्वधातुवृत्तावुक्तत्वेनेडभावोपपत्तेः ॥ साधनावच्छिन्न इति। अपौरुषेयवेदेऽनुकूलवक्त्रादिमत्त्वरूपसाधनस्यासत्वेन तदवच्छिन्नसाध्यस्याभावान्न तत्र साध्याव्यापकत्वमिति भावः ॥ वक्तुरिति। वक्तुर्जिनादेर्विवक्षितार्थतत्त्वज्ञानाभावेन तत्प्रणीतं शास्त्रमनाप्तवाक्यमित्यर्थः। अनेनानुकूलेन वक्त्रेति हेतुगतविशेषणस्य व्यावर्त्यमुक्तं भवति ॥ श्रोत्रानुकूल्येति। बौद्धागमस्थले वक्तुर्बुद्धस्य भगवदवतारत्वेन विवक्षितार्थतत्त्वज्ञानादिमत्त्वरूपवक्त्रानुकूल्यसत्वेऽपि श्रोतॄणामसुरप्रकृतिकत्वेन तत्त्वज्ञानायोग्यतया श्रोत्रानु-

कूल्यविरहाद्बौद्धादिशास्त्रमनाप्तवाक्यमित्यर्थः । अनेनानुकूलान् श्रोतॄन्प्रतीति विशेषणस्य व्यावर्त्यमुक्तं भवति ॥ प्रसंगेति । श्रोतृप्रयोजनोद्देशरूपप्रसंगानुकूल्यविरहान्नर्मादिपरिहासादिवाक्यमनाप्तवाक्यमिति संबंधः । अनेन तदीयहितसाधनबोधायेति विशेषणस्य व्यावर्त्यमुक्तं भवति ॥ अज्ञातेति । अज्ञातसंदिग्धयोः प्रमाणदृष्टत्वाभावेन तदनुवादवाक्यप्रयोक्तरि यावत्प्रमाणदृष्टं तावत एव वक्तेत्याप्तलक्षणाभावेन तस्यानाप्तत्वप्रसंगादित्यर्थः ॥ सार्वत्रिकव्यवहारानौपयिकत्वमिति । विनयादिभ्यष्ठगिति उपायशब्दात्स्वार्थे ठकि उपायाद्ध्रस्वत्वं चेत्यस्य पदमंजर्यामुपायशब्दमकमुत्पादयति ह्रस्वत्वं चापद्यते स च ह्रस्व आकारस्य भवति । अन्यस्याचः स्वत एव ह्रस्वत्वादिति व्याख्याततत्वादाकारस्य ह्रस्वत्वे आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यवर्णलोपे चौपयिकशब्दो निष्पन्नः । प्रतिबंधो व्याप्तिः ॥ वक्त्रानुकूल्यस्येति । विवक्षितार्थतत्त्वज्ञानादिरूपस्य वक्त्राद्यानुकूल्यस्याप्तिशरीरे प्रविष्टत्वेन तदेकदेशत्वमिति भावः ॥ उपाधेरिति । आप्तवाक्यत्वरूपोपाधेरित्यर्थः ॥ साधनाभेदामिति । वक्तृश्रोतृप्रसक्तीनामनुकूलतेति यत्सैवाप्तिरित्येतदर्थकेन वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलतेति पूर्ववाक्येन वक्त्राद्यानुकूल्यरूपसाधनेनाभेदप्राप्तिं प्रदर्श्य तेनैवाप्तवाक्यस्योपाधित्वाभावं च व्युत्पाद्याप्तवाक्यतया तेनेत्युत्तरवाक्ये आप्तवाक्यतारूपेण वक्त्राद्यानुकूल्येनेत्यर्थकेन तेन साधनेन साध्यं साध्यत इत्यर्थः । यद्यप्याप्तवाक्यतया तेनेत्यत्र तच्छब्देन पूर्ववाक्यनिर्दिष्टवक्त्राद्यनुकूलतापरामर्शे तेनेति निर्देशानुपपत्तिः । तथाऽपि वक्त्रादिसमुदायिसंबंधिन एकस्यानुकूल्यस्याभावेन द्वंद्वनिर्दिष्टानामपि वक्त्रादीनामनुकूलताशब्दितानुकूल्येन प्रत्येकमन्वयेन पूर्ववाक्येऽनुकूलतात्रयस्य प्रकृतत्वात्तत्सामान्येन

निर्देष्टुं सामान्ये नपुंसकं प्रयोक्तव्यमिति न्यायेन तेनेति निर्देशः कृतः । अतो नानुपपत्तिरिति हृदयं ॥ आप्तेरिति । आप्तेर्वक्तृमात्रनिष्ठाया वक्तृश्रोतृप्रसंगानुकूल्यरूपसाधनाभेदानुपपत्त्या पूर्ववाक्ये साधनाभेदप्रदर्शनमेवानुपपन्नं । सुतरां तत्पूर्वकमुत्तरवाक्यस्थं साधनेन साध्यसाधनमिति भावः ॥ सत्त्वेति । कृतकत्वं प्रागसतः सत्तासमवायित्वमनित्यत्वं ध्वंसोपलक्षितसत्तायोगित्वमिति तयोः सत्त्वानुप्रवेश इति भावः ॥ यदेति । निर्दोषत्वं प्रमितिमात्रवक्तृत्वं वाऽऽप्तत्वमिति यदाऽऽश्रीयते तदा वक्त्रानुकूल्यस्याप्येकदेशत्वाभावेन साध्याविशिष्टताशंकैव नास्तीत्यर्थः ॥ जैमिनिरिति । जैमिनिरप्यौत्पत्तिकस्तुशब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धेस्तत्प्रमाणं बादरायणस्यानपेक्षितत्वादिति प्रामाण्यं स्वत एवेति बादरायणीयं मतमाहेत्यर्थः । जैमिनिसूत्रार्थस्तु । औत्पत्तिकः स्वाभाविकः शब्दार्थयोः संबंधो नाधुनिकः । अतोऽग्निहोत्रं जुहुयादित्यादिरुपदेशो विधिश्चोदना चोपदेशश्च विधिश्चैकार्थवादिना इतिभट्टोक्तेः । तस्याग्निहोत्रादिलक्षणस्य धर्मस्य ज्ञानं ज्ञापकं । ज्ञायतेऽनेनेति करणे ल्युट् । एतेन ज्ञानानुत्पत्तिलक्षणमप्रामाण्यं निरस्तं । विपर्ययं निराचष्टे । अव्यतिरेकस्तस्याव्यतिरेकोऽविपर्ययः । चकारादसंशयश्च । अर्थेऽनुपलब्धे इत्यनुवादत्वं निरस्यति । अतस्तच्चोदनाख्यं प्रमाणमेवानपेक्षत्वेनाज्ञातंज्ञापकत्वात् । बादरायणग्रहणं पूजार्थं ॥ न परमतत्वेनेति । अत्रानपेक्षत्वादित्यनेन स्वतःप्रामाण्यमुक्तमिति द्रष्टव्यम् ॥ समानार्थेति । यथा श्रुतियुक्तिसमानार्थत्वं श्रुतियुक्तिमूलकमन्वादिवाक्यस्य तथा सूत्राणामपि तदस्तीति गौण्या वृत्त्या श्रुतियुक्तिमूलशब्दौ श्रुतियुक्तिसमानार्थत्वरूपतत्संवादितार्थौ व्याख्येयावित्यर्थः ॥ एवमिति । एवं गौणप्रयोगे सति न केवलं नियतश्रुतियुक्ति-

समानार्थत्वरूपयादृच्छिकतत्संवादित्वमेव ज्ञायते । किं तु श्रुत्यर्थनिर्णायकयुक्तिविचारात्मकत्वरूपं यच्छ्रुत्याद्यंगत्वं शास्त्रस्य तदपि ज्ञायत इत्यर्थः । ज्ञातेनांगांगिभावेन किं प्रयोजनमित्यत आह ॥ स चेति । स च ज्ञातोऽगांगिभावश्चेदं शास्त्रं प्रमाणं श्रुतिसंवादित्वाद्युक्तिसंवादित्वादित्यनयोर्हेत्वोर्वक्ष्यमाणरीत्या पक्षधर्मतोपपादको भविष्यतीत्यर्थः ॥ तच्चेति । शास्त्रस्य श्रुत्यर्थविचारपरत्वं च पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमंजसेत्यागमसिद्धमित्यर्थः ॥ अन्यथेति । श्रुतियुक्तिसंवादित्वेऽपि शास्त्रस्य प्रामाण्याभाव इत्यर्थः ॥ अर्धवैशसेति । न हि संवादिनोर्मध्ये एकस्याप्रामाण्यमपरस्य प्रामाण्यमिति संभवतीति भावः । याथार्थ्यरूपप्रामाण्यस्यैकविधत्वेन त्रिविधं प्रामाण्यमिति त्रैविध्यस्य प्रामाण्यविशेषणत्वानुपपत्तेर्व्याचष्टे ॥ क्रियाविशेषणमिति । क्रियाविशेषणत्वे त्वाप्तवाक्यत्वादिप्रमाणत्रयजन्यप्रामाण्यदर्शनस्य त्रित्वान्नानुपपत्तिरिति भावः ॥ तस्येति । शारीरकशब्दितपरमात्मनः सकलगुणपूर्णत्वसर्वदोषविहीनत्वजीवभिन्नत्वादिमीमांसैव शारीरकमीमांसेत्यर्थः । ननु शारीरौ तावुभौ ज्ञेयौ जीवश्च परमस्तथेति वचनाच्छारीरकशब्दस्य परमात्मवाचित्वेऽपि शारीरकस्य मीमांसा शारीरकमीमांसेति परमात्मविषयकमीमांसैव शारीरकमीमांसाशब्देन लभ्यते । न तु परमात्मनः सकलगुणपूर्णत्वादिना रूपेण मीमांसेति ब्रह्मसूत्रात्मकमीमांसाशास्त्रस्य परमात्मीयगुणपूर्णत्वादिप्रतिपादकत्वे प्रमाणाभावादित्यत आह ॥ तथा चोक्तमिति । सर्वदोषविहीनत्वं गुणैः सर्वैरुदीर्णता । अभेदः सर्वरूपेषु जीवभेदः सदैव हि । विष्णोरुक्तानि सूत्रेष्विति पुराणवाक्ये ब्रह्मसूत्राणां परमात्मीयगुणपूर्णत्वादिप्रतिपादकत्वस्योक्तत्वेन शारीरकस्य मीमांसेत्यत्र केन प्रकारेण मीमांसेति जिज्ञासायां सकलगुणपूर्णत्वादि-

लक्षणप्रकारस्यैव वक्तव्यत्वाच्छारीरकस्य परमात्मनः सकलगुणपूर्णत्वादिरूपेण मीमांसा शारीरकमीमांसेत्यर्थ एव ग्राह्य इति भावः ॥ आप्त्यादिकमिति । आदिशब्देन श्रुतिसंवादित्वयुक्तिसंवादित्वयोर्ग्रहणं ॥ कथमेतदिति । प्रमाणत्रितयावसितस्य ब्रह्मसूत्रप्रामाण्यस्य महत्त्वं कथमित्यर्थः। एकप्रमाणप्रमितप्रामाण्यापेक्षयाऽनेकप्रमाणावसितप्रामाण्यस्य स्वरूपेऽतिशयाभावेऽप्यतिशयिताविशंकक्षिप्रप्रवृत्तिजनकत्वात्ततोऽतिशयत्वेनोच्यत इत्यभिप्रेत्य परिहरति ॥ इत्थमिति ॥ विषयेति। ब्रह्मरूपविषयातिशयेन मोक्षरूपप्रयोजनातिशयेन च धर्मविषयकस्वर्गादिप्रयोजकजैमिनिसूत्रप्रामाण्यापेक्षया ब्रह्मसूत्रप्रामाण्यस्यातिशयो द्रष्टव्य इत्यर्थः ॥विचार्येष्विति । निर्णेतव्यार्थेषु शास्त्रेषु भारतस्योत्तमत्वेऽपि निर्णायकेषु ब्रह्मसूत्राणामेवोत्तमत्वमुच्यमानं न विरुद्धमिति भावः। सर्वं प्रामाण्यादिकं ॥ किमनेनेति । प्रामाण्यादिसमर्थनेन किमित्यर्थः ॥ प्रथमभाष्य इति । प्राग्भाष्यप्रामाण्यनिश्चयाभावेन प्रथमभाष्येऽपि कथं प्रवृत्तिर्न कथंचिदित्यर्थः । तथा प्रथमभाष्य एव प्रवृत्त्ययोगाद्भाष्यकारीयप्रामाण्यसमर्थनेन सूत्रप्रामाण्यनिश्चयो नोपपद्यत इत्यर्थः । संदेहात्प्रथमभाष्ये प्रवृत्तस्य तद्व्युत्पादिताप्तवाक्यत्वादिप्रमाणैः सूत्रप्रामाण्यनिर्णयोपपत्तिरित्याशयेन परिहरति ॥ संदेहादिति ॥ सममिति । संदेहात्प्रथमसूत्रे प्रवृत्तस्य तद्व्याख्यानेनैव सूत्रप्रामाण्यनिश्चयो भविष्यतीति भाष्यकारीयं तत्समर्थनं व्यर्थमिति भावः ॥ सुग्रहं सुप्रयोजनं चेति । सुप्रयोजनशब्दवत्सुग्रहशब्दोऽपि शोभनो ग्रहो यस्येति बहुव्रीहिसमासरूपः । तेन ईषदुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खलिति खलंतत्वात्सुग्रहशब्दस्य खलर्थयोगे च न लोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधाच्छ्रोतॄणामिति षष्ठ्यनुपपत्तिरिति चोद्यमनवकाशमिति ध्येयम् ॥ बहुवारेति । तस्य

संक्षेपविस्तराभ्यां कथनस्य बहुवारस्मृतेर्बहुवारस्मृतिरूपव्यापारात्फलबाहुल्यकारणाद्भावप्रधानो निर्देशः । तथा च संक्षेपविस्तराभ्यां कथनस्य बहुःवारस्मृतिद्वारा फलबाहुल्यकारणत्वान्मनीषिणः संक्षेपविस्तराभ्यामर्थं कथयंतीति फलितं । यद्वा । बहुवारं स्मृतिर्यस्य कथनस्य तद्बहुवारस्मृतिस्तस्य तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति पुंवद्भावः । तथा च बहुवारस्मृतिपूर्वकस्य तस्य संक्षेपविस्तराभ्यां कथनस्य फलबाहुल्यकारणत्वादित्यर्थः । कथनस्यार्थस्मृतिपूर्वकत्वं चार्थं बुद्ध्वा शब्दरचनेति न्यायेन प्रसिद्धमेवास्मिन्पक्षे कथमप्रयोजनमुक्तं भवति । पूर्वत्र तु द्वारभूतस्मृतेः श्रोतृनिष्ठत्वात्तत्प्रयोजनमुक्तमिति वेदितव्यं । ननु पूर्वस्मिंपक्षे बहुवारस्मृतेरित्यनुपपन्नं । कथनव्यापारभूतश्रोतृनिष्ठार्थज्ञानस्य शाब्दत्वेन स्मृतित्वाभावादिति चेन्न । स्मृतिशब्देनानुसंधानमात्रस्य विवक्षितत्वात् । अथवा । बहुवारं स्मृतिर्यस्मात्तद्बहुवारस्मृतिस्तस्य बहुवारस्मृतिहेतोः संक्षेपविस्तराभ्यां कथनस्य फलबाहुल्यकारणत्वादित्यर्थः । ननु संक्षेपविस्तराभ्यां कथनस्य बहुवारस्मृतिद्वारा फलबाहुल्यसंपादकत्वे एकस्मिन्नेव प्रस्थाने संक्षिप्योक्त्वा विवक्षितं प्रमेयं विस्तरशोऽपि वक्तव्यं स्यात् । प्रस्थानभेदे किंचिन्नियामकमस्तीति चेत् । एकस्मिन्प्रस्थान एव संक्षिप्योक्त्वा विस्तरशोऽपि वक्तव्यमित्यस्य कोऽर्थः । एकैकस्याधिकरणस्य प्रमेयं संक्षेपत उक्त्वा विस्तरग्रंथे वक्तुमिष्टमपि प्रमेयं तत्तदधिकरणांतर्गतत्वेन वक्तव्यमिति वोतातःथो ब्रह्मजिज्ञासेत्यादेरनावृत्तिः शब्दादनावृत्तिः शब्दादित्यंतस्य सूत्रसंदर्भस्य संक्षिप्यार्थं वर्णयित्वा तत्रैव प्रस्थाने विस्तरग्रंथविवक्षितं प्रमेयं वक्तव्यमिति । नाद्यः । असुग्रहत्वप्रसंगात् । न हि जिज्ञासाधिकरणस्य संक्षिप्य प्रमेयमुक्त्वा तत्रैवाधिकरणे विस्तरग्रंथे वक्तुमिष्टस्यैतावतः प्रमेयस्य

कथने श्रोतृभिः सुग्रहं भवति । न द्वितीयः । आद्यसूत्रमारभ्यांत्यसूत्रपर्यंतं संक्षेपेणार्थवर्णने कृते तस्य संक्षेपप्रस्थानस्य परिसमाप्तत्वेन तत्रैव प्रस्थाने विस्तरग्रंथप्रमेयं वक्तव्यमित्यस्य वचसो रिक्ततया प्रस्थानांतरारंभस्यैव प्राप्तत्वादिति ॥ श्लोकत्रयेणेति । यद्यपि प्रादुर्भूतो हरिर्व्यास इति तृतीयश्लोकेन भाष्याद्यपद्यस्थस्य कस्यापि शब्दस्यार्थो न विवृतः । तथाऽपि कृतकृत्यस्य वेदव्यासस्य शास्त्रप्रभवत्वानुपपत्तिः । परविद्याया एतच्छास्त्रविषयत्वेन नियामकमस्तीत्याद्याशंकानिरासार्थं प्रवृत्तेन तृतीयश्लोकेनापि व्यासस्य शास्त्रप्रभवत्वसमर्थनद्वारा गुरूनिति बहुवचनांतोपात्तगुरुत्वप्रकारविवरणं परविद्याख्याया एतच्छास्त्रविषयत्वसमर्थनद्वारा निरुपपदसूत्रग्रहणसूचितसर्वोत्तमप्रामाण्यविवरणं च कृतमिति द्रष्टव्यम् ॥ प्रचीयंते चेति । तथा च निरंतराय परिसमाप्तिप्रचयहेतुतया शिष्टाचारसंप्रदायप्राप्तं मंगलं सूत्रकृता नानुष्ठितमिति तत्प्रणीतं शास्त्रममव्याख्येयमिति भावः । सामग्रीवैकल्येन सकलकारणसंपत्तिवैकल्येन । तरंत्यनेनेति तृप्लवनतरणयोरित्यस्माद्धातोरकर्तरि च कारके संज्ञायामिति करणे घञि अचो ञ्णितीति ऋकारस्याकाररूपवृद्धावाकारस्य उरण् रपर इति रपरत्वे च तारशब्दो निष्पन्न इति भावः । ज्ञापकतयाऽन्वयप्रतियोग्यधिकारिविषयोपस्थापकतया लक्षणांतराभावेऽनुसरतीति । एतच्च विशेषणं यो यत्रासंहिततया पठ्यमानो नासौ तदवयव इति सामान्यव्याप्तौ प्लुतप्रगृह्याचीति लक्षणांतरवशादसंहिततया पठ्यमानयोः प्लुतप्रगृह्ययोर्व्यभिचारवारणायोह इत्यध्याहार इत्यर्थः । अध्याहरस्तर्क ऊह इति निघंटुप्रसिद्धेरूहनमूह इति भावव्युत्पत्त्याश्रयणात्तेन सौर्ये चरौ चोदकप्राप्तेऽग्नये जुष्टं निर्वपामीति मंत्रे सूर्यायेत्यूह्यं प्रत्यग्नय इति पदस्यैव प्रकृते स्थानिनो भावादूहशब्दानुपपत्तिरिति चोद्यं निरस्तं ।

ऊहशब्दस्याध्याहारपरत्वेन नवमाध्यायव्युत्पादितोहपरत्वाभावात् । वाक्यात्पृथगिति वाक्यानवयव इत्यर्थः ॥ मंत्रेष्विति । अग्नये जुष्टं निर्वपामीत्यादिमंत्रेषूह्यमानस्य सूर्यायेत्यादिपदस्य मंत्रेण सहैककार्यकारित्वाभावरूपमंत्रानवयवत्वप्रसंगादित्यर्थः । तेनोहप्रवरनामधेयानाममंत्रत्वस्य पूर्वतंत्रे द्वितीये सिद्धांतितत्वादिष्टापादनमेतदिति चोद्यं निरस्तं । ऊह्यमानस्य सूर्यायेत्यादिपदस्य मंत्रेण सहार्थप्रकाशनलक्षणैककार्यकारित्वेन तदभावरूपमंत्रानवयवत्वापादने इष्टापत्त्ययोगात् ॥ तस्येति । ॐकारस्य संहिततया निर्देशेऽथशब्द इव प्रथमसूत्रावयव एवायं विज्ञायेतेत्यर्थः ॥ हेतोरिति । लक्षणांतराभावे सत्यसंहिततयाऽखिलैः पठ्यमानत्वादिति हेतोः सूत्रानवयवत्वसाधकस्य ॐकारस्य सूत्रावयवत्वेऽप्युक्तनिमित्तांतरवशादसंहितापाठोपपत्तेरित्यन्यथासिद्धिरुक्ता भवतीत्यर्थः । यद्यप्यसंहिततया संपाठेऽखिलैः पठ्यमानत्वादित्यादावसंहितेति समासोऽनुपपन्नः । प्रसज्यप्रतिषेधार्थकनञः क्रियान्वितत्वेन संहिताशब्देन सामर्थ्याभावात् । तथाऽप्यकर्तरि च कारके संज्ञायामित्यत्राकर्तरीति निर्देशरूपज्ञापकात्समासोपपत्तिरिति ज्ञेयम् । ननु स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यत इति श्रौतनिंदार्थवादबलेनाद्यंतयोरोंकारोच्चारणस्य विधेयत्वे परिकल्पिते तदुच्चारणमोंकारस्यावयवभूतस्य वा प्राङ्मुखत्वादिवद्बहिर्भूतस्यैव वेति संदिह्यमानत्वादवयत्वेऽप्योंकारस्यासंहिततयोच्चारणमुपपन्नमिति निश्चितान्यथासिद्धिः कथमुच्यत इत्यभिप्रेत्य शंकते ॥ नन्विति । उक्तरीत्याऽन्यथासिद्धिसंदेहेऽप्योंकारानवयत्वसाधकहेतोः संदिग्धान्यथासिध्या दुष्टत्वमेवेत्यभिप्रेत्य परिहरति ॥ सत्यमिति ॥ वक्ष्यमाणेति । ॐतत्ववाची ह्योंकार इत्यत्र वक्ष्यमाणरीत्या ॐकारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेन तस्यावयवत्वनिश्चयोपपत्तावनवयव-

त्वसाधकमनुमानं बाधितविषयं चेत्यर्थः ॥ दृष्टांतेति । अध्ययनोपक्रमोच्चार्यमाणोंकाररूपदृष्टांतस्य साध्यवैकल्यरूपदूषणमनेन सर्वत्रानुगतत्वेनेति वाक्येन व्युत्पाद्यत इत्यर्थः ॥ दृष्टांतेति । दृष्टांतेनावयवत्वरूपसाध्यसाधकस्य तत्तत्स्थानपरित्यागेनान्यस्थानेऽखिलैः पठ्यमानत्वरूपहेतोरन्यथासिद्धिरुक्ता भवतीत्यर्थः । अन्यथासिद्धिकथनेन लब्धं दृष्टांतदोषमाह ॥ तथा चेति। अनुमाने ॐकारस्यानवयवतासाधकानुमाने । इहैव शास्त्र एव । तन्निश्चये ब्रह्मज्ञानस्य मोक्षहेतुतानिश्चये ॥ प्रवृत्ताविति । शास्त्र इति शेषः । इहेत्यस्यानुषंगो वा ॥ तदर्थमिति । प्रथमसूत्रे प्रवृत्त्यर्थं च प्रयोजनांतराभिधायकवाक्येंऽगीक्रियमाणे तत्रापि प्रवृत्त्यर्थं प्रयोजनांतराभिधानमंगीकर्तव्यमित्यनवस्थेत्यर्थः ॥ एवमेवेति । प्रयोजनादिनिश्चयं विनैव प्रथमसूत्रे प्रवृत्तावंगीक्रियमाणायामुत्तरसूत्रेष्वपि तथैव प्रवृत्त्यापत्त्याऽनर्थकं प्रथमसूत्रे प्रयोजनाद्यभिधानमित्यर्थः । प्रयोजननिश्चयाभावेऽपि प्रथमसूत्रमनुभवतः पुंसस्ततः प्रयोजननिश्चये साधनगोचरेच्छाप्रयत्नलक्षणा प्रवृत्तिः शास्त्रे संभवति । न चानुभवोऽपि प्रयोजननिश्चयाधीनस्तस्याप्रवृत्तित्वात्प्रवृत्तिशब्दार्थस्यैव प्रयोजननिश्चयसाध्यत्वादतो न कोऽपि दोष इत्यभिप्रेत्य परिहरति ॥ उच्यत इत्यादिना ॥ न त्वनुभव इति । अनुभवः प्रवृत्तिरिति नोच्यत इत्यर्थः । नन्वनुभवफलगोचरेच्छयोः प्रवृत्तिशब्दार्थत्वं प्रयोजनानुसंधानापेक्षत्वं चास्त्वित्यत आह ॥ न हीति ॥ उपेक्षणीयं निष्प्रयोजनमिति । न हि नानुभूयत इत्यनेनानुभवस्य प्रवृत्तिशब्दार्थत्वप्रयोजनानुसंधानसाध्यत्वशंका निरस्ता । फलगोचरेच्छायास्तच्छंका तु नापीत्युत्तरवाक्येन । ननु तथाऽपि साधनगोचरानुभवस्य फलेच्छासाध्यत्वेन प्रवृत्तित्वान्न त्वनुभवः प्रवृत्तिरित्युच्यत इत्येतदयुक्तमित्यत आह ॥ न चेति । मुमुक्षोः

स्वर्गेच्छाविरहेऽपि तत्साधनयागाद्यनुभवस्य जायमानत्वेन साधनगोचरानुभवे फलेच्छासाध्यत्वस्यैवाभावान्नोक्तानुपपत्तिरिति भावः । स्वरसिद्धा प्रयोजनानुसंधानं विना सिद्धा । अर्थसंदेहेऽपि प्रयोजनसंदेहेऽपि । नन्विदं प्रयोजनाद्युपेतं न वेति संदेहकोटिप्रयोजनादिस्मरणार्थं प्रयोजनादिवचनमावश्यकमेवेत्यत आह ॥ विशेषस्मृति श्चेति । अनर्थकाशंकाप्रकारमेव दर्शयति ॥ किं निष्प्रयोजनमित्यादिना कूपखननोपदेशवदित्यादिर्त्येतेन ॥ तस्मादिति । आप्तवाक्यत्वेन वेषेण प्रथमसूत्रस्य प्रयोजनादिबोधकत्वे न्यायसूत्रत्वहान्यादिदोषप्रसंगान्नेदं सूत्रं प्रयोजनाद्युपदेशमात्रं । किंतु श्रुत्यवगतस्य प्रयोजनादेर्न्यायेनोपपादनार्थमित्येव वक्तव्यमित्यर्थः । एवं चोक्तं च प्रयोजनादिकं श्रोता कथं श्रद्दधीतेत्यादिशंकानवकाशः । न्यायेनोपपादितेऽर्थे श्रद्धावश्यंभावादिति द्रष्टव्यम् । नन्वस्य सूत्रस्याप्तवाक्यतया बोधकत्वाभावे भाष्यकारीयं सूत्रकाराप्तत्वव्युत्पादनमफलं स्यादित्यत आह ॥ आप्तत्वमिति ॥ अत एवेति । यत इदं सूत्रं श्रोतृप्रयोजनादिनिर्णायकन्यायग्रथनात्मकमत एव । अस्य सूत्रस्य श्रुत्यर्थनिर्णायकन्यायग्रथनात्मकशास्त्राद्बहिर्भावो नेत्यर्थः । नन्वस्य सूत्रस्यारंभणीयत्वमन्यस्माद्वा सिध्यति । अस्माद्वा । नाद्यः । अनवस्थाप्रसंगात् । न द्वितीयः । स्वस्य स्वविषयकत्वायोगादित्यत आह ॥ अध्ययनेति । स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेः स्वाध्यायांतर्गततया तत एव तस्याप्यध्येतव्यत्वं यथा सिध्यति । तथाऽस्य सूत्रस्य शास्त्रांतर्भूतत्वेन शास्त्रारंभणीयत्वप्रतिपादकादस्मात्सूत्रादेवास्याप्यारंभणीयत्वं सिध्यति । अतो नानवस्था । अध्ययनविधिवत्स्वविषयकत्वोपपत्तेः स्वविषयकत्वायोगश्च नेत्यर्थः । यद्वा । प्रथमसूत्रस्यारंभणीयत्वसिद्धिः सूत्रांतराद्वाऽस्मादेव वा । आद्येऽपि सूत्रांतरस्यारंभणीयत्वसिद्धये पुनः सूत्रांतराभ्युपगमे

तत्राप्येवमित्यनवस्था । सूत्रांतरारंभणीयत्वमस्मात्प्रथमसूत्रात्सिध्यतीत्यंगीकारेऽन्योन्याश्रयः । सूत्रांतरस्यारंभणीयत्वं पुनः सूत्रांतरेण सिध्यतीत्यंगीकृत्य तस्य चारंभणीयत्वमनेन प्रथमसूत्रेण सिध्यतीत्यभ्युपगमे तु चक्रकं । द्वितीये स्वस्यारंभणीयत्वसिद्धये स्वापेक्षेत्यात्माश्रयत्वमित्याशंकायामिदमुदितमित्यवतार्यानवस्थादीत्यादिपदेनान्योन्याश्रयचक्रकादिकं गृहीतमिति व्याख्येयम् । एवं पूर्वपक्षे प्राप्ते तन्निरासायेदं सूत्रं प्रवृत्तमित्यस्य प्रसंगं दर्शयितुं पूर्वपक्षस्य च विषयसंशयौ विनाऽनुत्थानाद्विषयादिप्रदर्शनपूर्वकं पूर्वपक्षमाह ॥ उच्यत इत्यादिना । अनुपस्थिते शास्त्रे किमिदमारंभणीयं न वेति संशयायोगादुपस्थितिं संपादयति ॥ प्रारिप्सितेति ॥ उपलभ्यंत इति । तथा चारंभणीयत्वानारंभणीयत्वरूपकोटिद्वयसहचरितवाक्यत्वरूपसाधारणधर्मः संशयबीजमित्युक्तं भवति । विशेषस्मृतिमता कोटिस्मृतिमता ॥ तद्द्वारेति । तस्य विचारस्य द्वारभूतोपायभूतो यो न्यायस्तन्निबंधनमित्यर्थः ॥ अन्यथेति । मननापरनामकजिज्ञासाया अकर्तव्यत्वे तदंगभूतन्यायनिबंधनात्मकमिदं शास्त्रमारंभणीयं न भविष्यतीति जिज्ञासैव कर्तव्या नवेत्येवं विचारणीयेत्यर्थः । असौ तृणादिलक्षणोऽनात्मा । शास्त्रांतरादिना पूर्वमीमांसादिना ॥ जरद्गवादीति । जरद्गवः कंबलपादुकाभ्यां द्वारि स्थितो गायति भद्रकाणि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रमायां लशुनस्य कोऽर्थ इत्यादिवाक्यं श्रुतेराभासतायां दृष्टांतः । पावकशैत्यानुमानं तु (पावकः शीतः पदार्थत्वात्) न्यायानुसंधानरूपजिज्ञासाया आभासत्वे दृष्टांत इति द्रष्टव्यम् । परात्मा स्वापेक्षयाऽन्यो जीवः ॥ तस्येति । तस्य परात्मनः । इदं शरीरं सात्मकं चेष्टादिमत्त्वादित्यादिलिंगैर्निश्चितत्वेन स्वात्मवन्न जिज्ञास्यत्वमिति भावः ॥ न चैव-

मिति । एवमीश्वराभावे ईश्वरादिपदानामानर्थक्येनार्थवाचित्वाभावेन शक्तं पदमिति पदलक्षणाभावादपदत्वप्रसंगः । सुप्तिङंतं पदमित्याश्रयणेऽर्थवदधातुरप्रत्ययः प्रातिपदिकं । ङ्याप्प्रातिपदिकादित्यादिना सुबुत्पत्तेरर्थवत्त्वप्रयुक्तप्रातिपदिकसंज्ञानिबंधनत्वावगमेनार्थवत्ताभावे सुबुत्पत्तेरयोगादपदत्वप्रसंग इति न च वाच्यमित्यर्थः । ईश्वरादिपदानां जीवविषयत्वसिध्यर्थमुपलक्षणयेश्वरपदस्य जीवे व्युत्पत्तिमाह ॥ सोऽपीति । स्थेशभासपिसकसो वरजिति वरच्प्रत्ययांतस्येश्वरशब्दस्येष्ट इत्येव व्युत्पत्तिः । स्वशरीरेंद्रियादीनामिति तु केषामीष्ट इत्याकांक्षायामुक्तमिति मंतव्यम् । नन्वीश्वरपदस्य जीवविषयत्वे ईश्वरशब्दप्रवृत्तिनिमित्तस्यैश्वर्यस्य स्वशरीरेंद्रियादिविषयत्वेन संकोचः कार्यः । परब्रह्मविषयत्वे तु नेति तद्विषयतैवोचितेत्यत आह ॥ प्रतीतेति । अप्रतीतार्थकल्पने गौरवभीत्या प्रतीतजीवार्थत्वं परिकल्प्येश्वरपदप्रवृत्तिनिमित्तैश्वर्यसंकोचः स्वीकार्य एवेति भावः । ईश्वरः प्रमितो नेति पक्षे तस्य बुद्धावनारूढत्वेन जिज्ञास्यत्वायोग इति दूषणांतरमाह ॥ न चेति । निष्पन्नस्वरूपं सिद्धस्वरूपं । वेदस्य पौरुषेयत्वे पुरुषस्य भ्रमादिसंभवेन वक्तृवाक्यार्थयथार्थज्ञानलक्षणकारणानिश्चयेन प्रामाण्यं दुर्लभं । अपौरुषेयत्वे तु सुतरामुक्तकारणाभावे प्रामाण्यं दुर्लभमित्यर्थः ॥ अर्थेति । ज्ञापकस्य ज्ञाप्येन संबंधो वक्तव्यः । प्रत्यक्षादौ तथा दर्शनात् । असन्निकृष्टज्ञापनेऽतिप्रसंगाच्च । प्रकृते च शब्दस्यार्थेन संयोगादिरूपसंबंधाभावात् तत्प्रतीतिजनकत्वमेव न संभवतीति प्रामाण्यं दुर्घटमिति भावः ॥ वाक्यार्थेति । वर्णपदपदार्थतदनुभवस्मृतीनां प्रत्येकं समुदितानां च वाक्यार्थप्रत्ययकारणत्वायोगेन तत्प्रत्ययोपायस्य निरूपयितुमशक्यत्वाच्चेत्यर्थः ॥ दृष्टेति । विचारस्य विचार्यार्थ-

तत्त्वज्ञानं प्रत्येव हेतुताया दृष्टत्वात्साक्षान्मोक्षहेतुत्वस्यादृष्टत्वाच्च दृष्टत्यागादृष्टकल्पनाप्रसंगादित्यर्थः ॥ अदृष्टेति । लोके प्रभुप्रसादस्यैव निगडादिबंधमोक्षहेतुत्वदर्शनेनादृष्टकल्पनेति भावः । आत्माऽविद्याकल्पितः आत्मविषयाविद्याकल्पितः ॥ आत्मस्वरूपेति । आत्मस्वरूपानुबंधिनो बंधस्य सादित्वे बंधात्पूर्वमात्मनो मुक्तत्वापत्त्या बंधस्यानादित्वमेष्टव्यमित्यनादित्वोपपादकमेतद्विशेषणं ॥ उक्तदोष इति । धर्मादिलघूपायसाध्यत्वेन शास्त्रांतरप्रयोजनत्वमित्युक्तदोष इत्यर्थः ॥ ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥ विलक्षणमवगम्यत इति । अनारंभणं प्रेक्षावदनुपादेयं ॥ ताभ्यामिति । वक्ष्यमाणरीत्या सकलगुणपूर्तिपराभ्यामोंकारब्रह्मशब्दाभ्यां जिज्ञास्ये प्रयुक्ताभ्यां सकलगुणपूर्तिरहितादशेषजीवजडात्मकात्प्रपंचाज्जिज्ञास्यं वस्तु विलक्षणमवगम्यत इत्यर्थः । अलौकिकार्थे अपूर्वे गुणपूर्णरूपार्थे । प्रतीमः जानीमः ॥ सन्निहितेति । यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यादिसन्निहितानेकवाक्यार्थविधया लभ्यत इत्यर्थः ॥ गत्याद्यर्थस्येति । अवरक्षणगतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थ्ययाचनक्रियेच्छादीत्यवाप्त्यालिंगनहिंसादानभागवृद्धिष्विति धातुपाठाद्गत्याद्यर्थस्यावतेः ॐमितिरूपं निष्पन्नमित्यर्थः । तत्कथमित्यत आह ॥ अवतेष्टिलोपश्चेति । अवतेर्मन्प्रत्ययो भवति । तस्य प्रत्ययस्य टिलोपश्चेति सूत्रार्थः । तथा चावतेर्मन्प्रत्यये प्रत्ययस्य टिलोपे च अम् इति स्थिते प्रत्ययमकारस्य नेड्वशिकतीति इट्प्रतिषेधे ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यनुनासिके परतोऽवतेरुपधाकारस्य वकारस्य चोंठि कृते तस्य सार्वधातुकार्धधातुकयोरिति गुणे च कृते ॐमिति रूपं प्रसिद्धमिति भावः । केचित्तु

वकारस्योठि कृतेऽकारोकारयोर्गुणे च ॐमिति रूपं निष्पन्नमित्याहुः । तन्न । ज्वरत्वरस्रिव्यविमवामुपाधायाश्चेति सूत्रस्य काशिकायां ज्वरत्वरस्रिविअविमव् इत्येतेषामंगानां वकारस्योपधायाश्च स्थाने ऊठित्ययमादेशो भवतीति व्याख्यातत्वेन वकारमात्रस्योठि क्रियमाणे तद्विरोधप्रसंगात् । श्रूः ऊः मूः इत्याद्युदाहरणानामसिद्धिप्रसंगेन तत्सूत्रस्य वकारमात्रस्योठादेशविधानपरत्वाभावाच्च । न च वाच्यं छ्वोः शूडनुनासिके चेत्यनेनात्रोठ्क्रियत इति । ज्वरत्वरेत्यादिविशेषसूत्रविहितकार्यस्यैवावश्यंभावात् । एत्येधत्यूठ्स्विति वृद्धिप्रसंगाच्च । अन्यथोक्तोदाहरणेषु अविसिविसिशुषिभ्यः किदिति अवतेर्मन्प्रत्यये निष्पन्नो य ऊमशब्दस्तत्र च छ्वोरिति सूत्रेण वकारमात्रस्योठादेशापत्त्याऽनिष्टरूपप्रसंगादिति । वस्तुतस्तु यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीतेति श्रुतौ सोऽयमात्माध्यक्षरमोंकारोऽधिमात्रं पादमात्रं । अकारोकारमकार इति । श्रुत्यंतरे तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायंत अकारोकारमकार इति तानेकधा समभरत्तदेतदोमिति । श्रुत्यंतरे च ओंकारस्याकारोकारमकाररूपवर्णत्रयात्मकत्वोक्तेस्तद्विरोधो ज्वरत्वरेत्यादिसूत्रस्यात्राप्रवृत्तेश्च्छ्वोरिति सामान्यसूत्रस्यैव चोक्तश्रुत्यनुगुणस्य प्रवृत्तेर्वकारमात्रस्योठि कृते ॐमिति श्रौतनिर्देशबलेन एत्येधत्यूठ्स्विति वृध्यप्राप्तौ अकारोकारयोराद्गुण इति गुणे च ॐमिति रूपं निष्पन्नं । ऊः ऊम इत्यादौ श्रुतिविरोधाभावेन ज्वरत्वरेत्यादिविशेषशास्त्रस्यैव प्रवृत्तेर्नानिष्टरूपप्रसक्तिश्चेति ध्येयम् । परमार्थतस्तु वकारस्य बहुलग्रहणात्संप्रसारणं व्युत्पाद्यं । तेनाकारोकारमकार इति श्रौतनिर्देश उपपद्यत इति द्रष्टव्यम् । गतिकर्मा गतिरूपक्रियावाची । प्रवेशनकर्मा प्रवेशनरूपक्रियावाची । अनेन गतिप्रवेशनार्थादवतेर्निष्पन्न ॐकार ॐतत्वस्य प्रविष्टत्वस्य ॥१२॥

वा वाचक इत्यत्र सम्मतिरुक्ता भवतीति द्रष्टव्यम् । असौ ॐकारः ॥ बृहेरिति । आतो मनिन् क्वनिपश्चेत्यस्मादुत्तरेणान्येभ्योऽपि दृश्यंत इति सूत्रेण वृध्यर्थबृहेर्मनिन्प्रत्यये दृशिग्रहणसामर्थ्याद्धातोरमागमे ऋकारस्य इकोयणचीति यणादेशे च वृध्यर्थस्य बृहेर्ब्रह्मेति रूपमिति भावः । बृहवृद्धावित्यस्य भौवादिकत्वेन स्तिपा निर्देशे शपि गुणावश्यंभावात् । बृहतेरिति पाठश्चित्यः ॥ तत्संसर्गेति । अवयवार्थसंसर्गसंभावनायां प्रसिद्धमवगमयंति । अन्यथा प्रसिद्धेऽर्थे तत्संभावनाविरहेऽपूर्वमेवार्थमवगमयंतीत्यर्थः ॥ श्रोत्रियञ्छंदोधीत इति । श्रौतियन्निति निपात्यते छंदोधीत इत्यर्थे तदधीत इत्यर्थे छंदःशब्दस्य श्रोत्रभावो घन्प्रत्ययश्च निपातितो भवति । नकारः स्वरार्थ इति सूत्रार्थो द्रष्टव्यः । तत्सूत्रव्याख्यानावसरे छंदोधीत इत्येतस्मिन्वाक्यार्थे श्रोत्रियपदप्रयोग इति वदन्महाभाष्यकारो यौगिकस्य प्रकृतिप्रत्ययसमुदायात्मकस्य शब्दस्य वाक्यरूपत्वमाहेत्यर्थः । यद्यप्यत्र महाभाष्ये वाक्यार्थे पदवचनमित्युक्तं । तथाऽपि तत्रत्यवचनशब्दस्य प्रयोगार्थत्वमित्यभिप्रेत्य वाक्यार्थे पदप्रयोग इत्युक्तमिति ध्येयम् । ननु श्रोत्रियंश्छंदोधीत इत्यत्र यदि छंदःशब्दस्य श्रोत्रभावः घन्प्रत्ययश्च निपात्यते तर्हि कथं छंदस इति रूपं स्यादिति चेत् । तावातिथं ग्रहणमिति लुग्वेत्यतो वा ग्रहणानुवृत्तेश्छंदस इति रूपस्य संभवात् ॥ अशक्यत्वाच्चेति । वाक्यार्थस्य प्रागनुपस्थितत्वेन तस्मिन्वाक्यसंगतिग्रहणस्याशक्यत्वाच्चेत्यर्थः । यद्वा । वाक्यस्य वाक्यत्वेन रूपेण संगतिग्रहणस्याकिंचित्करतया तत्तद्वाक्यत्वेन तत्तद्वाक्यार्थसंगतिग्रहणस्य वक्तव्यत्वात्तस्य च तत्तद्वाक्यव्यक्तीनामानंत्येनाशक्यत्वाच्चेत्यर्थः । (वाक्यशक्तेरभावेन शक्त्यविषयत्वादिति श्रीस्वामिनः)॥ यत्त्विति ।

आप्तेः सर्वकामावाप्तेः । सर्वस्यादिमत्त्वाद्वेत्याद्योंकारस्य यद्व्याख्यानं यच्च नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितमित्यादिब्रह्मशब्दव्याख्यानं तज्जीवादिव्यतिरिक्तवस्तुसाधनाविरोधीति स्फुटमेवेत्याशयवताऽऽचार्येण तद्व्याख्यानांतरं न दूषितमंगीकृतं चेत्यर्थः । एतदुपलक्षणं । जागरितस्थानो वैश्वानरोकारः प्रथमा मात्रा । आप्तेरादिमत्वाद्वा। आप्नोति ह वै सर्वान्कामानादिश्च भवति । स्वाप्नस्थानस्तैजस उकारो द्वितीया मात्रा । उत्कर्षादुभयत्वाद्वेत्यादिश्रुत्यनुसारित्वाच्च तदंगीकृतमिति ध्येयम् ॥ चशब्देनेति ।अनुक्तसमुच्चयार्थेन चशब्देनोतःशब्दोऽपि परतः पररूपत्वानुशासनादिति भावः ॥ अथवेति । ऊयतेरित्यनेन यौवादिकस्य ऊयीतंतुसतान इत्यस्य ग्रहणं । तस्माच्च क्तप्रत्यये श्वीदितो निष्ठायामिति इटःप्रतिषेधे लोपोव्योर्वलीति यलोपे च निष्पन्न ऊतशब्दः । तद्गुण ऊतेति स्थिते आद्गुण इति गुणे तद्गुणोतेति रूपमिति भावः । केचित्तु वेञ् तंतुसंतान इत्यस्य ग्रहणमित्याहुः । तन्न । तथात्वे वयतेरिति निर्देशापत्तेः । ननु ऊयीतंतुसंतान इति धातुपाठेन ऊयतेरर्थांतरवाचित्वात्ततो निष्पन्नस्योतशब्दस्य गतत्वप्रविष्टत्वार्थकत्वानुपपत्तिरित्याशयेन शंकते ॥ नन्विति । परिहरति ॥ अनेकेति ॥ कथं तर्हीति । यद्यूयते रूपमिदं तर्हि तस्य क्तप्रत्यये परतो यलोपे कृते क्ङिति चेति गुणप्रतिषेधादोतत्ववाचीत्यत्र गुणः कथमित्यर्थः ॥ अवतिरूपेति । ओतत्ववाचीत्यत्र गत्याद्यर्थकस्यावते रूपांगीकारादित्यर्थः । यद्यप्यवतेरुदात्तत्वेनैकाच उपदेशेऽनुदात्तादिति इटःप्रतिषेधाभावेनार्धधातुकस्येड्वलादेरिति इडागमे कृतेऽवितेत्यत्र रूपेण भाव्यं । न त्वोतत्वेति रूपं संभवति । तथाऽप्यवतेरौणादिकतप्रत्यये तितुत्रतथसिसुसरकसेषु चेति इट्प्रतिषेधकसूत्रे तेत्यनेन औणादिकतशब्दस्यैव

ग्रहणं नान्यस्येति वृत्तिकारेणोक्ततया तस्येडागमाभावेन तस्मिन्परतो ज्वरत्वरेत्यादिनाऽवतेरुपधावकारस्य चोठि गुणे च कृते
ओतेति रूपं निष्पन्नमिति द्रष्टव्यम् । ननु ज्वरत्वरेत्यत्र काशिकायां क्वौ झलादौ ङ्किति परत इत्युक्तत्वादौणादिकतप्रत्ययस्य
च कित्वटित्वयोरभावादूठोऽप्राप्तिरिति चेन्मैवं । वृत्तिकोशे क्वाचित्कस्य क्ङिद्ग्रहणस्य संपातायातत्वात् । अन्यथा शित
निगमिमसिसच्याविधाञ्क्रुशिभ्यस्तुन्नित्यवतेस्तुन्प्रत्यये ओतुरिति रूपं न स्यात् । तदुक्तं धातुवृत्तौ । ज्वरत्वरेत्यत्र क्वचिद्वृत्ति-
कोशे क्वौ झलादौ कितीति पठ्यते । तत्र ङ्किद्ग्रहणं संपातायातमिति । नन्वोतत्ववाचीत्यत्रावते रूपं तद्गुणौ तताभित्यत्र
तूयते रूपमिति वैचित्र्यं किमर्थमाश्रीयत इत्यत आह ॥ वैचित्र्यं त्विति । ओमिति रूपमवतेरूयतेर्वा निष्पन्नमिति सूचनार्थं
वैचित्र्यमाश्रितमित्यर्थः । ओमिति रूपस्यावतेर्निष्पत्तिप्रकारः प्रागुक्तः । ऊयतेस्तन्निष्पत्तिप्रकारस्तु आङ्वाङ्ूयतेरौणादिकम-
कप्रत्यये लोपोव्योर्वलीति यलोपे बहुलग्रहणादाठऊकारस्य च ह्रस्वत्वे गुणे च ओमिति भवतीति द्रष्टव्यम् । अथवा । ओत-
त्ववाचीत्यत्र ऊयतिरूपांगीकारेऽपि नानुपपत्तिः । तस्य क्तप्रत्यये परतो यकारलोपे आकारोपसर्गपूर्वकत्वेन आद्गुण इति गुणे
सति ओतेति रूपसंभवादित्याशयेनाह ॥ अथवेति । अमुख्यया वृत्त्या यौगिकेति यौगिकशब्दप्रयोगस्यापूर्वमर्थं विना
पर्यवसानाभावेन यौगिकशब्दप्रयोगबलादलौकिकार्थप्रतीतेरानुभाविकत्वेन तत्कल्पनाभावादिति भावः ॥ बहुत्वार्थस्येति ।
भूवहावित्युक्तेः । अदिशदिभूशूविरभ्यः क्रिन्निति भवतेर्निष्पन्नस्य भूरिशब्दस्य बह्वर्थत्वदर्शनाद्भवतेर्बहुत्वार्थत्वं बहुत्वं च
पूर्णत्वरूपं बह्वन्नमित्यादौ बहुशब्दस्य पूर्णत्वे प्रयोगादिति भावः ॥ भवतेरिति । भावयत्युत्पादयतीत्यंतर्भावितण्यर्थस्य भवते-

भुव इति रूपमिति संबंधः । तत्कथमित्यतः कप्रत्यय इत्युक्तं । तथा च भवतेः कप्रत्यये सति तस्य कित्त्वेन गुणाभावाद-
कारस्याचिश्नुधात्वित्यादिना उवङादेशे भुव इति रूपं सिध्यतीति भावः ॥ चकाराविति । भावनाच्चैव सुत्वाच्चेति चकारौ
भुवःस्वरित्यनयोर्व्याहृत्योर्भूतिवरत्वानंतसुखरूपप्रवृत्तिनिमित्तांतरसमुच्चये वर्तत इत्यर्थः । न तु सर्वासां व्याहृतीनां निमित्तां-
तरसमुच्चय इत्यर्थः । सम्मतित्वेनोदाहृतपूर्ण इत्यादिऋग्भाष्यवाक्ये भूरिति व्याहृतेरत्रोक्तभूशब्दितपूर्णत्वातिरिक्तनिमित्तकथ-
नाभावात् । अत एव द्वितीयतृतीयव्याहृत्योरेव निमित्तांतरसमुच्चयमभिप्रेत्यानुव्याख्याने भावनाच्चैव सुत्वाच्चेत्यत्रैव चका-
रावुपात्तौ । न तु भूमत इत्यत्रेति द्रष्टव्यम् ॥ भर्गशब्दार्थ इतीति । ऋग्भाष्यटीकायां भादीप्तौ रमुक्रिडायां गमृगताविति
धातुसमुदायादसुन्निति भर्गशब्दस्य व्युत्पादितत्वेऽपि भर्गनामकसविता प्रतिपाद्यो दृश्यत इति पूर्वपक्षिणोक्तत्वात्तदनुसारेण
भर्गशब्दोपादानं ॥ भरणगमनेति । भृञो गमेश्च डप्रत्यये भर्गेति रूपमिति भावः ॥ जगदिति । सवितृशब्दस्य षूञ्प्राणि-
प्रसव इत्यस्मादुत्पन्नत्वेन जगत्प्रसवहेतुत्वं तच्छब्दप्रवृत्तिनिमित्तमिति भावः । तदुक्तमन्यत्र । गुणैस्ततः प्रसविता वरणीयो
गुणोन्नत इति ॥ तद्धेत इति । वेदमाता च गायत्री द्विगुणा द्वादशाक्षरात् । चतुर्विंशन्मूर्तयोऽस्याः कथिता वर्णवेदता इति
पूर्ववाक्यप्रकृतगायत्रीं तच्छब्देन परामृश्य सा गायत्री भिद्यते व्याख्यायतेऽनेनेति व्युत्पत्त्या तद्धेदशब्दो गायत्रीव्याख्यानात्मकत्वं
पुरुषसूक्तस्य वक्तीति भावः ॥ नैनेन किंचनेति। श्रुतावेनेन परमात्मना किंचिदपि वस्त्वनावृतं नैनेन किंचिदप्यसंवृतं नेति नारा-
यणस्य सर्ववस्तुष्वंतर्व्याप्तिर्बहिर्व्याप्ती उच्येते ॥ अन्यथेति । पुरुषसूक्तस्य नारायणविषयत्वाभावे उदाहृतागमसिद्धनारायणप्रति-

पादकगायत्रीव्याख्यानात्मकत्वरूपयुक्तिविरोधः । व्याख्यानस्य व्याख्येयसमानविषयत्वनियमादित्यर्थः ॥ वेदा इति । व्याख्या-
नव्याख्येयभावेन पुरुषसूक्तं गच्छंतीति पुरुषसूक्तगा इत्यनेन सर्ववेदानां पुरुषसूक्तव्याख्यानत्वोक्त्या तदर्थताया अवगतत्वादिति
भावः । ननु तद्व्याख्येयोंकारार्थत्वात्तत्परोंकारव्याख्यानत्वादिति हेतुद्वयमसिद्धं । सर्ववेदानामोंकारस्य च व्याख्यानव्याख्ये-
यभावे मानाभावादित्यत आह ॥ तद्यथेति । सर्वाणि पर्णानि यथा शंकुना संबद्धान्येवमोंकारेण सर्वा वाक् संबद्धेत्यर्थप्रति-
पादिकयाऽनया श्रुत्या सर्ववाचामोंकारस्य च संबंधांतराभावेन व्याख्यानव्याख्येयभावरूपसंबंधसिद्धेर्हेतुद्वयासिद्धिर्नेत्यर्थः ।
वाक्यांतरबलेन प्रणवार्था व्याहृतय इत्याद्युदाहृतवाक्यांतरबलेन ॥ किं वेदेति । परंपरयोंकारव्याख्यानत्वेन वेदानामोंकारार्थ-
भगवद्विषयत्वानुमानेन किमित्यर्थः । साकांक्षस्याकांक्षाशामकपदरहितस्य ॥ न हीति । इतिकर्तव्यता एवं प्रतिबंधनिरासो-
पक्षीणा न हि भवतीत्यर्थः । कतिपयगुणं ज्ञानेच्छाप्रयत्नसंख्यापरिमाणपृथक्त्वसंयोविभागगुणकं। विग्रहवंतं जडदेहवंतं
॥ न पुनरिति । धर्माय जिज्ञासा धर्मजिज्ञासेति यथा चतुर्थीसमासस्तथा ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासोऽत्र
न भवतीत्यर्थः । यद्यपि धर्मस्य जिज्ञासा धर्मजिज्ञासेति षष्ठीसमास एव तत्र तत्रोक्तस्तथाऽप्यथातो धर्मजिज्ञासासूत्रमाद्यमिदं
कृतं । धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनमित्यत्र वार्तिके धर्माख्यं विषयं धर्माख्यं प्रयोजनं च वक्तुमथातो
धर्मजिज्ञासेत्याद्यं सूत्रं कृतमित्युक्तत्वाज्ज्ञातरूपस्य धर्मस्य मीमांसाविषयत्वं ज्ञातस्य तु प्रयोजनतेत्याश्रयणीयतया प्रयोजनत्व-
ख्यापनार्थं धर्माय जिज्ञासा धर्मजिज्ञासेति चतुर्थीसमासोऽपि तत्र विवक्षित इति कैश्चिदाश्रितत्वादेवमुक्तमिति द्रष्टव्यम् ।

ब्रह्मणे जिज्ञासा ब्रह्मजिज्ञासेति चतुर्थीसमासः कस्मान्न भवतीत्यत आह ॥ तादर्थ्यसमास इति । चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरित्यत्र तादर्थ्यसमासे प्रकृतिग्रहणं कर्तव्यम् । चतुर्थ्यन्ता विकृतिस्तदर्थया प्रकृत्या समस्यत इति वदता वार्तिककृता प्रकृतिविकारभावे सत्येव चतुर्थीतदर्थसमासो नान्यथेति नियतत्वादित्यर्थः ॥ तथैवेति । यूपाय दारु यूपदार्वित्युदाहरणं । तथैव प्रकृतिविकारभावापन्नत्वादिति भावः । नन्वश्वाय घासोऽश्वघास इत्युपादानोपादेयभावेऽपि चतुर्थीसमासदर्शनाद्वार्तिककृता कृतो नियमः कथमुपपद्यत इत्यत आह ॥ प्रकृतीति । आदिशब्देन श्वश्रूसुरमित्यादेर्ग्रहणम् । तथा चाश्वघासादिशब्दानामश्वस्य घासोऽश्वघासः श्वश्र्वाः सुराः श्वश्रूसुरमित्यादिरूपेण षष्ठीसमासत्वान्नोक्तनियमानुपपत्तिरिति भावः ॥ न चेति । न चात्र ब्रह्मजिज्ञासयोः प्रकृतिविकारभावोऽस्ति येन चतुर्थीसमास उपपन्नः स्यादिति भावः । वस्तुतस्तु धर्माय जिज्ञासेति चतुर्थीसमासो यथा न भवति तथा ब्रह्मणे जिज्ञासेति चतुर्थीसमासोऽत्र न भवतीत्येतदर्थपरत्वेन न पुनर्धर्माय जिज्ञासेतिवच्चतुर्थीसमास इति वाक्यं व्याख्यायोभयत्रापि चतुर्थीसमासः कस्मान्न भवतीति शंकापरिहारार्थत्वेनोत्तरं वाक्यं व्याख्येयम् । अन्यत्पूर्वोक्तरीत्या सुगमं । न चात्र प्रकृतिविकारभावोऽस्तीति वाक्यं तु धर्मजिज्ञासयोर्ब्रह्मजिज्ञासयोश्च न हि प्रकृतिविकारभावोऽस्ति । येनोभयत्र चतुर्थीसमास उपपन्नः स्यादित्यर्थपरत्वेन व्याख्यातव्यम् । न च वाच्यं तादर्थ्यसमासे प्रकृतिग्रहणं कर्तव्यमिति वार्तिकस्य कार्यकारणभावमात्रपरत्वाद्धर्मजिज्ञासया धर्मतत्त्वज्ञाने सति धर्मस्यानुष्ठीयमानतया धर्मजिज्ञासयोः कार्यकारणभावमात्रस्य सत्वाद्धर्माय जिज्ञासेति चतुर्थीसभास उपपन्न इति । अत्रहननायोलूखल-

मित्यादौ कार्यकारणभावमात्रे सत्यपि चतुर्थीसमासानुपपत्तेः । ननु विचारापरपर्यायधर्मजिज्ञासया धर्मतत्त्वनिश्चये सति धर्मस्य क्रियमाणतया धर्मजिज्ञासाया धर्मार्थत्वाच्चतुर्थी तदर्थेत्यादिना धर्मजिज्ञासेत्यत्र चतुर्थीसमासप्रसक्तावपि ब्रह्मजिज्ञासेत्यत्र जिज्ञासाया ब्रह्मार्थत्वाभावेन चतुर्थीसमासाप्रसक्तेर्निषेधानुपपत्तिरिति चेन्न । ब्रह्मजिज्ञासया ब्रह्मज्ञाने सति ब्रह्मणः प्रसादाख्यव्यापारविशिष्टत्वेन क्रियमाणतयेहापि जिज्ञासाया ब्रह्मार्थत्वेन चतुर्थीसमासप्रसक्तौ तन्निषेधोपपत्तेः । प्रसादरूपव्यापारविशिष्टतया भगवतः क्रियमाणत्वं च सिद्धं साधनं च भगवानिति मुमुक्षुणा स व्यापारीकरणीयः । व्यापारश्च प्रसन्नतैवेत्याकर एव स्फुटं । ननु विशिष्टवेषेण भगवतः साध्यत्वेऽपि न तादर्थ्यं जिज्ञासाया वक्तुं शक्यं । स्वर्गादिस्वरूपसाधक एव यागादौ स्वर्गाद्यर्थत्वदर्शनादिति चेन्न । व्रीहीन्प्रोक्षतीत्यत्र स्वरूपेण व्रीहीणां प्रोक्षणसाध्यत्वेऽपि प्रोक्षणाहितसंस्कारविशिष्टवेषेण तेषां तत्साध्यतया प्रोक्षणस्य व्रीह्यर्थत्वदर्शनेनोक्तनियमाभावात्प्रोक्षणेन व्रीहीन्भावयेदिति खल्वत्र वचनव्यक्तिः। तया च प्रोक्षणस्य व्रीह्यर्थत्वं स्फुटं प्रतीयत इति न किंचिदनुपपन्नं ॥ कृत्यानामिति । तयोरेव कृत्यक्तखलर्था इति सकर्मकधातोरुत्पन्नानां कृत्यानां कर्मणि स्मरणादित्यर्थः । ज्ञाधातोः सनि सन्प्रयुक्तद्वित्वादिके सन्नंतादचोयदिति यत्प्रत्यये अतो लोप इत्यकारलोपे च निष्पन्नो जिज्ञास्यशब्दः ।तत्र यत्प्रत्ययः कृत्याः प्राङ्ण्वुल इति कृत्यसंज्ञ इति भावः। अनुत्पन्न एवार्धधातुके बुद्धिस्थे अतो लोपे कृते संप्रत्ययं हलन्त इति ण्यत्स्यात्। अज्ग्रहणात्तु भूतपूर्वमजंतत्वमाश्रित्य यद्भवतीति विशेषः पदमंजर्युक्तो द्रष्टव्यः॥ अन्यथेति। कर्मणि षष्ठीपरिग्रहस्यानभिप्रेतत्वे जिज्ञासाऽस्य विधीयत इति वक्तुं शक्यत्वादाचार्यस्तथैव निर्देशं कुर्यादित्यर्थः॥ तदे-

वेति। कर्मैव षष्ठ्या निर्देष्टव्यं न संबंधीत्यर्थः ॥ एवं सतीति । संबंधिसामान्योक्तौ ब्रह्मसंबंधिनी जिज्ञासा ब्रह्मजिज्ञासेत्यर्थलाभेन ब्रह्मलक्षणजिज्ञासा ब्रह्मप्रमाणजिज्ञासा ब्रह्मज्ञानसाधनजिज्ञासा ब्रह्मज्ञानफलजिज्ञासा ब्रह्मस्वरूपजिज्ञासेत्येवं सर्वाऽपि जिज्ञासा साक्षात्परंपरया वा ब्रह्मसंबंधिनीति ब्रह्मजिज्ञासा कर्तव्येत्यनेन प्रतिज्ञाता स्यात् । कर्मोक्तौ तु ब्रह्मकर्मकजिज्ञासैव प्रतिज्ञाता स्यान्न लक्षणादिजिज्ञासेत्याशयः । ब्रह्मकर्मकजिज्ञासामात्रप्रतिज्ञानेऽपि तस्या लक्षणादिजिज्ञासां विनायोगेन पृथग्लक्षणादिजिज्ञासाया अनुक्तावपि लाभान्न कोऽपि दोष इत्यभिप्रेत्य परिहरति ॥ नेति ॥ अन्यथेति । प्राधान्येन ब्रह्मकर्मकजिज्ञासायां प्रतिज्ञायमानायामार्थिकत्वेन लक्षणादिजिज्ञासालाभ इत्यनंगीकृत्य ब्रह्मजिज्ञासातुल्यतया लक्षणादिजिज्ञासाया अपि प्रतिज्ञांगीकार इत्यर्थः ॥ निर्विषयेति । निर्विषयत्वाज्जिज्ञासा न कर्तव्येति शंकानिरासार्थं प्रयुक्तं लुप्तषष्ठ्यंतं ब्रह्मपदं कर्मप्रतिपादकमित्येवांगीकर्तुमुचितं । न तु संबंधिसामान्यप्रतिपादकमित्यंगीकर्तुमित्यर्थः ॥ श्रुत्यर्थेति । तद्विजिज्ञासस्व तद्ब्रह्मेति विषयवाक्ये द्वितीयांतेन ब्रह्मशब्देन ब्रह्मणः कर्मत्वं प्रतीयते । तथा च सूत्रे कर्मणि परिग्रहे श्रुतिसूत्रयोरर्थानुगमो भवति । शेषषष्ठीपरिग्रहे तु स न स्यादिति भावः । ननु कर्मणि षष्ठीपरिग्रहे ब्रह्मजिज्ञासेति समासोऽनुपपन्नः । का पुनः षष्ठी प्रतिपदविधानत्वात्प्रतिपदविधाना शेषलक्षणां वर्जयित्वेति महाभाष्योक्त्या कर्तृकर्मणोः कृतीति कृद्योगे विहितायाः कर्मषष्ठ्याः प्रतिपदविधानत्वात्प्रतिपदविधानायाश्च षष्ठ्याः प्रतिपदविधाना षष्ठी न समस्यत इति समासप्रतिषेधात् । शेषलक्षणषष्ठीपरिग्रहे तु नेयमनुपपत्तिरित्याशयेन शंकते ॥ नन्विति ॥ कृद्योगेति । कृच्छब्दोपादानेन विहिता षष्ठी समस्यत इति प्रतिपदविधाना

षष्ठी न समस्यत इति निषेधापवादेन प्रतिप्रसवादित्यर्थः । तथा च ब्रह्मजिज्ञासेत्यत्र जिज्ञासाशब्दस्याप्रत्ययादिति कृत्संज्ञकाकारप्रत्ययांतत्वेन कृद्योगनिमित्तत्वाद्ब्रह्मण इति षष्ठ्याः समासोपपत्तिरिति भावः । नन्वेवं प्रतिपदविधाना षष्ठी न समस्यत इत्यस्य को विषय इति चेन्न । सर्पिषो ज्ञानमित्यादेस्तद्विषयत्वात् । तत्र हि ज्ञो विदर्थस्य करण इति विहिता षष्ठी प्रतिपदविधानेति न किंचिदवद्यं ॥ अथवेति । जिज्ञासाऽस्य विधीयत इत्युक्ते ब्रह्मणो विधीयमानजिज्ञासायाः कर्मत्वेन विधिकोटिनिविष्टतयाऽप्राधान्यशंका स्यात् । तन्निवारणाय जिज्ञास्य इति ब्रह्मणो ज्ञातुमेष्टव्यत्वोक्त्या तज्ज्ञानस्योद्देश्यतालाभादुद्देश्यकोटिनिविष्टत्वेन कर्मभूतब्रह्मणः प्राधान्यं सूचितमित्यर्थः । एतदेव दर्शयति ॥ ज्ञानाविधाविति । उपलक्षणमेतत् । यद्यत्र ब्रह्मज्ञानं तत्कर्मकजिज्ञासा वा विधीयेत । तर्हि विधेयकोटिनिविष्टत्वेन ब्रह्मणोऽप्राधान्यं स्यात् । ब्रह्मज्ञानोद्देशेन न्यायानुसंधानरूपविचारविधौ कुतोऽप्राधान्यं ब्रह्मणः । उद्देश्यकोटिनिविष्टत्वेन प्राधान्यस्यैव लाभादिति भावः । यद्यपि ब्रह्मकर्मकजिज्ञासाविधावित्येव वक्तव्यं । तथाऽपि ज्ञानविधावित्येतद्वचनं यन्मत इष्यमाणं तर्करूपं ब्रह्मज्ञानं विधेयं । तन्मते ब्रह्मणोऽप्राधान्यं स्यादिति दूषयितुं । नन्वस्तिभवत्योः सर्वत्राध्याहार इति न्यायेन भवतीत्यादिपदं स्वत एव प्राप्तं । किं कर्तव्यपदाध्याहारेणेति शंकते ॥ नन्विति ॥ तथा सतीति । उत्सर्गप्राप्तभवतिपदाध्याहारस्य सूत्रस्यानुवादत्वं स्यात् । न विधायकत्वं । तथा चेदं सूत्रं प्रेक्षावत्प्रवृत्त्यनुपयुक्तं विषयवाक्याननुगुणं च स्यादिति भावः । नन्वथातो धर्मजिज्ञासेत्यादौ वेदार्थरूपधर्मस्य विचारितत्वेऽपि न ब्रह्मविचारस्तत्र वृत्तः । अतो न पूर्वतंत्रेण तस्य

शास्त्रस्य गतार्थत्वमित्यत आह ॥ ब्रह्मेति । चोदनालक्षणोऽर्थो धर्म इति सूत्रे चोदनालक्षणं प्रमाणं यस्येति चोदनाप्रमाणकस्य धर्मस्वरूपत्वोक्तेर्ब्रह्मज्ञानस्याप्यात्मन्येवात्मानं पश्येदित्यादिचोदनाप्रमाणकत्वेन धर्मस्वरूपत्वाद्ब्रह्मज्ञानरूपधर्मविचारस्य तत्र वृत्तस्यावश्यंभावेन तद्विशेषणब्रह्मविचारोऽपि तत्रैव वृत्त इति भावः । ननूक्तरीत्या ब्रह्मविचारस्य पूर्वतंत्रे वृत्तत्वेऽपि सत्याम-भ्यधिकाशंकायां तन्निरासायोत्तरतंत्रारंभोऽस्त्वित्यत आह ॥ अभ्यधिकेति ॥ इत्यादीति । स एव भर्गशब्दार्थ इत्यादिसर्व-वेदार्थ इत्यंतमुक्तमित्यर्थः ॥ स एवेति । स एव वेदार्थ इत्यवधारणेन प्राधान्येन वेदार्थत्वं ब्रह्मण एव नान्यस्येत्येतदर्थकेन न कार्यशेषतया ब्रह्म वेदार्थ इति लभ्यते । अनेन स्वप्राधान्येन वेदार्थब्रह्मविचारस्येतःपूर्वं पूर्वमीमांसायामवृत्तत्वेऽपि तादृग्वि-चारस्य तत्र वृत्तत्वमंगीकृत्याभ्यधिकाशंकया पृथक् ब्रह्मजिज्ञासारंभ इत्याद्यं समाधानं निरस्तमिति संबंधः ॥ सर्वेतीति ॥ सर्ववेदार्थ इति । भगवतः सर्ववेदार्थत्वोक्त्या कार्यनिष्ठवेदभागस्य पूर्वतंत्रे विचारितत्वेऽपि तत्राविचारितस्य सिद्धब्रह्मनि-ष्ठवेदांतभागस्येह विचार्यमाणत्वान्न तेनास्य गतार्थत्वमिति द्वितीयं च समाधानं निरस्तमित्यर्थः ॥ तदिति । प्राधान्येन भगवतः सर्ववेदार्थत्वोपपादनाय स एव भर्गशब्दार्थ इत्यादिपूर्ववाक्यमित्यर्थः ॥ साध्येति । अस्तु प्राधान्येन भगवतः सर्ववेदार्थत्वं ततः किमित्याकांक्षायां स एव सर्ववेदार्थ इत्युक्तस्य प्राधान्येन सर्ववेदार्थत्वरूपहेतोर्जिज्ञास्य इति जिज्ञास्यत्वरू-पसाध्यं निर्दिश्यत इति भावः । एतद्भगवत्सर्ववेदार्थत्वं ॥ निमित्तेनेति । तमेवं विद्वानिति वेदनरूपनिमित्तवाचिना शब्देन तत्साध्यप्रसादस्योपलक्षणादित्यर्थः । ननु तमेवं विद्वानिति श्रुतौ वेदनमुक्त्वा तत्साध्यप्रसादः कस्मादुपलक्ष्यते साक्षादेवो-

च्यतामित्यत आह ॥ मुमुक्ष्विति । साक्षात्प्रसादशब्देनैव तदुक्तौ मुमुक्षोरभिमतफलसाधनमयं प्रसाद इति निर्धारयितुं न शक्यते । तत्कर्म हरितोषं यत् । एवं ज्ञाते तु भगवाननादिः पुरुषोत्तम इति प्रसीदत्यच्युत इत्यादिना प्रसादस्य नानाविधत्वावगमाद्वेदनरूपनिमित्तेन तन्निमित्तकप्रसादोपलक्षणे वेदनजन्यप्रसादो मुमुक्षोरभिमतफलसाधनमित्यवधारयितुं शक्यत इत्युपलक्षितः प्रसादो न साक्षादुक्त इत्याशयः । ननु परमानुग्रहादेव मुच्यत इति यदुक्तं तदनुपपन्नं । अपामसोममममृता अभूमेत्यादौ सोमपानादिनाऽपि मुक्तेरुक्तत्वादित्यत आह ॥ अपामेति ॥ ज्ञानी प्रियतममिति । ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति मामिति भगवद्वाक्यं भागवतस्थं । ननु परमप्रसादश्च तज्ज्ञानादेवेत्ययुक्तं । तत्कर्म हरितोषं यदित्यादिवचनेन कर्मादेरपि तद्धेतुत्वावगमादित्यत आह ॥ कर्मेति । नन्वीश्वरज्ञानं च तज्जिज्ञासयैवेत्यनुपपन्नं । कर्मणा ज्ञानमातनोतीत्यादिवाक्येन कर्मणाऽपि ज्ञानसाधनत्वावगमादित्यत आह ॥ कर्मणां त्विति । कर्मणां ज्ञानोत्पत्तावंगत्वमेव न प्रधानसाधनत्वमित्येतदभिप्रायं प्रागुक्तं जिज्ञासयैवेत्यवधारणमिति भावः । अत्र च प्रमाणं । श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च । साधनं ज्ञानसंपत्तौ प्राधानं नान्यदिष्यत इत्यादि द्रष्टव्यम् । ननु प्रसादाख्यव्यापारवतो भगवत एव प्राधान्येन मोचकत्वाद्यस्य प्रसादादिति श्रुतौ प्रसादाख्यव्यापारप्राधान्योक्तिः कथमित्यत आह ॥ व्यापारेति ॥ स्वात्मेति । स्वात्मन्यात्मीयसमस्तवस्तुषु च यः स्नेहस्ततोऽनेकगुणाधिक इत्यर्थः ॥ यामिति । यं प्रेमप्रवाहमधिकृत्य यद्वृतं विषयीकृत्येति यावत् । यत्र यस्मिन्परमात्मनि दृष्टे सत्यन्यत्किंचिदपि न पश्यतीत्यर्थप्रतिपादकश्रुतयो यस्यां विषयलक्षणायां भूतानि जाग्रति सा परमात्मानं पश्यतो मुनेर्निशा तत्र

ज्ञानाभावादित्यर्थप्रतिपादकस्मृतयश्च प्रवृत्ता इत्यर्थः ॥ अधिकारीति । मुमुक्षारूपाधिकारानंतर्यप्रतिपादकाथशब्देनाधिकारवि-
शेषणमुमुक्षांतर्गततया प्रकृतो मोक्षः प्रयोजनवत्त्वेन संबध्यत इत्यर्थः ॥ इच्छाया इति । पुरुषकृतिसाध्यस्यैव यागादेर्विधेयत्वदर्श-
नादिच्छायाश्च विषयसौंदर्यलभ्यत्वेन तदसाध्यतया विधेयत्वायोगादिति भावः ॥ अत एवेति । ज्ञानस्य प्रमाणपरतंत्रत्वेन पुरुष-
कृत्यसाध्यत्वादेवेत्यर्थः ॥ उपलक्षणेति । यद्यपि ज्ञानवाचिनो ज्ञाधातोर्जिज्ञासेत्यत्र सत्वात्तेनैव ज्ञानोपस्थितिसंभवान्न लक्षणा
युक्ता । तथाऽपि ज्ञानस्य सन्प्रत्ययवाच्येच्छाविशेषणत्वेन धातुनोपस्थापितस्य कर्तव्यपदार्थान्वयायोगात्स्वातंत्र्येण तस्योपस्थित्यर्थं
जिज्ञासापदस्य तत्र लक्षणेति ध्येयम् ॥ ज्ञानेच्छेति । ज्ञानेच्छानंतरं विचारः । विचारानंतरं च ज्ञानमिति प्रकृतिप्रत्ययार्थ-
योर्ज्ञानेच्छयोर्मध्यवर्ती विचारो जिज्ञासापदेन लक्ष्यत इत्यर्थः । ज्ञानेच्छांतर्णीत इत्यनेन जिज्ञासापदेन विचारलक्षणायां बीजभू-
तशक्यसंबंधो दर्शित इति द्रष्टव्यं । यद्यपि स्वस्वार्थशक्तप्रकृतिप्रत्ययसमुदायात्मकतया जिज्ञासेत्येतन्न पदं किंतु वाक्यमिति
तस्य लक्षकत्वायोगः । तथाऽपि जिज्ञासेत्यत्र यत्पदं प्रकृतिरूपं प्रत्ययरूपं वा तेन विचारो लक्ष्यत इत्यत्र तात्पर्यं ॥ विचार-
स्येति । वाचकविचारशब्दस्यैव प्रयोगेऽथशब्दोपात्तमोक्षरूपप्रयोजनं प्रति विचारस्य ज्ञानद्वारा साधनत्वं न लभ्यते । ज्ञाने
च्छांतर्णीतविचारलक्षकजिज्ञासाप्रदप्रयागे तु ज्ञानद्वारैव विचारस्य मोक्षसाधनत्वं लभ्यत इति भावः ॥ अन्यथेति । विचारस्य
ज्ञानद्वारा मोक्षहेतुत्वज्ञापकलाक्षणिकपदप्रयोगाभावे विचारमोक्षयोः साक्षादेव साध्यसाधनभावो वाक्यार्थः स्यात् तत्र चान्वये
योग्यताविरहेणान्वयो न स्यादित्यर्थः ॥ यदि चेति । मीमांसाशब्दवज्जिज्ञासाशब्दस्य विचारवाचकत्वमेव यदा भवति ।

तदा लाक्षणिकशब्दप्रयोगाभावाद्विचारस्य ज्ञानद्वारा मोक्षहेतुत्वं न ज्ञापितं स्यादिति चोद्याभिप्रायः । जिज्ञासाशब्दस्य विचार-
वाचकत्वं च मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्येत्यत्र मानेर्जिज्ञासायामित्यर्थनिर्देशकेष्टिबलात्सिद्धं । न हि क्वाप्यवाचक-
शब्देनार्थनिर्देशोऽस्तीति भावः । मीमांसाशब्दवज्जिज्ञासाशब्दस्य विचारवाचकत्वेऽपि विचारे सति विचार्यार्थतत्त्वज्ञानं
तदभावे तदभाव इत्यन्वयव्यतिरेकदर्शनेन जिज्ञासाशब्दितविचारस्य ज्ञानसाधनताज्ञापने ज्ञानद्वारैव मोक्षसाधनता लभ्यत
इत्यभिप्रेत्य परिहरति ॥ तथाऽपीति ॥ तदिति । शरीराद्यनुकूले रागो भवति तत्प्रतिकूले द्वेषश्च भवतीत्यर्थः । आचिनुते
कुरुते । आत्मतत्त्वज्ञानात्स्वेतरविविक्तात्मतत्त्वज्ञानात् ॥ जीव इति । पूर्वोक्तानामभिमानिजीव इत्युच्यत इत्यर्थः
॥ कर्तृत्वेति । कर्तृत्वभोक्तृत्वयोः स्वातंत्र्यमित्यर्थः । कारकफलस्वाम्यं कारकफलं प्रति स्वामित्वं ॥ अनादेरिति ।
प्रकृतिबंधो न निवर्ततेऽनादित्वादात्मवदित्यनुमानविरुद्धत्वादनादेः प्रकृतिबंधस्य निवृत्तिरंगीकर्तुं न शक्यत इति भावः ।
निमित्तं प्रयोजकं । विरोधिसन्निपातासन्निपातौ निवर्तकसद्भावासद्भावौ ॥ परमाण्विति । पीलुपाकप्रक्रियापक्षे परमाणुश्याम-
ता पाकेन निवर्तत इति भावः ॥ अविवेक इति । प्रकृतिपुरुषयोर्भेदाग्रहस्तद्भेदग्रहेण निवर्तत इत्यर्थः । यद्यपि भेदाग्रहरूपा-
विवेकनिवृत्तिरूपत्वाद्विवेकस्य विवेकेनाविवेको निवर्तत इत्यविवेकस्य विवेकजन्यनिवृत्तिप्रतियोगितत्वोक्तिरनुपपन्ना तथाऽपि
विवेकशब्दो विवेचकपर इति वा प्रागभावनिवृत्तिः प्रतियोग्यतिरिक्तेति वा समाधानमत्र द्रष्टव्यम् ॥ स्वोपादानेति ।
स्वोपादानगतविभक्तकपालत्वाद्यवस्थाया घटादिविनाशरूपत्वदर्शनादिति भावः । स्वाश्रयगतोत्तरावस्थैव विनाशशब्दार्थः ।

न तु स्वोपादानगतोत्तरावस्था। तत्र स्वोपादानत्वस्य स्वाश्रयविशेष्यत्वरूपतया गौरवात् । एवंविधश्च विनाशोऽनादेरज्ञानस्यापि स्वाश्रयत्वात्संभवतीत्याशयेन परिहरति ॥ नेति ।एतावत्त्वाद्विनाशस्येति शेषः ॥ ज्ञानेति ।ज्ञानेनाज्ञानं निवर्तत इति विशेषव्याप्तिर्बलवतीत्युक्तमित्यर्थः। एवं च बलीयस्या विशेषव्याप्त्याऽज्ञानस्य निवृत्तिनिर्णय उपपद्यत इति भावः ॥ साधनेति। यत्र यत्रानादिरूपं साधनं तत्र तत्र निवर्तकाभावस्य सत्वेन साधनव्यापकत्वादित्यर्थः। यद्यपि प्रागभावेऽनादित्वस्य सत्वेऽपि निवर्तकाभावस्यासत्वान्न साधनव्यापकत्वं । तथाऽपि वक्ष्यमाणरीत्याऽनादित्वरूपसाधनस्य भावत्वविशेषितत्वेनाविशेषितस्य च तस्य प्रागभावे सत्वादुपाधिमत्यात्मादावेव सत्वात्साधनव्यापकत्वमेवेति ध्येयम् । संतानमभ्युपयंतीति संबंधः । तथा च वासनारूपसंतानिव्यतिरिक्तसंतानाभावान्न तत्र व्यभिचारोद्भावनावकाश इति भावः ॥ परमाण्वित्ति । परमाणुपाकस्यायं पाकः प्रथम इतीदं प्राथम्यं न हि नैयायिकसिद्धांतः किं तु तेजःसंयोगरूपः पाकः प्रवाहतः सदा जायत इत्येव । अतः पाकजत्वेन परमाणुश्यामताऽपि सादिरेवेति भावः । अज्ञानं ज्ञाननिवर्त्यं सदसद्विलक्षणत्वादिति प्रतिपक्षोद्भावनस्याभिप्रेतत्वान्न प्रकृतानुपयोग इति शंकते ॥ प्रतिपक्ष इति ॥ परस्येति । परमतेऽज्ञानस्य सत्वेन सदसद्विलक्षणत्वहेतोः पक्षेऽसिद्धेर्हेतोः क्वाप्यप्रसिध्या यत्सदसद्विलक्षणं तज्ज्ञाननिवर्त्यमिति व्याप्तेरभावाच्चेत्यर्थः ॥ विशेषणेति । अज्ञानं न निवर्तते भावत्वे सत्यनादित्वादित्यत्राज्ञानस्य भावाभावविलक्षणत्वरूपानिर्वचनीयत्वोपन्यासेन पक्षे भावत्वरूपविशेषणासिद्धिरुच्यत इति भावः ॥ तदेति । सद्वैलक्षण्यात्प्रागभाववदज्ञानस्य निवृत्तिः किं न स्यादित्यत्र यदि सद्वैलक्षण्यं भावविलक्षणत्वं विवक्षितं तर्ह्यभा-

वविलक्षणस्य भावत्वनियमाद्भावाविलक्षणत्वेनांगीकृते ज्ञाने भावविलक्षणत्वस्य विरोधादसिद्धिप्रसंग इत्यर्थः ॥ अत्यंताभाव इति । तत्र भाववैलक्षण्यरूपहेतोः सत्वान्निवृत्तिरूपसाध्यस्य चासत्वाद्व्यभिचार इत्यर्थः । नन्वत्यंताभावस्यापि निवृत्तेः साध्यमानत्वान्न तत्र व्यभिचार इत्यत आह ॥ तस्येति ॥ निवृत्ताविति । न हि निवृत्तेरपि निवृत्तिः साधयितुं शक्या । प्रतियोग्युन्मज्जनापातादिति भावः ॥ आत्मनीति । आत्मनो निर्धर्मकत्वेन तत्र भावत्वाभावाद्भावत्वानाधिकरणत्वलक्षणभाववैलक्षण्यरूपं साधनमास्ति । निवृत्तिरूपसाध्यं तु नेत्यनैकांत्यमित्यर्थः ॥ अनादित्वरहितमिति । अज्ञानमिति शेषः । ननु सामान्यविशेषभाव एव संकोचे नियामक इत्यत आह ॥ सामान्येति । सामन्यविशेषभावं नियामकमुपादाय यदि विशेषव्याप्त्या सामान्यव्याप्तेः संकोच इष्यते तर्हि यः पर्वतो निरग्निक इति विशेषव्याप्त्या यो धूमवान्सोऽग्निमानिति सामान्यव्याप्तेः पर्वतव्यतिरिक्तो यो धूमवान्सोऽग्निमानिति संकोचः स्यादित्युक्तप्रायमित्यर्थः । सामान्यविशेषभावकथनस्य प्रकारांतरेणोपयोगं शंकते ॥ अस्त्विति ॥ अत्रेति । व्याप्तिपक्षधर्मतोपेतत्वमात्रेणाज्ञानत्वस्य प्रतिपक्षाभावे संभवति अज्ञानं ज्ञाननिवर्त्यमिति विशेषव्याप्तिः । अनादिर्भावो न निवर्तत इति सामान्यव्याप्तिरिति सामान्यविशेषभावस्य तत्रानुपयोगात्कथनं व्यर्थमिति भावः ॥ साधनेति । अनादिभावत्वघटिताज्ञानत्वरूपसाधनस्य दृष्टांतीकृते ज्ञानाभावे सत्वात्तस्य तद्वैकल्यमिति भावः । ननु पक्षदृष्टांतयोरनुगतस्याज्ञानत्वस्याभावेऽप्यज्ञानशब्दसाम्यमात्रेण दृष्टांतदार्ष्टांतिकभावः किं न स्यादित्यत आह ॥ न हीति ॥ कथमिति । शुक्तिकाज्ञानं भावरूपं सादीति पक्षे सादिशुक्तिकाज्ञानसाधारणाज्ञानत्वपुरस्कारेण

प्रवृत्ता अज्ञानं ज्ञाननिवर्त्यमिति व्याप्तिरनादिर्भावो न निवर्तत इति व्याप्त्यपेक्षया कथं विशेषव्याप्तिः स्यादित्यर्थः ॥ द्वितीय इति । शुक्तिकाज्ञानस्यानादिभावत्वे पक्षवत्तत्रापि ज्ञाननिवर्त्यत्वसंदेहात्पक्षतुल्यं तदित्यर्थः । संसारकारणमज्ञानं ज्ञाननिवर्त्यमज्ञानत्वादित्यत्राज्ञानत्वं ज्ञानान्यत्वं वा ज्ञानविरोधित्वं वा ज्ञानाभावत्वं वा पारिभाषिकं किंचिद्वा । आद्येऽपि ज्ञानशब्दितं चिद्रूपं वा वृत्तिरूपं वा । नाद्यः । नित्ये जगदुपादानप्रकृत्यादावपि परस्परव्यभिचारात् । अत एव न द्वितीयः । असिद्धेः । ज्ञानाज्ञानयोः समानाश्रयत्वात् । अत एव न तृतीयोऽपि । संसारकारणाज्ञानस्य भावत्वांगीकारात् । चतुर्थेऽपि भ्रमोपादानत्वं चेत्परस्य मते पक्षेऽसिद्धिः । दृष्टांते साध्यवैकल्यं च । तन्मते आत्मनोंऽतःकरणस्य वा तदुपादानत्वेनाज्ञाने भ्रमोपादानत्वाभावादनादिभावत्वे सति ज्ञाननिवर्त्यत्वं चेत्संदिग्धविशेष्यासिद्धिरित्यादिहेतुदूषणं शिष्यैरेवोह्यतामिति नोक्तं ॥ न तृतीय इति । विशेषव्याप्त्या सामान्यव्याप्तिबाधनं नामोपाध्युद्भावनमिति तृतीयपक्षे इदं खलु पराभिप्रेतमज्ञानं ज्ञाननिवर्त्यमिति विशेषव्याप्तिरिति वचनेनानादिभावो न निवर्तत इति सामान्यव्याप्तौ यत्साध्यमनिवर्त्यत्वं तदभावरूपेण निवर्त्यत्वेनाज्ञानेतरत्वाभावरूपस्याज्ञानत्वस्य व्याप्तिरुक्ता भवति । तथा चैतदभावः साध्याभावाविनाभावी स उपाधिरिति न्यायेनाज्ञानेतरत्वरूपोपाध्युद्भावनं सामान्यव्याप्तौ कृतं भवतीति । तच्चायुक्तं । अज्ञानेतरत्ववति घटादावनिवर्त्यत्वरूपसाध्याभावेन समव्याप्त्यभावादिति भावः ॥ पक्षेति । यद्यपि साध्यव्यापकताग्राहकानुकूलतर्कसत्वे पक्षेतरत्वस्याप्युपाधित्वमस्ति । तथापि प्रकृते तदभावादनुपाधित्वमित्यत्र तात्पर्यं । एतेन सामान्यविशेषभावस्याकिंचित्करत्वप्रतिपादनेन ॥ प्रसंग इति । अविद्या

यद्यनादिः स्यात्तर्हि न निवर्तेतेत्यनिष्टप्रसंजनं वोताविद्या न निवर्ततेऽनादित्वादित्यनुमानं वेत्यर्थः ॥ विपर्ययेति । निवर्तते च तस्मान्नानादिरिति विपर्ययपर्यवसानस्याविद्यानादित्वप्रापकश्रुतियुक्तिबाधेनायोगात्प्रसंगस्याभासत्वमिति भावः । श्रुतिस्मृतिविरुद्धत्वात् श्रुतिस्मृतिबाधितत्वात् । यो धर्मो यत्र वर्तते स तदविशिष्टे वर्तत इति व्याप्तिबलादनाद्यज्ञाने वर्तमानं निवर्त्यत्वं तदविशिष्टे ब्रह्मण्यपि वर्तेतेत्यापाद्यत इत्यत आह ॥ निवर्तकेति ॥ एतेनेति । अज्ञाने निवर्तकसद्भावस्य प्रमितत्वोपपादनेनाज्ञानं न निवर्ततेऽनादिभावत्वादित्यत्र निवर्तकाभावस्योपाधित्वं निवर्तकसद्भावस्य प्रतिपक्षत्वं च समाहितमुपाधौ साधनव्यापकत्वशंकायाः प्रतिपक्षेऽसिद्धिशंकायाश्चानवकाशादिति भावः । यद्यपि सिद्धांतप्रवृत्तेऽनुमाने उपाधेः प्रतिपक्षविधयैव दूषकत्वेनोपाध्युद्भावनेनैव प्रतिपक्षस्योक्तत्वात्पृथग्ग्रहणानुपपत्तिस्तथाऽपि परमते व्यभिचारोन्नायकत्वेनाप्युपाधेर्दूषकत्वात्पररीत्या परो दूषणीय इत्यभिप्रेत्य पृथगुपाधिप्रतिपक्षयोर्ग्रहणं कृतमिति ध्येयम् । तत्किमेकस्मिन् जीवे एकैवाविद्या नेत्याह ॥ अत्रेति । अत्रैकैकजीवनिष्ठाविद्यायामप्यवांतरविशेषः स्वगुणाच्छादिका त्वेका परमाच्छादिकाऽपरेत्यागमादनुसंधेय इत्यर्थः ॥ वातपुत्रीया इति । वातागमनपुत्रपतनसमागमवत्पततः पुत्रस्य वाताविष्टत्ववच्च पौरुषेया ब्रह्मोपदेशा यादृच्छिकाः प्रसज्येरन्नित्यर्थः ॥ समासाच्च तद्विषयादिति । इवार्थविषयात्समासादपरस्मिन्निवार्थे छप्रत्यये काकतालीयादिशब्द इव वातपुत्रीयशब्दो निष्पन्न इति ज्ञातव्यम् । अथवा । वातपुत्रो वाय्वंशो यत्र यत्राशरीरवाक् श्रूयते तत्र तत्र तां वाचं वाय्वंश एव वक्तीतीतिहासपुराणप्रसिद्धिः । तथा च ब्रह्मोपदेशा वातपुत्रीयाः प्रसज्येरन् अशरीरवाचः प्रसज्येर-

सु०टि०
॥२१॥

कं० २।० प्र० प्र० अ० १

न्नित्यर्थः । पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवागित्यादिना भागवतादौ सामान्यत उक्तत्वेऽपि पद्मपुराणादावंतरिक्षे वायुरत्राह गंभिरया गिरा । अस्यास्तवाष्टमो गर्भः कंस प्राणान्हरिष्यतीत्यादिना विशेष उक्तः । वातपुत्रशब्दाद्वृद्धाच्छ इति छप्रत्यय इति द्रष्टव्यम् ॥ तानीति । एतस्य मोक्षः प्रारब्धकर्मभिः प्रतिबद्धोऽस्त्वितीश्वरेच्छाविशेषानुगृहीतत्वात्प्रारब्धकर्मणां भगवत्प्रसादप्रतिबंधकत्वं युक्तमिति भावः ॥ भगवदिति । एनं मोचयामीति मोक्षविषयकभगवदिच्छाया एतस्य मोक्षः प्रारब्धकर्मभिः प्रतिबद्धोऽस्त्विति मोक्षाभावविषयकभगवदिच्छायाश्च विरोधप्रसंगादित्यर्थः । न चैतदिच्छाद्वयमीश्वरे युक्तं । भगवत्त्वादेवेत्यभिप्रेत्य भगवदित्युक्तं । मोक्षप्रतिबंधकप्रारब्धकर्मावसाने एनं मोचयिष्यामीत्येवमाकारकत्वादपरोक्षज्ञानानंतरभाविमोचकप्रसादस्य नोक्तदोष इत्याशयेन शंकते ॥ मोचक इति ॥ तर्हीति । कालांतरे मोचयिष्यामीत्येवमाकारत्वे प्रसादस्य स्वोत्पत्त्यनंतरमेव फलसंपादके राजप्रसादे परिपूर्णत्वव्यवहारदर्शनादस्य चातथात्वादयं प्रसादोऽपरिपूर्ण इत्येवावगतमित्यर्थः ॥ अन्यथेति । अपरोक्षज्ञानानंतरमेव परिपूर्णप्रसादो जातः स च प्रारब्धकर्मप्रतिबद्ध इत्यंगीकारे ज्ञानसामर्थ्यात्प्रारब्धानामप्युपमर्दं सूत्रकार उपमर्दं चेत्यत्र कथं ब्रूयात् । न कथंचित् । न हि संभवति ज्ञानादप्युत्तमसाधनं * परिपूर्णभगवत्प्रसादमपि प्रतिबध्नतां प्रारब्धानां ज्ञानेनोपमर्द इति भावः ॥ भगवानिति । समग्रैश्वर्यादिमान् पुरुषोत्तम एव यदाऽनादेर्बंधस्य विध्वंसनं करोतीत्यंगीक्रियते तदाऽनादेः कथं निवृत्तिरिति चोद्यानवकाश इति भावः ॥ सूत्रार्थ इति । तावत्युक्त वार्तिकेऽतिव्याप्तिः । तस्यापि सूत्रार्थवर्णकत्वात् । अत उक्तं ॥ सूत्रानुकारिभिः पदैरिति । उक्तानुक्तदुरुक्ता-

॥२१॥

दिचिंता यत्र प्रवर्तते । वार्तिकं तदिति प्रोक्तं वार्तिकज्ञैर्विचक्षणैरित्यभियुक्तवचनाद्वार्तिकस्य सूत्रोक्तानुक्तदुरुक्तचिंतात्मकत्वेन सूत्रशिक्षात्मकतया सूत्रानुसारिभिः पदैः सूत्रार्थवर्णकत्वाभावात्तेन तद्व्युदासः । तावत्युक्ते वृत्तावतिव्याप्तिः । तस्या अपि सूत्रानुकारिभिः पदैः सूत्रार्थवर्णकत्वादत उक्तं ॥ स्वपदानीति । वृत्तौ स्वपदविवरणाभावात्तेन तद्व्युदास इति भावः ॥ साधनेति । नित्यानित्यवस्तुविवेक इहामुत्र फलभोगविरागः शमदमादिसंपत्तिर्मुमुक्षा चेत्येवंविधसाधनचतुष्टयसंपन्नस्येत्यर्थः। अनर्थहेतुनिबर्हणं अनर्थहेतुनिवर्तकं । सूत्रस्यानेकार्थत्वे भामत्युदाहृतवाक्यमपि सम्मतित्वेनाह ॥ अन्यत्रापीति । लघून्यसंदिग्धार्थानि संशायकं हि नानार्थस्फोरकत्वेन गुर्वीति लघुशब्दार्थः कल्पतरूक्तो द्रष्टव्यः । ऐदंपर्यमिदंपरत्वं । इति वेदांताः पर्यवस्यंतीत्यैदंपर्यमस्य शास्त्रस्येत्यन्वयः ॥ जरद्गवादिवाक्यवदिति । जरद्गवः कंबलपादुकाभ्यां द्वारि स्थितो गायति भद्रकाणि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रमायां लशुनस्य कोऽर्थ इत्यादिवाक्यवदित्यर्थः । संगतित्रयं सूत्रितप्रयोजनाक्षिप्तसंबंधमिथ्यात्वप्रतिपादकत्वेन सूत्रितब्रह्मविषयताक्षिप्तकर्तृत्वभोक्तृत्वाद्याकारमिथ्यात्वप्रतिपादकत्वेन सकलतंत्रोपोद्घातार्थत्वेन चेति संगतित्रयं ॥ अनुषंजनीयमिति । अनुषक्तेनाज्ञानां ज्ञानद इत्यादिवाक्येन मोक्षदश्च स इति ज्ञानदानात्पृथङ्मोक्षदानोक्त्या मोक्षस्य भगवत्प्रसादसाध्यत्वलाभादन्यतरनिर्णयोपपत्तेरुक्तसंदेहानवकाश इति भावः । दर्शनमोक्षावंतरा दर्शनमोक्षयोर्मध्येंऽतरांऽतरेण युक्त इति द्वितीया ॥ आग्नेयादीनामिति । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति । अग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् । उपांशु याजमंतरा यजत्यजामित्वाय । ऐंद्रं

दध्यममावास्यायामैंद्रं पयोऽमावास्यायामिति वाक्यैर्विहितानामाग्नेयादीनामित्यर्थः । अपूर्वकरणभावे श्रुत इति मतांतराभिप्राये-णैतत् । सत्यस्यापि निवृत्तौ बाधकाभावादिति वदंतं मां प्रति सत्यस्यापि निवृत्तावात्माऽपि निवर्तेतेत्यनिष्टप्रसंजनं यदि क्रियेत तर्ह्यनादेरज्ञानस्य निवृत्तिं स्वीकुर्वंतं त्वां प्रत्यनादेर्निवृत्तावात्माऽपि निवर्तेतेत्यनिष्टप्रसंजनं तुल्यमापद्येतेत्यत आह ॥ अनादेरिति । आत्मेति परमात्मतत्त्वज्ञानेनात्मगतधर्मादिनिवृत्त्यापादने तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादित्यधिकरणन्यायेन तेन तन्निवृत्तेरंगीकृतत्वादिष्टापादनमिति भावः ॥ एकमेवेति । नानारूपवदवयवारब्धेऽवयविनि चित्ररूपं नामैकमेवरूपं । न तु नानारूपसमाहारः । रूपस्य व्याप्यवृत्तित्वनियमादिति हि पदार्थविदो वदंतीत्यर्थः । ननु चित्ररूपस्यातिरिक्तत्वे नाना-रसवद्द्रव्यारब्धेऽवयविनि चित्ररसोऽप्यंगीकर्तव्यः स्यात् । तुल्यन्यायत्वादिति चेन्मैवं । तत्रावयविनि रसोपलंभस्यावयव-गतरसैरेवोपपत्त्या रसांतराभ्युपगमे बीजाभावात् । न चैवमुक्तन्यायेन चित्ररूपस्याप्यपलापः स्यादिति वाच्यम् । अवयवगत-रूपव्यतिरेकेणावयविनि रूपांतराभावेऽवयविनोऽचाक्षुषत्वप्रसंगात् । चाक्षुषत्वप्रयोजनकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याभावात् । न च वाच्यं महत्त्वसमानाधिकरणोद्भूतरूपवदवयवारब्धत्वं तत्प्रयोजकमिति । लाघवेन महत्त्वे सत्युद्भूतरूपवत्त्वस्यैव चाक्षुषत्व-प्रयोजकत्वादिति दिक् । नन्वज्ञानस्य मिथ्यात्वाद्बंधस्याध्यस्तत्वाभावे तत्कार्यत्वमेव न संभवतीति तदर्थमध्यासवर्णनं संगतमेवेत्यत आह ॥ अज्ञानस्येति । अज्ञानस्य मिथ्यात्वं कफोणीगुडायितं । कूर्परस्थगुडवदाचारवत्कृतं । कूर्परस्थगुडस्य यथा जिव्हयोपादातुमशक्यत्वं तथाऽज्ञानमिथ्यात्वस्यापि त्वया वक्तुमशक्यत्वरूपं तदस्ति । मानविदूरत्वादतस्तयोः ॥२२॥

साम्यमिति भावः । स्यात्कफोणिस्तु कूर्पर इत्यमरः । सुबंतादुपमार्थात्कफोणिगुडशब्दात्कर्तुः क्यङ् सलोपश्चेत्याचारार्थे क्यङ्-प्रत्ययेऽकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे क्यङंतस्य सनाद्यंता धातव इति धातुसंज्ञायां ततस्तत्करोतीत्यर्थे ण्यंतात् क्तप्रत्यये तस्येडागमे निष्ठायां च सेटीति णिलोपे च रूपमिदं ॥ विशेषणेति । यज्ज्ञानं यद्विरोधि तेन तन्निवर्तत इत्येव नियमे संभवति मिथ्यात्वविशेषणस्य वैयर्थ्यादित्यर्थः । गरुडध्यानेन सत्यस्य विषस्य निवृत्तावपि ध्यानस्य मानसक्रियात्वेन ज्ञानत्वाभावान्मिथ्याभूतमेव ज्ञाननिवर्त्यं न सत्यमिति व्याप्तौ न व्यभिचार इत्याशयेन शंकते ॥ ध्यानमिति ॥ रूपेति । रूप्यते निरूप्यतेऽनेनेति रूपं विषयस्तद्रहितत्वान्मानसपरिस्पंदस्य तस्य ध्यानत्वे गरुडं ध्यायामीति विषयावभासविरोधश्चे-त्यर्थः । ननु वासनामयस्य वस्तुनो मनसावलोकनं ध्यानमित्येतन्न युक्तं । वासनाया अतींद्रियतया तदुपादानकवस्तुनोऽ-प्यतींद्रियत्वावश्यंभावेन मनसावलोकनस्यैवानुपपत्तेरित्यत आह ॥ अतींद्रियेति । ननु प्रज्ञांतरपृथक्त्ववद्दृष्टिश्च तदुक्तमि-त्यधिकरणेऽविच्छिन्नपरोक्षज्ञानसंततिर्हि ध्यानमिति तत्त्वप्रकाशिकायां ध्यानस्य परोक्षज्ञानत्वमुक्तं । अत्र च मनसावलोकनं ध्यानमिति मानसप्रत्यक्षत्वमुच्यते । अतोऽन्योन्यविरोध इति चेन्मैवं । ईश्वरप्रतिमास्थानीये वासनामयवस्तुनि यदीश्वरानुसंधानं तस्य परोक्षतया तदभिप्रायेण प्रवृत्तस्य तत्त्वप्रकाशिकावाक्यस्येश्वराधिष्ठानभूतवासनामयवस्त्ववलोकनस्य मानसप्रत्यक्षत्वा-भिप्रायेण प्रवृत्तस्यात्रत्यवाक्यस्य च विरोधाभावादिति । ननु वासनामयवस्तुनो रूपावभासबलेन सरूपत्वान्नीरूपत्वासनातो जनिर्न संभवतीत्यत आह ॥ नीरूपादिति ॥ प्रसिद्धमिति । वायोरग्निरिति श्रुतेरिति भावः । कारणगुणा हि कार्यगुणा-

नारभंत इति न्यायेन कारणनिष्ठगुणानामेव कार्यगतगुणारंभकत्वान्नीरूपवासनोपादानके वासनामयवस्तुनि रूपं न संभवतीति तार्किकाद्याशंकायामाह ॥ तार्किकादीनिति ॥ एवं चेति । एवं सति मानसावलोकनस्य ध्यानरूपत्वे सति । ध्यै चिंतायामिति स्मृतिसिद्धा ध्यायतेश्चितार्थताऽपि सिद्धा । चिंताया मानसावलोकनात्मकत्वात् । ध्यानस्य मानसपरिस्पंदत्वे तु सा न स्यादिति भावः ॥ अत एवेति । ध्यानस्य मानसावलोकनरूपक्रियात्वांगीकारादेव प्रतिपादकेन क्रियामानसवदिति सूत्रखंडेन विरोधः परिहृतः । न हि क्रियामानसवदित्यत्र ध्यानस्य मानसपरिस्पंदरूपत्वमुच्यते । येन ध्यानस्य ज्ञानरूपत्वांगीकारे तद्विरोधः स्यात् । किं नाम मानसक्रियात्वसामान्यं । तच्च ध्यानस्य मानसक्रियावलोकनरूपत्वेऽप्युपपन्नमिति भावः ॥ तत्कथमिति । निदिध्यासितव्य उपासीतेत्यादिविधि(लिङादिज्ञान)जन्यपुरुषेच्छाप्रयत्नसापेक्षकारणजन्यमिदं ध्यानं ज्ञानं कथं स्यात् । तत्तस्माज्ज्ञानसामग्रीविलक्षणजन्यत्वादित्यर्थः । विधेरिष्टोपायत्वज्ञानजननेनैव चरितार्थस्येच्छाप्रयत्नौ प्रति जनकत्वाभावाद्विधिजन्यपुरुषेच्छाप्रयत्नेत्युक्तिरेवानुपपन्नेत्याह ॥ विधेरिति । ननु विधिजन्येत्यत्र विधिजन्यत्वं प्रयोज्यत्वं । तथा च विधिप्रयोज्येच्छाप्रयत्ननिरपेक्षमेव सर्वत्र ज्ञानकारणं । ध्यानं तु तत्सापेक्षकारणजन्यमिति कथं ज्ञानं स्यादिति ब्रूमः । अतो नोक्तिखंडनावकाश इत्याशंक्याह ॥ इच्छेति । इच्छाप्रयत्नयोर्वासनामयवस्तूपादानसंस्कारोद्बोध एव चरितार्थत्वेन मानसवस्त्ववलोकनरूपध्याने व्यापाराभावाद्ध्यानस्य तत्सापेक्षकारणजन्यत्वमेवासिद्धमिति भावः ॥ चक्षुरिति । इच्छाप्रयत्नयोर्यथा चक्षुश्चलननिरास उपयोगो न चाक्षुषज्ञाने व्यापारस्तथा प्रकृतेऽपीच्छा-

प्रयत्नयोर्मनोविक्षेपनिरास एवोपयोगो न ध्याने व्यापारः । अतोऽस्मिन्नपि पक्षे ध्यानस्येच्छाप्रयत्नसापेक्षकारणजन्यत्वाभावाज्ज्ञानबाहिर्भावशंकावकाश इति भावः । यद्वा विधिजन्यपुरुषेच्छाप्रयत्नानिरपेक्षमेव सर्वत्र ज्ञानकारणं । ध्यानं तु विधिजन्यपुरुषेच्छाप्रयत्नसापेक्षकारणजन्यमुत विधिप्रयोज्यौ याविच्छाप्रयत्नौ तदुभयसापेक्षकारणजन्यं वा । नाद्य इत्याह ॥ विधेरिति । विधेः साध्यसाधनभावमात्रज्ञापनेन चरितार्थत्वान्मानसवस्त्ववलोकने व्यापाराभावादिति वक्ष्यमाणेन संबंधः । तथा च विधिजन्यपुरुषेच्छाप्रयत्नरूपत्रितयसापेक्षकारणजन्यत्वं पक्षेऽसिद्धमिति भावः । नापि द्वितीयः । असिद्धेरेवेत्यभिप्रेत्यासिद्धिं द्वेधोपपादयति ॥ इच्छाप्रयत्नयोरित्यादिना । सुप्रसिद्धेति । सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहतीत्यागमादिति भावः । न चानेन सेतुप्राप्तेरेव पापनिवर्तकत्वमुच्यते न तद्दर्शनस्येति वाच्यं । श्रुतहान्यश्रुतकल्पनाप्रसंगात् ॥ अनित्येति । स्वर्गादिवदिति भावः ॥ साम्यादिति । ज्ञानजन्येच्छादिवदिति भावः । ननु बंधध्वंसो न मुक्तिः । किंतु तद्बाध एव । स च बंधस्याध्यस्तत्वं विना नोपपद्यत इत्याध्यासवर्णनं संगतमेवेत्याशयेन शंकते ॥ बंधेति ॥ नैवमिति । एवं बंधो मुक्तिरिति श्रुतिसूत्रे न वदतस्तरति शोकमात्मविदिति श्रुत्यादौ बंधबाधविपरीतस्य शोकतरणशब्दितस्य बंधध्वंसस्य मुक्तित्वेनाभिध्यानात् । तथा च बंधबाधौ मुक्तिरित्यत्र प्रमाणाभाव इति भावः । ननु विमुक्तश्च विमुच्यत इति प्रागपि मुक्तत्वं श्रुतं । तच्च प्रतिपन्नोपाधौ त्रैकालिकनिषेधरूपस्य बंधबाधस्यैव मुक्तित्व उपपद्यते । तादृशस्य बाधस्य प्रागपि सत्वान्न तु बंधध्वंसस्य मुक्तित्वे तस्य प्रागसत्वादिति श्रुतार्थापत्तिरेव बंधबाधो मुक्तिरित्यत्र प्रमाणमस्तीत्यत आह

॥ विमुक्तश्चेति ॥ अन्यथैवेति । बंधबाधस्य मुक्तित्वाभावेऽपि स्वतश्चिदानंदात्मके जीवे बंधस्यास्वभाविकत्वात्तदभिप्रायेण विमुक्तश्च विमुच्यत इति प्रागप्युच्यमानविमुक्तत्वमुपपद्यत इति प्रमादात्मकत्वाद्बंधस्य विमुक्तत्वं च युज्यत इति भाष्यकृता श्रुतार्थापत्तिरन्यथैवोपपादितेत्यर्थः ॥ अपेक्षाया इति । अपेक्षायाश्चेतनधर्मत्वादचेतने तत्प्रसक्तेरेवाभावान्नैव मुक्तिरपेक्षत इति यत्तद्वचनं कथमित्यर्थः । मिथ्यात्वमपि बंधस्येत्यनया वाचो भंग्या मिथ्यात्वं प्रागसिद्धमतोऽर्थापत्तिप्रमेयं नेति सिद्धांतिनोक्तमिति विपरिताभिप्रायं मत्वा शंकते ॥ नन्वेतदिति । प्रमाणविरुद्धत्वमप्यर्थापत्तिसामग्रीकोटिनिविष्टमिति पूर्वपक्षिणा वाचयित्वा तदभावादेव बंधमिथ्यात्वं नार्थापत्तिप्रमेयमिति ब्रूम इति स्वाभिप्रायमुद्धाटयितुं सिद्धांती प्रतिबंदीं शंकते ॥ एवं तर्हीति ॥ तदिदमुक्तमिति । प्राङ्मानासिद्धत्वान्नार्थापत्तिप्रमेयं बंधमिथ्यात्वमित्याशयश्चेदाचार्यस्य तर्हि मिथ्यात्वमपि बंधस्य न मानाविदितत्वत इत्येवावक्ष्यत् । न तु प्रत्यक्षविरोधत इतीति भावः ॥ अहमित्येवेति । अहमित्येव यो वेद्यः स जीव इति कीर्तितः । स दुःखी स सुखी चैव स पात्रं बंधमोक्षयोः । यत्कर्म कुरुते तदभिसंपद्यत इत्याद्यागमैरित्यर्थः ॥ तद्युत्पादनेति । यदि बंधं गोचरयत्प्रत्यक्षं नास्तीति गोचरयेत्तर्हि प्रत्यक्षत एव बंधमिथ्यात्वस्य करतलामलकवत्सिद्धतया युष्मदस्मदित्यादिभाष्ये तद्युत्पादनं व्यर्थं स्यादिति भावः ॥ स्यादेतदिति । यदि बंधसत्त्वग्राहकं प्रत्यक्षं तत्त्वावेदकं स्यात्तदाऽर्थापत्तेः प्रत्यक्षविरुद्धत्वमित्येतत्स्यात् । न चैतदस्ति । अद्वैतश्रुत्यादिविरोधादिति भावः ॥ समस्तेति । समस्तोपाधिविनिर्मुक्तमत एवानंतमपरिच्छिन्नमानंदज्ञानैकरसमुदासीनं कर्तृत्वभोक्तृत्वादिरहितमद्वितीयमात्मतत्त्वं नेह नानेत्या-

दिश्रुतिस्मृत्यादिषु प्रतिपाद्यत इत्यर्थः । नन्वद्वितीयात्मतत्त्वप्रतिपादकश्रुतिस्मृत्यादीनां प्रत्यक्षविरोधादुपचरितार्थत्वं किं न स्यादित्यत आह ॥ न चेति । उपक्रमादिषड्विधतात्पर्यलिंगवशादद्वितीयात्मतत्त्वपरत्वेन विद्यमानानीदृगात्मतत्त्वं प्रतिपादयंति श्रुतिस्मृतिपुराणादीनि केनचिदुपचरितार्थानि कर्तुं न शक्यानीत्यर्थः । तद्विरुद्धं श्रुत्यादिविरुद्धं । प्रादेशिकं परिच्छिन्नं । आदर्शयद्गोचरयत् ॥ कथमिति । कथं बाधितं भवेदित्यर्थः । नन्वद्वितीयात्मतत्त्वविपरीताकारः प्रत्यक्षे कस्मान्निमित्ताद्भातीत्याशंक्याविद्यापरिणामरूपांतःकरणोपाधिवशादयं विपरीताकारः प्रत्यक्षे भातीति वक्तुमविद्यास्वरूपमंतःकरणस्वरूपं चाह ॥ येयमित्यादिना । येयमनादिरनिर्वाच्याऽविद्येति संबंधः । स्थितं व्यवस्थितं ज्ञानानंदादिलक्षणं यस्य परब्रह्मस्वरूपस्य तत्त्वावभासं प्रतिबध्य जीवत्वापादिकेत्यर्थः ॥ अविद्येति । अविद्या च कर्म च पूर्वप्रज्ञा च तत्प्रयुक्ताः संस्काराः । अविद्यासंस्कारः कर्मसंस्कारोऽपूर्वानुभवजसंस्कारश्चेति यावत् । तेषां संस्काराणां चित्रभित्तिरिव चित्रभित्तिर्यथा नानापदार्थानामाश्रयस्तथाऽविद्याऽपि पूर्वोक्तानां संस्कारशब्दितनानाविधवासनारूपपदार्थानामाश्रय इत्यर्थः ॥तस्या इति । तस्या अविद्यायाः । परमेश्वराधिष्ठानेन लब्ध इत्यर्थः ॥ विज्ञानेति । विज्ञानशक्तिः क्रियाशक्तिश्चेति यद्द्वयं तदाश्रयः । अत एव कर्तृत्वभोक्तृत्वयोर्मुख्याधारः क्रियाशक्तिवशात्कर्तृत्वाधारो ज्ञानशक्तिवशाद्भोक्तृत्वाधार इति योज्यं । अहंकारस्यापरोक्ष्यं च चैतन्यवत्स्वतोऽपरोक्षत्वाभावाच्चैतन्यसंवलनप्रयुक्तमित्याह ॥ कूटस्थेति । कूटस्थं निर्विकारं यच्चैतन्यं तत्संबंधात्संजातो ज्योतिःशब्दितप्रकाशो यस्येत्यर्थः ॥ परिस्पंदशक्त्येति । चेष्टाशक्त्या प्राण इति गीयत इत्यर्थः । लोहितिमा लौहित्यं ।

पूतिकूष्मांडीकृते (पूतिगंधस्तु दुर्गंध इत्याभिधानात्) पूतिकूष्मांडवत्स्वविषयबंधसत्त्वव्यवस्थापनरूपकार्याक्षमीकृते ॥ अस्माभिरिति । तत्त्ववादिभिरपि बुद्धींद्रियशरीरविषयतत्प्रयुक्तसुखदुःखादिधर्मलक्षणो बंध आत्मन्यारोपित एवेत्यंगीक्रियते तस्यात्मीयत्वाभावादित्यर्थः । कर्तृत्वादिकं जीवस्वरूपेण परमार्थसदेव तस्य परायत्तत्वाभावमात्रं कल्पितं । एवं बुद्धींद्रियशरीरादयोऽपि स्वरूपेण परमार्थसंत एव तेषु पराधीनात्मीयत्वमात्रं कल्पितमित्यध्यात्मविदो दर्शनं । मायावादिनां दर्शनं तु कर्तृत्वभोक्तृत्वबुद्धींद्रियशरीरादीनां स्वरूपेणैव मिथ्यात्वमित्यतस्तन्मिथ्यात्वनिरासप्रयासो युज्यत एवेत्यभिप्रेत्य परिहरति ॥ तयाऽपीत्यादिना ॥ क्रियेति । क्रियां प्रति कारकांतरानाधिष्ठेयत्वादिरूपं कर्तृत्वं विषयानुभवलक्षणज्ञानं प्रति कारकांतरानधिष्ठेयत्वादिरूपं भोक्तृत्वं च परमेश्वराधीनं जीवे परमार्थतो विद्यत एवेत्यर्थः । ननु कर्तृत्वभोक्तृत्वयोरात्मनि पारमार्थिकसत्त्वांगीकारे क्रियावेशभोगावेशलक्षणविकारापत्त्या तस्य विनाशादिकं प्रसज्यत इत्यत आह ॥ क्रियेति । क्रियावेशादिरूपविकारस्य विनाशादिकं प्रत्यप्रयोजकत्वं किंतु यावल्लक्ष्यभाविलक्षणनिवृत्तिरूपान्यथाभावस्यैव तत्प्रयोजकत्वमित्यस्यार्थस्योतप्रोतात्मकत्वं तु पटे देहेऽगसंस्थितिरित्यादिलक्षणस्यैव निवृत्तौ स्यादनित्यतेत्यत्र वक्ष्यमाणत्वादित्यर्थः ॥ तस्येति । तस्य कर्तृत्वादेः पराधीनत्वावभासोऽज्ञाननिमित्तो भ्रम इत्यर्थः । आत्मीयतया परानधीनात्मीयतया । तत्कृते दुःखादिकृते । तद्विनिवृत्तये दुःखादिनिवृत्तये । एतादृक् दुःखाद्यापादकं ॥ बंभ्रमीति । पुनः पुनः भ्राम्यति । भ्रमु अनवस्थान इत्यस्मात् यङ्लुकि रूपमेतत् ॥ एतदिति । दुःखादिप्रपंचस्य स्वरूपेणैव परमते मिथ्यात्वं स्वमते तु तन्नेत्येतत्प्रदर्शयितुं मिथ्यात्वमपि

बंधस्येति पूर्ववाक्ये दुःखादितत्संसर्गसाधारणस्य बंधशब्दस्य प्रस्तुतत्वेऽपि तं शब्दमप्रयुज्य दुःखादेरिति विशिष्योक्तमित्यर्थः। ननु दुःखादेरिव तत्प्रति स्वातंत्र्यादेरपि जीवगतस्य सत्यत्वं कुतो नांगीक्रियत इत्यत आह ॥ स्वातंत्र्यादेरिति। आदिशब्देन स्वामित्वादिपरिग्रहः। ननु सर्वमिथ्यात्वश्रुतेः स्वार्थपरत्वाभाव इव नान्योऽतोऽस्ति कर्तेत्यादिश्रुतेः स्वार्थपरत्वाभावः किं न स्यादित्यत आह ॥ न हीति। सर्वमिथ्यात्वश्रुतेः स्वार्थपरत्वत्यागोपायः प्रागुक्तोपपत्तिविरोध इव नान्योऽतोऽस्ति कर्तेत्यादिश्रुतेः स्वार्थपरत्वत्यागोपायः कश्चिद्विरोधो न ह्यत्रास्तीत्यर्थः। एतत् जीवस्वातंत्र्यादेर्बाधितत्वं । आत्मानात्मनोरितरेतराध्यासपुरस्कारेणेत्येतच्च कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति चेदुच्यते। देहेंद्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरित्यादिनोत्तरवाक्यसंदर्भेण सांकरभाष्य एवोपपादितं द्रष्टव्यं ॥ तादात्म्याध्यासमिति । आत्मानात्मनोरिति शेषः ॥ अहंप्रत्ययस्येति । अहमितिप्रतीतेः केवलात्मविषयतया तत्र चिदंशभानाभावेन तद्गतकर्तृत्वारोप आत्मनीति वक्तुमशक्यमिति भावः । नन्वहंप्रत्ययस्य केवलात्मालंबनत्वे सुषुप्तावप्यहमित्युल्लेखः स्यात्तदाऽऽत्मनः प्रकाशमानत्वात् । न चाविद्यापरिणामस्यांतःकरणस्याहंप्रत्ययत्वेऽयं दोषोऽस्ति । सुषुप्तौ निखिलस्यापि परिणामस्य विलीनत्वादिति शंकते ॥ नन्विति। ह्यो गते नागतेऽन्हिश्वेत्यभिधानाद्ध्यस्तनशब्दोऽतीतस्यान्हो वाचकः । तस्माच्छब्दात्सायंचिरंप्राण्हेप्रगेव्ययेभ्य इत्यादिना ट्युटलोरन्यतरप्रत्यये तुगागमे च रूपमेतत्। इष्टापत्त्या परिहरति ॥ सुखमिति। यद्यपि नायं सुखानुभवपरामर्शस्तथाऽपि स्वापकालीनो यः

सुखानुभवस्तज्जन्यस्य सुखमहमस्वाप्समित्यहंकारसंबंधितया सुखस्मरणस्य दर्शनादिति योज्यं । स्मर्येत सुखमिति शेषः । विशेषतः सुखं स्मर्येतेत्यापादयता किं सुखस्य स्पष्टस्मरणमापाद्यते उताहं चंदनजन्यसुखवानभूवमित्यादिवद्विषयविशेषोपरक्तत्वेन स्मरणमापाद्यत इति विकल्प्याद्ये इष्टापत्तिः । स्मरणस्येतरव्यावर्तकसुखत्वप्रकारकत्वेन स्पष्टत्वात् । द्वितीये तु सुषुप्तिसंबंधिसुखस्य विषयजन्यत्वाभावात्तादृशस्मरणापादनप्रसक्तिरेव नेत्याह ॥ किं स्पष्टेत्यादिना सौषुप्तस्य सुखस्येत्यंतेन । अस्तु वा तस्य विषयजन्यत्वं तथाऽपि विषयविशेषोपरक्तत्वेन स्मृतिः स्यादित्यापादनमयुक्तमेव व्याप्तिविरहादित्याह॥ न चेति। अतःशब्दपरामृष्टं हेतुमाह ॥ मुख्येति । स्वापकाले मुख्यसुखसद्भावेन तदनुभवे च बाधकाभावात्सुखमहमस्वाप्समिति परामर्शस्य दुःखाभावविषयत्वकल्पनमपास्तं । मुख्यस्य स्वरूपसुखस्य स्वरूपेंद्रियेण तदनुभवस्य च वक्ष्यमाणरीत्या संभवादिति भावः । मुख्यसुखं च तदनुभवश्चेति द्वंद्वैकवद्भावो वा मुख्यसुखसहितस्तदनुभव इति शाकपार्थिवादित्वादुत्तरपदलोपितत्पुरुषो वा द्रष्टव्यः । ननु सुखमहमस्वाप्समिति स्वापविषयकपरामर्शो न घटते । स्वापशब्दार्थस्य सर्वेंद्रियोपरमस्य साक्ष्ययोग्यत्वेन साक्षिणा तदनुभवायोगादिति चेन्मैवं । सर्वांतःकरणवृत्तिरूपज्ञानविपरिलोपस्य स्वापशब्दार्थत्वात्तस्य च साक्षियोग्यप्रतियोगिकत्वेन साक्षियोग्यतया साक्षिणाऽनुभवसंभवात् । ननु सर्वांतःकरणवृत्तिलोपस्य स्वापत्वं न घटते । आगामिस्वीयवृत्तिध्वंसस्येदानीमयोगात्सर्वशब्दस्य च संकोचे जाग्रदादावतिव्याप्तिरिति चेन्न । अंतःकरणवृत्तिध्वंसस्य यत्कालावच्छेदेन वृत्त्यंतरसामानाधिकरण्यराहित्यं तत्कालावच्छिन्नतद्ध्वंसस्य स्वापत्वेन विवक्षितत्वात् । न चोक्तज्ञानध्वंसस्य सुप्तिशब्दार्थत्वे एतावंतं कालं

सुखमहमस्वाप्सं न किंचिदवेदिषमिति व्यवहारानुपपत्तिरिति वाच्यं । अंधकारस्यालोकाभावरूपत्वपक्षे नात्रालोकः किं पुनरंधकार इतिवदुपपत्तेः । एवंविधस्येच्छाध्वंसस्य स्वापशब्दार्थत्वांगीकारे तु न कश्चित्क्षुद्रोपद्रवः । न चैवं सुप्तिशब्दो नानार्थः स्यादिति वाच्यं । प्रमाणप्राप्तस्य नानार्थस्य सोढव्यत्वात् । वस्तुतस्तु कालविशेषावच्छिन्नांतःकरणपरिणामध्वंसत्वस्य ज्ञानध्वंसादावनुगतस्य सुप्तिशब्दप्रवृत्तिनिमित्तस्य सत्वान्न नानार्थत्वमिति ध्येयं । स्वसमानाधिकरणांतःकरणसंबंधसमानकालीनत्वेनोक्तध्वंसो विशेषणीयः । तेन मुक्ते न प्रसंगः । परमार्थतस्तु कालविशेषविशिष्टभावरूपाज्ञानस्य सुप्तिशब्दार्थत्वं । एवं च तत्कारणज्ञानरूपसुप्तिसंबद्ध इति तत्त्वप्रकाशिकावाक्यमविरुद्धं भवति । अन्यथा तत्कारणाज्ञानरूपसुप्तिबद्ध इत्यत्राप्यज्ञानशब्देनोक्तज्ञानध्वंसस्यैव ग्रहणापत्त्या तस्य च तच्छब्दनिर्दिष्टजाग्रत्स्वप्नभ्रमकारणत्वाभावेन तद्वाक्यस्य विरुद्धत्वापत्तेः । न च वाच्यं तत्कारणाज्ञानरूपसुप्तिबद्ध इत्यज्ञानस्योक्तं सुप्तित्वं न घटते । भावरूपाज्ञानस्य जाग्रदादावपि सत्वेनातिप्रसंगादिति। निवृत्तिध्वंसनिष्ठवृत्त्यंतरासामानाधिकरण्यावच्छेदककालविशेषविशिष्टत्वस्याज्ञानविशेषणस्य तत्राभिप्रेतत्वेनातिप्रसंगाभावात् । न चोक्तकाले विशिष्टस्याज्ञानस्य जाग्रत्स्वप्नभ्रमकारणत्वाभावेन तत्कारणेत्यस्यानन्वय इति वाच्यं । एकविशेषणविशिष्टेऽपरस्यानन्वयेऽपि दंडी कुंडली देवदत्त इत्यादाविवैकस्मिन्विशेषणद्वयान्वयसंभवात् । केचित्तु तत्कारणाज्ञानरूपसुप्तिबद्ध इति वाक्यं तयोर्जाग्रत्स्वप्नभ्रमयोः कारणं यदज्ञानं तन्मात्ररूपसुप्तिबद्ध इत्यर्थपरतया व्याचक्षाणा जाग्रदादावतिप्रसंगनिरासाय मात्रपदं प्रयोक्तव्यमित्याहुः । तच्चिंत्यं । मात्रपदेन ज्ञानसामान्यव्यवच्छेदेऽसंभवः । सुप्तावप्यात्मादिविषयकज्ञानस्य सत्वात्त-

दतिरिक्तज्ञानव्यवच्छेदेऽपि व्यवच्छेदस्य तदतिरिक्तकतिपयज्ञानप्रतियोगिकप्रागभावप्रध्वंसरूपत्वे जाग्रदादावतिप्रसंगः। तदतिरिक्तसकलज्ञानप्रागभावप्रध्वंसरूपत्वे त्वसंभव इति तदीयमनोवृत्त्यनधिकरणकालविशेषविशिष्टं तदीयं भावरूपाज्ञानं तस्य सुप्तिरित्युच्यते। अतो न कश्चिद्दोष इति तु रहस्यमिति संक्षेपः। ननु यद्यात्मैवाहंपदार्थो न त्वविद्याप्रथमकार्याहंकारस्तर्ह्यथातोऽहंकारादेशोऽथात आत्मादेश इति छंदोगश्रुतावात्माहंकारयोर्भेदवचनं न स्यादित्यत आह॥ यत्त्विति॥ भाष्यकृतेति। जीवांतस्त्वनिरुद्धो यः सोऽहंकार इतीरितः। सोऽप्यणुत्वेऽपि स व्यापी परमैश्वर्ययोगतः। यथा बालतनौ विष्णौ मार्कंडेयेन धीमता। प्रविश्य नांतोऽधिगत एवं व्याप्तौ हरिः परः। अणुरूपोऽपि भगवान्वासुदेवः परो विभुः। आत्मेत्युक्तः स च व्यापी न च भेदो हरौ क्वचिदित्यादिनाऽऽत्माहंकारयोर्भेदवचनं युक्तमिति भाष्यकृतैव छंदोगोपनिषद्भाष्ये व्याख्यातमित्यर्थः। जीवस्थस्त्वनिरुद्धो यः सोऽहंकार इतीरित इति क्वचित्पाठः॥ वक्ष्यति चेति। सैव हि सत्यादय इत्यत्र सत्यादीनामहमात्मांतानां भगवद्रूपत्वं सूत्रकारोऽपि वक्ष्यतीत्यर्थः॥ कथमन्यथेति। अथातोऽहंकारादेश इति श्रुतिनिर्दिष्टस्याहंकारस्य त्वदभिमताविद्याप्रथमकार्याहंकाररूपत्वेऽहमेवाधस्तादित्यादिनोक्तं सवर्गतत्वं कथमुपपद्येत। न कथंचित्। तस्य परिच्छिन्नत्वादिति भावः॥ आत्मन इति। महत्तत्त्वपरिणामस्य तस्य जडत्वादिति भावः॥ तथा सतीति। महत्त्वकार्याहंकारस्याहं कर्तेत्युल्लेखविषयत्वेऽहं ब्रह्मास्मीत्यादावपि तस्यैवाहमुल्लेखविषयत्वं स्यात्। तथा च सामानाधिकरण्यानुपपत्तिरिति भावः। नन्वहं ब्रह्मास्मीत्यादावहंशब्दस्य महाभूतान्यहंकार इति स्मृतिसिद्धाहंकारविषयत्वेऽपि न दोषः। सामानाधिकरण्यस्य

यः स्थाणुः स पुरुष इत्यादाविव योऽहमिति प्रतीतः स ब्रह्मण्यध्यस्त इत्येतदर्थपरतया व्याख्यातुं शक्यत्वादिति शंकते ॥ अत्रापीति । निरवद्यस्य महत्तत्त्वपरिणामाहंकारसंबंधशून्यस्य मायेति मायानिरसनसमर्थस्य मायाकार्याहंकारसंबंधो नेति भावः । अनयोरहंकर्तेति प्रतीतिविषयस्य महाभूतान्यहंकार इति स्मृतिसिद्धाहंकारस्य च । ननु मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याग्रतो भवेदित्यत्र नेह नानेत्यादिवाक्येनात्मातिरिक्तसर्वमिथ्यात्वं यदि बाध्येत तर्हि सर्वांतःपातिनो वाक्यस्यापि तन्मिथ्यात्वं भवेदिति वक्तुमुचितं । न तु वाक्यस्याग्रतो मिथ्यात्वमिति । तथा हि । किं नेह नानेत्यादिवाक्येन प्रथममेतद्वाक्यमिथ्यात्वधीर्जायते । पश्चात्तदतिरिक्तस्य मिथ्यात्वधीरिति बुद्धिव्यक्तिभेदमाश्रित्याग्रत इत्युच्यते । उतैकस्या एव बुद्धेर्वाक्यमिथ्यात्वविषयीकरणं प्रथमतस्तदतिरिक्तमिथ्यात्वविषयीकरणं तु पश्चादिति व्यापारक्रममाश्रित्य । नाद्यः । तेन वाक्येनात्मातिरिक्तसकलमिथ्यात्वविषयाया एकस्या एव बुद्धेरुत्पाद्यमानत्वात् । न द्वितीयः । युगपद्यावत्स्वविषयगोचरतया बुद्ध्युत्पादनस्यानुभवसिद्धत्वेन बुद्धेर्विरम्यव्यापारायोगात् । न च वाच्यं व्यापारांतरक्रममाश्रित्याग्रत इत्युक्तिरिति बुद्धेः स्वविषयगोचरीकरणातिरिक्तव्यापाराभावादित्याशयेन शंकते ॥ नन्विति ॥ मिथ्याभूतस्येति । मिथ्याभूतस्य साधकत्वमिति विशिष्टोऽर्थः केन सिद्धः । न केनापि । पूर्वोक्तयोः प्रमाणयोर्विशकलिततया साधकत्वमिथ्यात्वग्राहकत्वादिति मा वोच इत्यर्थः ॥ तथा चास्येति । अस्य प्रमाणस्य । प्रमाणद्वयसमाहारात्मकस्य प्रमाणस्य साधकत्वे सिद्धे ततो मिथ्याभूतस्यैव साधकत्वमित्यर्थसिद्धिः सत्यां च तस्य मिथ्यात्वे साधकत्वं न स्यादिति तर्कस्य विरुद्धतासिद्धिस्तर्कस्य विरुद्धतासिद्धौ

सत्यामेवास्य प्रमाणद्वयसमाहारात्मकस्य मिथ्याभूतस्य साधकत्वमित्यर्थसाधकत्वसिद्धिरिति चक्रकाश्रयप्रसंगेन नैकस्यापि सिद्धिरित्यर्थः । ततश्च प्रत्यक्षाप्रामाण्ये सति प्रतिबिंबं चेत्यादौ मिथ्याभूतमिति संबंधः । ननु प्रतिबिंबस्य स्वरूपेण सत्यत्वेऽपि भेदविशिष्टरूपेण मिथ्यात्वमस्त्येवातो भेदविशिष्टं प्रतिबिंबं बिंबानुमापकं सद्यन्मिथ्या न तत्साधकमिति व्याप्तेर्व्यभिचारस्थलं भविष्यतीत्यत आह ॥ विच्छेदस्येति । भेदस्यापि सत्यताया उपपादयिष्यमाणत्वान्न भेदविशिष्टरूपेण प्रतिबिंबस्य मिथ्यात्वमिति न तद्व्यभिचारस्थलमिति भावः ॥ स्फटिकेति । स्फटिकलौहित्यमप्येतेनैव प्रतिबिंबस्य सत्यत्ववचनेनैव व्याख्यातं । जपाकुसुमलौहित्यस्य स्फटिके प्रतिबिंबितत्वादिति भावः ॥ अन्यथेति । वर्णेषु स्वाभाविकदैर्घ्याद्यनंगीकारे ध्वन्युपदेशवशादेव तत्र दैर्घ्यादिप्रतिभासांगीकारे स्वरेष्विव व्यंजनेष्वपि ध्वन्युपादानस्य सत्वाद्दैर्घ्यादिप्रतिभासः स्यादित्यर्थः ॥ तथात्व इति । व्यंजनस्य ध्वनिविशेषव्यंग्यत्वाभावे तद्व्यंगेषु सर्वेषु ध्वनिविशेषव्यंग्यतावच्छेदको विशेषोऽगीकर्तव्यः स्यात् । एवं च स एव विशेषो दैर्घ्यादिपदार्थोऽस्तीति न वर्णदैर्घ्यादिकं मिथ्याभूतमिति भावः । श्रुत्यर्थो नेहनानेति श्रुत्यर्थः ॥ अन्यथेति । नेह नानेत्यस्य विशेष्यनिषेधपरत्वे नेहास्ति किंचनेत्येतावता पूर्णत्वेन नानात्वविशेषणोपादानवैयर्थ्यं स्यादतस्तदुपादानबलात्किंचनशब्दोपात्तगुणकर्मादेर्नानात्वरूपविशेषणनिषेध एव श्रुत्यर्थोऽवगम्यत इति भावः । यत्र विशिष्टोपादानं तत्र विशेषणनिषेध एव निषेधवाक्यार्थो दृश्यते चेत्याह ॥ न जीर्णमलवद्वासा इति । अत्र हि वासो न निषिध्यते । किंतु वाससो जीर्णमलवत्त्वरूपविशेषणमेवेति भावः ।

नन्वत्र विशेषणनिषेध इति वदता जीर्णत्वे सति मलवत्त्वरूपं विशेषणं निषिध्यत इत्युच्यते । अहोस्विज्जीर्णत्वं मलवत्त्वं चैकैकं विशेषणं । नाद्यः । एकैकविशिष्टस्य वासस उपादानत्वप्रसंगात् । न द्वितीयः । वाक्यभेदप्रसंगात् । तस्मान्नेदं वाक्यं निषेधपरं किंतु पर्युदासलक्षणया जीर्णमलवत्त्वविशिष्टवाससो विधिरेवेति चेन्मैवं । स्नातको जीर्णमलवद्वासा न स्यादिति विशिष्टनिषेधे विशेषान्वयितयांऽगीक्रियमाणे नग्नस्याप्यन्वयापातेन विशेषणमात्रान्वयितयांऽगीकर्तव्येऽर्थादेवैकैकविशेषणनिषेध इति स्वीकारात् ॥ विशेष्यमिति । अभिधापदशक्तिर्विशेषणे जातावेव प्रथमोपस्थितायां क्षीणशक्तिः सती विशेष्यभूतां व्यक्तिं न गच्छेदित्यर्थः । तद्वत्प्रकृतेऽपि विशेषणसंक्रांतो निषेधो न विशेष्यमुपसंक्रामतीति भावः । ननु यदि विशिष्टनिषेधे गौरवाद्विशेषणस्य प्रथमप्राप्तत्वादिना नेह नानेत्यत्र विशेषणनिषेध एवेत्युच्यते । तर्ह्यनेन न्यायेन क्वचिदपि विशिष्टविधिस्तन्निषेधो वा न स्यादित्यत आह ॥ यत्किंचिदिति । कुंडपायिनामयने उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीत्यादौ यद्विशिष्टविध्याद्यंगीकरणं तद्गत्यंतराभावेनैवासन्निहितं तावन्नैत्यमिकाग्निहोत्रं बुद्धौ न परिवर्तते । तादृशमपि तत्प्राप्तवन्निर्देशेन जुहोतीत्यनेनोपस्थाप्येत । यदि यदावहनीये जुहोतीत्यादाविव विधित्सितो गुण उपादेयः स्यात् । न चैवं । मासस्यानुपादेयत्वात् । न हि होमानुरोधेन मासः संपादयितुं शक्यः । अत एतादृशस्थले प्राप्तकर्मानुवादेन गुणमात्रविधानादिरूपगत्यंतराभावेन विशिष्टविध्याद्यंगीकरणमिति भावः । ननु सविशेषणे हि विधिनिषेधौ विशेषान्वये बाधके सत्येव विशेषणमुपसंक्रामतः । न चात्र किंचनशब्दोपात्तस्य गुणकर्मादेर्विशेष्यस्य निषेधान्वये

किंचिद्बाधकमस्तीत्यत आह ॥ सविशेषत्वं चेति । तथा च वक्ष्यमाणं ब्रह्मणः सविशेषत्वग्राहकत्वं प्रमाणं बाधकमिति भावः ॥ अप्राप्तेति । ब्रह्मणि स्वरूपभेदस्य यथाभासप्राप्तिः संभवति तथा न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हीत्यधिकरणपूर्वपक्षे दर्शयिष्याम इत्यर्थः । प्रत्युत परस्यैव नेह नानेत्यादिश्रुत्या स्वर्गापूर्वाद्यलौकिकार्थनिषेधोऽनुपपन्नस्तस्याप्राप्तत्वादित्याह ॥ परस्येति ॥ एकामिति । एकमेवाद्वितीयमिति श्रुतावेकशब्देन स्वगतनानात्वमेवशब्देन सजातीयभेदोऽद्वितीयशब्देन विजातीयभेदश्च निषिध्यत इति वदता भवताऽपि स्वगतनानात्वस्याप्रसक्तत्वात्कथं निषेध्यत्वमित्येतच्चोद्यं समाधातव्यमित्यर्थः ॥ आश्रयेति । आश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यमित्युत्तरवाक्येऽपि शब्दमहिम्ना न केवलमज्ञानविषयकं ज्ञानं साक्षिचैतन्यं किं त्वाश्रयप्रतियोगिज्ञानमपि साक्षिचैतन्यमित्यर्थलाभेनाहमज्ञ इति प्रत्यक्षस्य साक्षित्वावगमादित्यर्थः ॥ द्वयोरिति । अज्ञानसत्त्वसाक्षिसाधकत्वयोरनादित्वेनोत्पत्तौ परस्परापेक्षत्वाभावान्नान्योन्याश्रयत्वमित्यर्थः । तत्किमेवं वदता साक्षिसाधकत्वस्याज्ञानापेक्षा यत्र कुत्रापि विषये नांगीक्रियते उतांगीक्रियत इति विकल्प्याद्यं दूषयति ॥ तर्हीति । द्वितीयं निराचष्टे ॥ अपेक्षायामिति ॥ यदीति । ज्ञानकरणं फलं जन्यज्ञानं नित्यं वा ज्ञानं यत्साधकं तत्सर्वं जात्यादिरूपधर्मयुक्तमेवेत्यर्थः ॥ प्रकाशेति । अविशेषवादिमते साक्षिरूपप्रकाशस्याज्ञानं प्रत्याश्रयत्वाभावेन प्रकाशाधिष्ठानकं तमः (अज्ञान) प्रकाशेनैव सिध्यतीत्यस्यार्थस्य परं प्रति भवतोपपादयितुमशक्यत्वादित्यर्थः ॥ साक्षादिति । साक्षाच्छब्दाद्द्रष्टरि वाच्ये इनिप्रत्यये । अव्ययानां भमात्रे टिलोप इति टिलोपे च साक्षिशब्दो निष्पन्न इति यत्साक्षिशब्दनिर्वचनं तस्यासंभवात्साक्षिणो ज्ञानविषयी-

कारित्वाभावे साक्षित्वमेवानुपपन्नमित्यर्थः । साक्षिणो ज्ञानविषयकत्वाभावे दूषणांतरमाह ॥ अतद्विषयेणेति । निर्विशेषस्यापि चैतन्यस्याज्ञानवशाद्द्रष्टृत्वरूपं साक्षित्वमस्त्वित्याशंक्य तदेतदज्ञाने सति चैतन्यस्य साक्षित्वसिद्धिः । सत्यां च तस्यामज्ञानसिद्धिरिति परस्पराश्रयेण निरस्तमित्याह ॥ निर्विशेषस्येति । एतदविशेषस्य साक्षिणः साधकत्वं तदिति साक्षिव्यतिरिक्तस्याविशेषप्रमाणस्याभावादित्यर्थः ॥ ननु चेति । अविशेषस्य साध्यासाधकता ॥ पुनरिति । पूर्ववाक्ये सविशेषस्य साधकता प्रकृता । अतः सा चाविशेषमानेनेति निर्देशः कर्तुमुचितः । न तु तच्चाविशेषमानेनेति भावः । भवेदेतच्चोद्यावकाशो यद्यत्र तच्छब्देनाविशेषस्य साधकतैव परामृश्येत । न चैवं किं नाम यत्तावन्मिथ्याभूतस्य साधकत्वं साधकप्रमाणविकल्पनिरासेन निरस्तं तत्सविशेषत्वादिति विकल्पनिरासेनापि निराकर्तव्यमिति सूचयितुं मिथ्याभूतस्य साधकत्वमपि परामृश्यते । अतः सामान्ये नपुंसकनिर्देशोपपत्तिरित्याशयेन परिहरति ॥ सत्यमिति ॥ एतेनेति । एतेनाविशेषस्य साधकत्वनिरासेन मिथ्याभूतस्य साधकत्वं सता प्रमाणेन साध्यत इति पक्षे आत्मरूपेण सता वा तदन्येन वेति प्राग्विकल्पितयोः पक्षयोर्मध्ये तदन्येनेति पक्षे द्वैतसिद्धिः स्यादित्यनेन दूषिते सत्यवशिष्टो यः परमात्मरूपेण सतेति पक्षः स निराकृतो वेदितव्य इत्यर्थः । विश्वसत्यतामनंगीकुर्वतामित्यस्य व्याख्यानमात्मातिरिक्तस्य सर्वस्यापि मिथ्यात्वं प्रतिपादयतामिति न वादितेत्यस्य व्याख्यानं न साधकतेति । ननु मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्येत्युपक्रमे प्रकृतमेकवचनं त्यक्त्वाऽनंगीकुर्वतामित्युपसंहारे बहुवचनं किमर्थं प्रायोजीत्यत आह ॥ तद्वाक्यस्येति ॥ अन्यथेति । चार्वाकबौद्धमायावादिनामापादनविषयत-

याऽनभिप्रेतत्वे मायावादिन एव तद्विषयतयाऽभिप्रेतत्वेऽनंगीकुर्वत इत्येवावक्ष्यन्न त्वनंगीकुर्वतामिति निर्देशं कुर्यादित्यर्थः । मायावादिन एवापादनविषयतयाऽभिप्रेतत्वेऽप्यनंगीकुर्वतामिति बहुवचनं युज्यते । व्यक्तिबाहुल्याभिप्रायेणेत्यत उक्तं ॥ त्वयेति । सता वा साध्यते त्वया । साधकत्वं सतस्तेनेति पूर्वत्र जात्यैकवचनस्य प्रस्तुतत्वादत्रापि तदेव प्रयोक्तव्यं स्यादिति भावः ॥ व्याघातादिति । प्रमेयाभावे तत्सत्ताघटितप्रामाण्यायोगेन प्रमेयं नास्ति प्रमाणमस्तीत्यस्य व्याहतत्वादिति भावः ॥ न प्रथम इति । व्यवहारमात्रं प्रमाणादिसत्ताभ्युपगमव्याप्तमिति प्रथमपक्षे व्यवहारत्वेन मायावादिव्यवहारस्य प्रमाणादिसत्ताभ्युपगमपूर्वकत्वं व्यवहर्तृत्वेन मायावादिनो वा प्रमाणादिसत्ताभ्युपगंतृत्वं तस्यैव तदनभ्युगंतृत्वेन व्यवहर्तृत्वाभावो वा तदीयव्यवहारस्य वा प्रमाणादिसत्ताभ्युपगमपूर्वकत्वराहित्येन व्यवहारत्वाभावः साध्यत इत्युक्तं स्यात् । तत्तु न संभवति । प्रमाणादिसत्तामनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेर्वाग्व्यवहारदर्शनेन व्यवहारत्वस्य प्रमाणादिसत्ताभ्युपगमपूर्वकत्वराहित्यस्य च तदीयव्यवहारे व्यवहर्तृत्वस्य प्रमाणादिसत्तानभ्युपगंतृत्वस्य च चार्वाकादौ व्यभिचारादित्यर्थः । यद्यपि तदनभ्युपगच्छत इत्यत्र तच्छब्देन प्रकृतप्रमाणादिसत्तापरामर्शे तामिति निर्देष्टव्यं न तु तदिति । तथाऽपि तां प्रमाणादिसत्तामनभ्युपगच्छन् तदनभ्युपगच्छन्निति द्वितीयासमासोऽयं । श्रितादिषु गम्यादीनामुपसंख्यानमित्युक्तेरतो न कश्चिद्दोष इति द्रष्टव्यं ॥ तस्येति । यद्यपि वाग्विस्तराणामिति बहुवचनस्य प्रस्तुतत्वात्तेषामिति वक्तव्यं । तथाऽपि चार्वाकमाध्यमिकादिवाग्विस्तराणां वैदिकसिद्धांतविरोधित्वेनैकत्वं दर्शयितुं तस्येत्येकवचनं प्रयुक्तमिति द्रष्टव्यं । ननु चार्वाकवाग्विस्तरादेरपि

पक्षत्वान्न तत्र व्यभिचार इत्यत आह ॥ तस्यापीति । तत्र प्रमाणादिसत्ताभ्युपगमपूर्वकत्वादिराहित्यस्य निश्चितत्वाद्बाध इति भावः ॥ द्वितीय इति । साधनबाधनक्षमव्यवहारः प्रमाणादिसत्ताभ्युपगमव्याप्त इति द्वितीयपक्षे साधनबाधनक्षमव्यवहारत्वेन मायावादिव्यवहारस्य प्रमाणादिसत्ताभ्युपगमपूर्वकत्वं साध्यत इत्यादिकमुक्तं स्यात् । तच्च न संभवति । मायावादिनः प्रमाणादिसत्ताभ्युपगमो नास्तीति निश्चितत्वेन बाधतादवस्थ्यादित्यर्थः ॥ हेतुरिति । साधनबाधनक्षमव्यवहारस्वरूपहेतुः पक्षीकृते मायावादिव्यवहारे तव तत्त्ववादिनोऽसिद्ध इत्यर्थः ॥ व्यतिरेके चेति । मायावादिव्यवहारो न साधनबाधनक्षमः प्रमाणादिसत्ताभ्युपगमपूर्वकताशून्यत्वादिति व्यतिरेकसाधने समीचीनवचनवदाभासमानं तल्लक्षणरहितं सद्वचनाभासस्य यल्लक्षणं तद्वत्त्वमुपाधिरित्यर्थः । साधनबाधनक्षमत्वरूपसाध्यं प्रति प्रमाणादिसत्ताभ्युपगमपूर्वकताशून्यत्वरूपहेतुरप्रयोजकः । सद्वचनाभासलक्षणयोगित्वरूपोपाधिरेव प्रयोजक इत्युपपादयति ॥ यत इत्यादिना । प्रमाणादिसत्तामभ्युपगम्यापि नैय्यायिकमतांतरानुसारिभिः प्रवर्तिता व्यवहारा अभ्युगतप्रमाणादिसत्त्वे मीमांसकादिमतांतरानुसारिभिरन्यैः सद्वचनाभासलक्षणवत्त्वं प्रदर्श्य साधनाद्यक्षमा इति कथ्यंते यतस्तेन ज्ञायते व्यवहारस्य साधनाद्यक्षमतायां सद्वचनाभासलक्षणयोगित्वमेव प्रयोजकं न तु सत्ताभ्युपगमराहित्यमिति । अन्यथोक्तस्थले साधनबाधनाद्यक्षमत्वं न स्यादिति भावः ॥ ननु यदिति ॥ प्रमाणादिसत्ताऽनभ्युपगमे प्रमाणादीनि न संतीत्यंगीकृतं स्यात् । तथा च प्रमाणाद्यभावे तत्साध्यव्यवहारात्मककथैव न सिध्यतीति तत्र व्यभिचाराद्युद्भावनं दूर इति भावः ॥ दूषणादीति । अत्रेदं दूषणमस्त्यत्र तु नास्तीति व्यवस्था

प्रमाणाद्यसत्वे न स्यात् । सकलविधिनिषेधानां प्रमाणाधीनसिद्धिकत्वात् । तथा च सद्वचनाभासलक्षणयोगित्वस्योपाधित्वं तद्व्यतिरेकस्य प्रतिपक्षत्वं च न संगच्छते । तयोर्लब्धात्मकत्वाभावादिति भावः । सत्त्वासत्त्वोदासीनप्रमाणादिस्वरूपांगीकारमात्रेण कथानिष्पत्तिर्दूषणादिव्यवस्था च संभवतीत्यभिप्रेत्य परिहरति ॥ मैवमिति ॥ इदमिति । प्रमाणसत्ताभावे साधनादिकमव्यव-हारो न स्यादिति दूषणमित्यर्थः । इदं दूषणं कथानिष्पत्त्यभावरूपं दूषणं ॥ स्वस्याप्यापत्तेरिति । प्रमाणाद्यसत्वस्य स्वेनाप्यंगी-कृतत्वेन स्वस्यापि धर्माद्यसिद्धिरूपदूषणापत्तेरित्यर्थः ॥ तथैवेति । तद्यथैकेन प्रमाणादिसत्त्वमपरेण च तदसत्त्वमंगीकृत्य प्रवृत्तायां कथायां प्रमाणादिसत्ताभ्युपगमरूपकारणशून्यस्य तत्कार्यकथाप्रवृत्तिरेव नेति दूषणमुच्यते तथा प्रकृतकथेव प्रमाणादिसत्ताभ्यु-पगमस्य कथाप्रवृत्तिसाधनत्वसाधनाय कथांतरं प्रसज्येतेत्यर्थः । यद्वा । एकेन प्रमाणादिसत्त्वमपरेण च तदसत्त्वमंगीकृत्य प्रवर्तितकथावत्प्रमाणादिसत्ताभ्युपगमपूर्वकत्वरहितकथांतरप्रसंगादित्यर्थः । तथा च प्रमाणादिसत्तामनंगीकुर्वतः कथकता ने-त्ययुक्तमिति भावः ॥ व्याघात इति । कथायां प्रवृत्तं प्रति कथाऽनधिकाररूपदूषणोक्तौ व्याघात इति भावः ॥ प्रतिवादिन इति । येन व्याघातः स्यादिति शेषः ॥ कथं चेति । प्रमाणादिसत्ताऽनभ्युपगंतुश्चार्वाकादेरयं दोष इति शिष्यान्प्रत्यभिधानं कथं स्यान्न कथंचिदित्यर्थः । तत्र हेतुमाह ॥ तस्येति । तस्य चार्वाकादेः कथाप्रवेशेऽगीकृते तदधिकारस्यैव सत्वेन कथाऽ नधिकाररूपदोषस्य शिष्यैर्बोद्धुमशक्यत्वात् । अनंगीकृते तु तस्मिन्कथाबाह्यस्य निग्रहत्वाभावादेव तद्दोषस्य ज्ञातुमशक्यत्वा-दित्यर्थः । तस्य चार्वाकादेरयं दोष इत्यभिधानस्य चार्वाकादेः कथाप्रवेशाप्रवेशयोः कथाऽनधिकाररूपदोषबोधजननाक्षमत्वात् ।

कथाप्रवेशपक्षे कथाऽनधिकारस्यैवाभावेनाप्रवेशपक्षे तु कथाबाह्यस्य दोषत्वाभावेनेति वा योज्यं ॥ तच्चेति। तत्त्वावधारणादिरूपं फलमित्यर्थः। ताभ्यां कथकाभ्यां। इत्थमेव व्यवहारनियमादेवेत्यर्थः॥ विचारेति। विचारप्रवृत्तिं विना व्यवहारप्रामाण्यस्य ज्ञातुमशक्यत्वादित्यर्थः। ततः किमित्यत आह॥ तदर्थमिति। विचारप्रवृत्त्यर्थमेव विचारात्मककथातः पूर्वं तत्कारणनियमस्य गवेषणाद्विचार्यमाणत्वात्। तथा च तद्विचारावसरे कथासाध्यप्रामाण्यनिश्चयानंतरभाविनः प्रमाणादिसत्ताभ्युपगमस्य कथाकारणकोटौ निवेशो नेति निश्चीयत इति भावः। यद्वा। विचारप्रवृत्त्या लोकव्यवहारप्रामाण्यनिश्चये तत्सिद्धप्रमाणादिसत्ताभ्युपगमोऽस्त्वित्यत आह। तदर्थमितीत्यवतार्याभिप्रायः पूर्ववदेव वर्णनीयः॥ व्यभिचारेति। व्यभिचारस्थलस्य चार्वाकादेः प्रसंगविषयमायावादितुल्यतांऽगीकृता तस्याप्यापादनविषयतांऽगीकृतेति यावत्। ननु चार्वाकादेर्वादित्वस्य प्रत्यक्षसिद्धत्वात्तदभावापादने बाध इत्यत आह॥ बाधस्त्विति। तत् बाधासिद्ध्यादिकं। पूर्वोक्तः सद्वचनाभासलक्षणयोगित्वरूपः। कथंचिदित्यनेन तस्योपाधित्वे सूचितमस्वारस्यं दर्शयति॥ किंचेति। अयं सद्वचनाभासलक्षणयोगित्वरूपोपाधिः प्रमाणादिसत्ताभ्युपगमराहित्यरूपसाधनान्न भिद्यते। प्रमाणादिसत्ताभ्युपगमराहित्ये तदसत्त्वमेवांगीकृतं। तथा च प्रमाणादीनां स्वरूपासिद्धत्वं हेतुवाक्येनोक्तं भवति। तच्च सद्वचनाभासलक्षणविशेष एवेति। अतः साधनाभिन्नत्वेन तदव्यापकत्वाभावान्नायमुपाधिरिति भावः। यद्यपि स्वरूपासिद्धेरर्थदोषत्वान्न सद्वचनाभासलक्षणविशेषत्वं तथाऽप्यर्थद्वारा वचनं प्रत्यपि दोषत्वात्तदिति ध्येयं। एतेनेति शब्दपरामृष्टं हेतुमाह॥ प्रतिवादिन इति॥ आद्यमिति। प्रमाणव्यवहार-

सिद्धत्वादित्याद्यमंगीकुर्म इत्यर्थः ॥ तत्रोक्तमिति । प्रमाणव्यवहारसिद्धत्वात्प्रमाणादिसत्ताभ्युपगंतव्येति पक्षे विचारप्रवृत्ति-मंतरेण व्यवहारप्रामाण्यस्य ज्ञातुमशक्यत्वादित्यादिना विचारात्मकथासाध्यप्रामाण्यनिश्चयानंतरभाविनः प्रमाणादिसत्ताभ्युप-गमस्य कथाप्रवृत्तिकारणत्वमिति यदुक्तं तद्दूषितप्रायं । अस्माभिरपि प्रमाणादिसत्ताभ्युपगमस्य कथाकारणकोटिनिविष्टत्वानंगी-कारादिति भावः । द्वितीयांगीकारेऽपि पामरादिसाधारणव्यवहारसिद्धत्वादिति द्वितीयांगीकारेऽपि । तस्यैव व्यवहारस्यैव ॥ प्रमाणैरिति । प्रमाणैर्व्यवहर्तव्यमिति नियमबंधनं प्रमाणानां प्रमापेक्षया नियतपूर्वसत्त्वरूपं कारणत्वमनादाय न पर्यवस्य-तीत्यर्थः । तत्र हेतुः ॥ प्रमाणेति । प्रमाणानां करणत्वस्य प्रमाणैर्व्यवहर्तव्यमिति नियमेंऽतर्भूतत्वात्करणत्वस्य च कारणविशेषरूपत्वादिति भावः । इत्येवमाशंक्यैभिरपि बाधकैः कथायामारब्धायामाभिमतस्य प्रसाधनीयत्वे पूर्वोक्तबाधाया न निस्तारः स्यादिति यदुक्तं तदप्यनेनैव परिहृतमित्यन्वयः । इदंशब्दपरामृष्टं हेतुमाह ॥ कथेति । व्यवहारनियमबंधनदशायां प्रमाणादिसत्त्वमभ्युपगम्यापि मया प्रमाणादिसत्त्वं नांगीक्रियत इति यो वदति तस्य स्वव्याघातो वर्तमानमपि स्वव्याघातम-जानानं कथायां प्रवृत्तं परं प्रति स्वव्याघातस्फुटीकरणाय कथास्वरूपस्य तत्फलस्य च निष्पत्तये स्वेच्छास्वीकृतस्य व्यवहार-नियमस्य प्रमाणादिसत्तास्वीकारे पर्यवसानमित्यतो वाऽस्माभिरुच्यमानत्वात्परस्य कथाप्रवृत्तिरेव नेत्यस्यानुच्यमानत्वादित्यर्थः । तथा च कथायां प्रवृत्तायां परस्य कथाप्रवृत्तिरेव नेत्युक्ते व्याघात इति पूर्वोक्तबाधाया अनवकाश इति भावः । तत्प्रामाण्ये श्रुतिप्रामाण्ये । तर्कस्य कथांगभूतप्रमाणादेः सत्त्वाभावे कथालक्षणं कार्यं न निष्पद्येतेति तर्कस्य। तस्यां चेति। तर्कस्याभासत्व-

सिद्धौ सत्यां तर्कविरोधाभावेन श्रुत्यादिप्रामाण्यसिद्धिरिति भावः । ननु प्रमाणादेः सत्त्वाभावेऽपि कथालक्षणकार्यं प्रति कारणत्वं किं न स्यादित्यत आह ॥ असत इति । असतः कारणत्वं तु नासतोऽदृष्टत्वादित्यादौ सूत्रकृतैव निराकरिष्यत इति नास्माभिस्तन्निराकरणे यत्नः कर्तव्य इति भावः ॥ पूर्वस्येति । अनेन पूर्ववदिति मूले वतिप्रत्ययस्तत्र तस्यैवेत्यनुशा-सनात्तस्यैवेत्यर्थ इत्युक्तं भवति ॥ पुरुषेति । पुरुषत्रयावगमे पुरुषांतरेण तस्यापि पुरुषत्रयावगतस्यापि बहुलं बाधदर्शनात्त-स्यापि पुरुषत्रयस्याप्येकक्षणावगतस्य क्षणांतरे बहुलं बाधदर्शनादित्यर्थः ॥ न चेति । असत्योऽप्यसौ पुरुषत्रयावगतोऽर्थो द्वित्रादिपुरुषमात्रस्य पूर्वं ज्ञाता या सत्ताप्रतीतिस्तदनुरोधाद्बाधदर्शने संजातेऽपि तथैव सन्निति न ह्यभ्युपगम्यत इत्यर्थः ॥ प्रतीतेरिति । प्रतीतेः पारमार्थिकत्वेन मुख्यसत्त्वादमुख्यसत्येव सत्प्रतीतेः सत्तारूपत्वांगीकारात्तस्याः प्रतीत्यंतरं न वाच्यमिति नानवस्थेति भावः । किंच प्रतीतेः स्वरूपभेदाभावात्सत्प्रतीतेः प्रतीत्यंतरमेव सत्तेत्येतदेव वक्तुं न शक्यत इत्याह ॥ न चेति ॥ एवमिति । ज्ञानसत्यताऽपि तद्विषयस्यार्थक्रियाकारितायामप्रयोजिका शुक्तिरजतादेरपि स्वोचितार्थक्रियाकारित्वप्रसंगादित्यर्थः ॥ इतरेतराश्रयेति । अर्थक्रियाया असत्त्वसिद्धौ प्रपंचस्यासत्त्वेऽर्थक्रियाकारित्वं न स्यादिति तर्कस्यान्यथासिद्धत्वेनाभासतया तद्विरोधाभावाच्छ्रुतेः प्रामाण्यसिद्धिः । तत्सिद्धौ चार्थक्रियाया असत्त्व-सिद्धिरितरेतराश्रयेणादिशब्दोपात्तचक्रकेण निरस्तमित्यर्थः । चक्रकमुक्तरीत्योपपादितप्रायं । शंकते ॥ नेति । अमुख्यं सदसन्न नापि सदित्यर्थः ॥ वादिन इति । मायावादिमते विश्वसदसद्वैलक्षण्यसाधकस्य सत्त्वाभावादिति भावः

॥ नन्विति । विश्वस्य सदसद्वैलक्षण्यं सदसद्विलक्षणेन प्रमाणेन साध्यत इति तृतीपक्षेऽसंप्रतिपत्तिं वदता तत्त्ववादिना विश्वसदसद्वैलक्षण्यसाधकं प्रमाणं यदि सदसद्विलक्षणं स्यात्तर्हि साधकं न स्यादित्यनिष्टप्रसंगो मायावादिनं प्रति वक्तव्यः । न च तत्र प्रसंगे मूलभूतापाद्येनापादकस्य व्याप्तिरस्ति । सदसद्वैलक्षण्यरूपापादकस्याप्रमितत्वेन तयोः सहचारानुपलंभादित्यर्थः ॥ व्यतिरेकेति । आपाद्यव्यतिरेकस्य साधकत्वस्यापादकव्यतिरेकस्य सदसद्वैलक्षण्याभावस्य च साक्षिण्यवधारणोपपत्तेरित्यर्थः । साक्षिणि व्याप्त्यवधारणोपपत्तेरिति पाठेऽप्ययमेवार्थोऽनुसंधेयः । यद्यपि व्यतिरेकव्याप्त्यवधारणं नानुमानांगं । तथाऽपि तयाऽन्वयव्याप्तिरनुमेयेत्यत्र तात्पर्यं । न च वाच्यमापादकस्यासत्त्वेन तन्निष्ठव्याप्तेरप्यसत्त्वान्नानुमासंभव इत्यापादकस्यासत्त्वेऽप्यापाद्येन विनाभावो नास्तीत्येवंरूपाविनाभावलक्षणव्याप्तेः सत्त्वेन तदनुमितिसंभवादिति । वस्तुतस्तु स्वन्यायैः साधनं कार्यं परन्यायैस्तु दूषणमित्युक्तेः परीत्याऽनिष्टप्रसंजनरूपदूषणस्य कर्तव्यत्वात् । परमते च व्यतिरेकव्याप्तेरंगत्वात्पररीत्या व्यतिरेकव्याप्त्यवलंबनेनानिष्टापादनं कृतमिति ध्येयम् । विश्वसदसद्वैलक्षण्यसाधकप्रमाणं सदसद्विलक्षणमिति वदता तस्य प्रमाणस्य सत्त्वाभावोऽङ्गीकृत एव । अतस्तेनैव साधकत्वाभावापादने न कश्चिद्दोषः । आपाद्यापादकव्याप्तेरत्यंतासति सुग्रहत्वादित्याभिप्रेत्याह ॥ सत्त्वाभाव इति ॥ तस्येति । असत्त्वस्य सत्त्वाभावरूपसाधनाभिन्नत्वेन तद्व्यापकत्वाभावान्नोपाधित्वमिति भावः । ननु सत्त्वाभाववत्यनिर्वचनीयेऽसत्त्वाभावान्न तस्य सत्त्वाभावानतिरेक इत्यत आह ॥ तद्भंगस्येति । अनिर्वचनीयस्याद्याप्यसिद्धतया तत्सिद्धेः प्रागसत्त्वस्य सत्त्वाभावानतिरेकभंगस्य वक्तुमशक्यत्वादित्यर्थः ॥ प्रागिति । अनिर्वाच्यसिद्धेः प्राक् यत्र

सद्वैलक्षण्यं तत्रासत्त्वं यत्रासद्वैलक्षण्यं तत्र सत्त्वमिति व्याप्तिद्वयस्य निरासायोगादित्यर्थः । भेदवादिनो भावाभावभेदवादिनः । भावभेदवादिनो भावानां परस्परं भेदवादिनः । अभावभेदवादिनोऽभावानां परस्परं भेदवादिनः ॥ अंश इति । भावरूपपक्षेऽभावत्वानधिकरणत्वांशेऽभावरूपपक्षे भावत्वानाधिकरणत्वांशे सिद्धार्थतया परस्य निग्रहादित्यर्थः ॥ असिद्धेति । असिद्धेन सहोक्तावपि सिद्धस्यांशस्य सिद्धत्वानपायात्तदंशे सिद्धसाधनं दुर्वारमिति भावः । भावत्वानधिकरणत्वविशिष्टाभावत्वानधिकरणत्वस्य साधनान्न सिद्धसाधनं विशिष्टस्यासिद्धत्वादिति शंकते ॥ विशिष्टेति ॥ तथाऽपीति । सिद्धसाधनतापरिहारेऽपि विवादविषयस्यैव साध्यतया निर्देष्टव्यत्वेन विवादाविषयस्यापि विशेषणतया विशेष्यतया वा साध्यकोटावुपादाने वैय्यर्थ्यस्यानिस्तारादित्यर्थः । उक्तदोषो वैय्यर्थ्यरूपदोषः ॥ किंत्विति । किंतु भावाभावव्यत्यासमात्रं साधितमित्यर्थः ॥ तत्साधनमिति । भावाभावव्यतिकरसाधनं च प्रकृतानिर्वचनीयसिद्धावनुपयुक्तमित्यर्थः ॥ भावाभावेति । भावाभिमतस्याभावत्वानधिकरणत्वेऽभावाभिमतस्य भावत्वानधिकरणत्वे च वादिप्रतिवादिसंमते सतीत्यर्थः ॥ नोक्तदोष इति । भावाभावव्यतिकरमात्रसाधनं कृतं स्यात् । तच्च प्रकृतानुपयुक्तमित्युक्तदोषो नेत्यर्थः । ॥ भावस्यैवेति । अभावस्य तु नाभावत्वानाधिकरणत्वं प्रमितं किं त्वभावत्वं प्रमितमित्येवार्थः ॥ अभावस्यैवेति । भावस्य तु न भावत्वानधिकरणत्वं प्रमितं किंतु भावत्वं प्रमितमित्येवार्थः । विपरीतेन प्रमाणबाधितेनासौ प्रतिज्ञार्थः । शंकते ॥ सांव्यावहारिकतेति ॥ अन्यथेति । अनुमानबाधाज्ज्ञातत्वाभावत्वगोचरप्रमाणस्य सांव्यावहारिकविषयत्वकल्पने भावत्वाभावत्वविषयस्य प्रमाणस्य सांव्यावहारिकवि-

षयत्वसिद्धौ तद्बाधाभावसिद्धिस्तत्सिद्धौ चानुमानप्रामाण्यसिद्धिस्तत्सिद्धौ च तद्बाधाभावत्वाभावत्वविषयस्य प्रमाणस्य सांव्यावहारिकविषयत्वसिद्धिरिति चक्रकस्यान्योन्याश्रयस्य च प्रसंगादित्यर्थः । अन्योन्याश्रय उपपादितप्रायः ॥अतिप्रसंगाच्चेति। वन्ह्यनौष्ण्यतात्त्विकतासाधकानुमानबाधेन तदौष्ण्यग्राहि प्रत्यक्षमपि सांव्यावहारिकविषयकं स्यादित्यतिप्रसंगाच्चेत्यर्थः॥ अनिष्टेति। सत्त्वानधिकरणत्वे साध्यमानेऽसत्त्वापत्त्या परस्यैवानिष्टमित्युक्तस्यानिष्टस्यानिस्तारादित्यर्थः । यद्वा । असत्त्वानधिकरणत्वे वादिप्रतिवादिसिद्धे सत्त्वस्यैवावगतत्वेन सत्त्वानधिकरणत्वसाधने बाधरूपानिष्टानिस्तारादित्यर्थः । सांव्यावहारिकसत्त्वविषयोऽवगमस्तत्त्वविषयेणानुमानेन बाध्यत इति तु निरस्तं ॥ चतुर्थेनेति। अविशेषितसत्त्वानधिकरणत्वमिति चतुर्थपक्षनिराकरणमप्येवमेव पूर्वोक्तरीत्या व्याख्येयमित्यर्थः॥ स्वीकार इति । एकस्मिन्ननेकसर्वसत्त्वस्वीकारे एकस्यानेकसर्वसत्त्वाश्रयत्वं तत्तत्सत्त्वाश्रयवस्त्वैक्यं विना न संभवतीति तदैक्यापत्त्या भेदभंगादित्यर्थः। स्वोपाधौ स्वाधिष्ठाने परोपाधौ स्वाधिष्ठानादन्यत्र तत्प्रतियोगित्वात्। यद्यपि स्वाधिष्ठाने विद्यमानस्य घटादेः परोपाधौ न तावत्प्रागभावप्रध्वंसरूपप्रतिषेधौ संभवतस्तयोः प्रतियोगिसत्त्वादशायामनुपपत्तेः। नाप्यत्यंताभावरूपः प्रतिषेधः प्रामाणिकप्रतियोगिकस्य तस्यानंगीकारात् । तथा च परोपाधौ तत्प्रतियोगित्वादित्यनुपपन्नम्। तथाऽपि परोपाधौ तत्संसर्गनिषेधस्य सत्त्वेन परोपाधौ तत्प्रतियोगित्वादित्यस्य परोपाधिनिष्ठनिषेधप्रतियोगिसंसर्गकत्वादित्यर्थो द्रष्टव्यः । असद्वैलक्षण्ये सति सत्त्वानधिकरणत्वं वदता मया सत्त्वासत्त्वयोर्द्वयोः सर्वथा प्रतिषेधात्कथं विश्वस्य सदसत्प्रसंग इति शंकते॥ द्वयोरिति। विप्रतिषेधो व्याघातस्तत्सिद्धिरनिर्वाच्यसिद्धिः । तथा चास्मादेव हेतोः सदसद्विलक्षणरूपानिर्वाच्यसिद्धौ

विप्रतिषेधनिवारणं शक्यमिति भावः॥ वक्ष्यमाणेति । माता वंध्येति प्रतिज्ञानार्थे साधकत्वेन वक्ष्यमाणो यो हेतुस्तेनैव प्रतिज्ञातार्थसिद्धेः सुवचत्वात् । तत्रापि प्रतिज्ञायां विप्रतिषेधो न स्यादित्यर्थः ॥ तत्रेति । असंभाविते माता वंध्येत्यर्थे हेत्वाकांक्षैव नास्ति । तेन तत्सिद्धिस्तु दूर इति भावः । तत् साक्षिरूपं । तत्सत्त्वं साक्षिप्रमितं सत्त्वं । नन्वानिर्वाच्यत्वसाधकप्रमाणतर्कबलात्सदसद्विलक्षणत्वरूपानिर्वाच्यत्वे सिद्धे विश्वसत्त्वग्राहकप्रमाणस्यामुख्यसत्त्ववेदकत्वं कल्प्यत इत्यत आह ॥ परकीयेति ॥ न पादादाविति । यद्यपि तेमयावेकवचनस्येत्यत्रानुदात्तं सर्वमपादादावित्यनुवर्तमानादपादादावित्येवास्ति। तथाप्यपादादावित्यस्यार्थतो ग्रहणं कृतमिति द्रष्टव्यम् ॥ नञा निर्दिष्टमिति । नञा निर्दिष्टस्यानित्यत्वं चेदमस्थमुरित्युकारोच्चारणाज्ज्ञापकात्सिद्धं । नञा निर्दिष्टस्य नित्यत्वे हि न विभक्तौ तु स्मा इत्यस्य नित्यं प्रवृत्तेः प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञकथमुप्रत्ययमकारस्येत्संज्ञाया अप्रसक्तेस्तत्परित्राणार्थस्योकारोच्चारणस्य वैयर्थ्यं स्यात् । तस्य च सामान्यज्ञापकत्वांगीकारादपादादावित्यस्याप्यनित्यत्वोपपत्तेरभियुक्तप्रयोगानुसारेणानित्यत्वस्य व्यवस्थिततयांऽगीकारेऽतिप्रसंगाभाभावादिति ॥ द्वितीय इति । अनेकसत्त्वानधिकरणत्वमिति द्वितीये दूषणांतरमाहेत्यर्थः ॥ वैयर्थ्यादिति । इदं सदिति प्रतीतिव्यवहारयोरेकेनैव सत्त्वेनोपपत्तेरेकस्मिन्ननेकसत्त्वांगीकारस्य व्यर्थत्वादित्यर्थः॥ अनेकेति । विश्वमनेकसत्त्वानधिकरणमित्युक्ते एकैकसत्त्वानधिकरणत्वं विश्वस्य स्वीकृतं स्यात् । तथा च सद्भेदसंस्थितिरिति वा मूलस्य तात्पर्यमित्यर्थः । तृतीयस्य सर्वसत्त्वानधिकरणत्वमिति तृतीयपक्षस्य ॥ तदिति । मुख्यामुख्यसत्त्वसाधारण्येन । यदि सर्वसत्त्वानधिकरणत्वं साध्यते तदा

प्रपंचे स्वस्वगतामुख्यसत्त्वस्य विद्यमानतया तदनधिकरणत्वांशेऽपसिद्धांतःस्यादित्यर्थः । चतुर्थेऽविशेषितसत्त्वानधिकरणत्वमिति चतुर्थपक्षे तस्मादित्यस्यावृत्तिमभिप्रेत्य व्याख्याति ॥ तस्मात्कारणात्तस्मात्सत इ ति ॥ एतेनेति । ब्रह्मस्वरूपभूतसत्त्वानधिकरणत्वस्यासत्त्वाद्यनापादकतया प्रपंचेऽस्मत्संमतत्वेन ब्रह्मस्वरूपं सत्त्वमिति पक्षोऽपि निरस्त इत्यर्थः । स्फुटदूषणत्वमेव दर्शयति ॥ अर्थक्रियेत्यादिना । अर्थक्रियाकारित्वं सत्त्वमिति पक्षे साध्यमानं सत्त्वानधिकरणत्वमर्थक्रियावैधुर्यमेव साधने चार्थक्रियायाः प्रपंचे प्रमाणसिद्धत्वाद्बाधः स्फुट एवेत्यर्थः । नन्वर्थक्रियायाः प्रपंचे परमार्थतोऽसत्त्वात्तद्वैधुर्यसाधने न बाध इत्यत आह ॥ परमार्थ इति । आदिपदेनानिर्वाच्यत्वपरिग्रहः । तथा चार्थक्रियावैधुर्यसाधने तस्य ब्रह्मवत्सत्त्वेऽप्युपपत्त्याऽर्थांतरमिति भावः । किं चार्थक्रियाकारित्वं सत्त्वमिति पक्षेऽर्थक्रियारूपसत्त्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वरूपाविशिष्टसाधने सत्त्वानधिकरणपदेनार्थक्रियावैधुर्यस्यासत्त्वानधिकरणपदेनार्थक्रियासत्त्वस्य च प्राप्तेः परस्परव्याघातापत्त्या सत्त्वानाधिकरणत्वमात्रसाधनं कर्तव्यं । तत्तु न संभवति । अर्थक्रियारूपसत्त्वानधिकरणत्वमात्रसाधनस्यानिर्वाच्यविश्वांतर्गतप्रमाणादेः साधकत्वं संभवतीति प्रकृतप्रमेयेऽनुपयोगात्प्रत्युत तद्विरुद्धत्वाच्चेत्याह ॥ अर्थक्रियानधिकरणतामात्रेति ॥ ज्ञानेति । ज्ञानाबाध्यत्वं सत्त्वमिति पक्षे सत्त्वानधिकरणत्वं ज्ञानाबाध्यत्ववैधुर्यं । तच्च ज्ञानबाध्यत्वमेवेति विवादपदं सदसद्विलक्षणं ज्ञानबाध्यत्वादित्यत्र यो हेत्वर्थस्तस्मान्न भिद्यत इत्यर्थः । तथा च हेतोः साध्यावैशिष्ट्यमिति भावः । यद्यपि सद्विलक्षणत्वांशस्य ज्ञानबाध्यत्वरूपतया हेत्वर्थाभेदेऽपि सदसद्विलक्षणत्वरूपविशिष्टसाध्यस्य तदभावान्न हेतोः साध्यावैशिष्ट्यं

तथाऽपि साध्यवद्धेतोरपि संदिग्धत्वात्साध्यावैशिष्ट्यमिति द्रष्टव्यम् ॥ बाधेति । साध्यभानं बाध्यत्वं यदि स्वोपादानाज्ञाननिवृत्तिद्वारकज्ञानजन्यनिवृत्तिप्रतियोगित्वं वा प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा विवक्षितं तदा प्रपंचे तदभावेन बाधः । यदि चान्यथाविज्ञातस्य सम्यग्विज्ञातत्वं वा ज्ञानजन्यनिवृत्तिप्रतियोगित्वमात्रं वा तद्विवक्षितं तदाऽऽद्ये क्षणिकत्वादिना विज्ञातस्य प्रपंचस्य स्थायित्वादिना सम्यग्विज्ञातत्वात्सिद्धार्थता द्वितीये नित्ये प्रकृत्यादौ पक्षैकदेशे बाधः । ईश्वरज्ञानजन्यध्वंसप्रतियोगिन्यनित्यप्रपंचांशे सिद्धार्थता च स्यादिति दूषणं स्फुटमेवेत्यर्थः ॥ तत्सर्वमिति । सच्छब्देन भावं विवक्षित्वा भावविलक्षणत्वमनिर्वाच्यत्वमित्युक्ते भावस्यापि भावांतरविलक्षणत्वस्वीकारेण सिद्धसाधनत्वोक्त्या सच्छब्देन प्रतिपन्नोपाधौ निषेधाप्रतियोगिनं गृहीत्वा तद्विलक्षणत्वरूपं प्रतिपन्नोपाधौ निषधप्रतियोगित्वमनिर्वाच्यत्वमित्युक्ते स्वोपाधौ निषेधाप्रतियोगित्वादित्यनेन बाधस्योक्तप्रायतया सच्छब्देन मूर्तमुपादाय मूर्तविलक्षणत्वमनिर्वाच्यत्वमित्युक्ते मूर्तस्यापि मूर्तांतरविलक्षणत्वस्वीकारात्सिद्धसाधनमित्यस्यार्थस्योक्तप्रायतया च तत्सर्वं निरस्तमित्यर्थः । व्यवच्छिनत्ति पराभिमतं ज्ञानबाध्यत्वमिति शेषः ॥ स चेति । नाश्यत्वमात्ररूपो हेतुरुक्तबाधकेन सतो विनाशे चैतन्यस्यापि नाशप्रसंग इत्युक्तबाधकेनानिर्वचनीयत्वरूपसाध्यं प्रति नाप्रयोजक इत्यर्थः । उक्तबाधकसाध्य इति पाठे उक्तबाधकसाचिव्ये सतीत्यर्थः ॥ प्रपंचेऽस्तीति । तथा च प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं बाध्यत्वमिति पक्षे न प्रतिवादिनोऽसिद्धिः । श्रुतिप्रतिपन्नस्य तस्य प्रतिवादिनाऽप्यंगीकर्तव्यत्वादिति भावः ॥ तुशब्द इति । तुशब्दः पराभिमतं ज्ञानबाध्यत्वं सिद्धांत्यभिमताज्ज्ञानबाध्यत्वाद्व्यवच्छिनत्तीत्यर्थः । ननु

प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं बाध्यत्वमिति न शुक्तिरजतादौ साध्यवैकल्यं । नास्त्यत्र रजतं किं तु मिथ्यैव रजतमभादित्युत्तरकालानुसंधानेन तस्य तत्र सत्वादिति शंकते ॥ नन्विति ॥ तथा सतीति । शुक्तिरजतादेः स्वाधिष्ठानादन्यत्राविद्यमानस्य स्वाधिष्ठानेऽपि निषेधप्रतियोगित्वे सार्वकालिकसार्वदेशिकनिषेधप्रतियोगित्वस्यापि तत्त्वेनात्यंतासत्त्वप्रसंगादित्यर्थः ॥ यदीति । शुक्तिरजतादेर्यदि न बाध्यत्वं तर्हि सकललोकविरोधादिप्रसंगादित्यर्थः । बाढं ननु सकललोकविरोधादिप्रसंग इति पाठे शुक्तिरजतादेर्यदि न बाध्यत्वं तर्हि बाढं सकललोकविरोधादिप्रसंगो नन्वित्यर्थः । ननु विज्ञातस्यान्यथासम्यग्विज्ञानं ह्येव तन्मतमित्यत्र तच्छब्देन बाध्यत्वपरामर्शेऽन्वयानुपपत्तिः । अन्यथाविज्ञातस्य यत्सम्यग्विज्ञानं तस्य बाधरूपतया बाध्यत्वरूपत्वाभावाद्बाधपरामर्शे च तस्याप्रकृतत्वं बाध्यत्वमिति पूर्वत्र प्रकृत्यर्थतया (त्वप्रत्ययप्रकृत्यर्थांतर्गततया) बाधस्य प्रकृतत्वेऽपि तत्परामर्शे तदिति नपुंसकलिंगानुपपत्तिरित्याशंक्य व्याचष्टे ॥ बाध्यत्वमिति । प्रकृतेत्यनेन बाधस्याप्रकृतत्वात्कथं परामर्श इति शंकासामान्येनेत्यनेन बाधपरामर्शे नपुंसकलिंगानुपपत्तिरिति शंका च निरस्ता ॥ विरोधीति । अध्यस्तस्य रजतत्वादेर्विरोधि यद्भावांतरं शुक्तित्वादि तज्ज्ञानमित्यर्थः । ननु प्रत्येकमव्यापकत्वं तदा स्याद्यद्येकस्थलेऽपरस्याभावः स्यात् । न चैवं । प्रत्यक्षेणाध्यस्तवस्त्वभावावबोधेऽध्यस्तविरोधिभावांतरस्य शुक्तित्वादेः स्फुरणावश्यंभावात्प्रत्यक्षेणाध्यस्तविरोधिभावांतरज्ञाने वाऽध्यस्तवस्त्वभावभानावश्यंभावाच्चेत्यत आह ॥ शब्दादाविति । शाब्दे आनुमानिके वा नेदंरजतमित्यध्यस्तवस्त्वभावज्ञाने बाधत्वेन प्रसिद्धेऽध्यस्तवस्तुविरोधिभावांतरज्ञानत्वाभावाच्छब्देऽनुमानजन्ये वाऽध्यस्तवस्तुविरोधिभा- ॥३६॥

वांतरविषयके इयं शुक्तिरिति ज्ञाने बाधत्वेन प्रसिद्धेऽध्यस्तवस्त्वभावबोधत्वाभावात्प्रत्येकमव्यापकमेवेति भावः ॥ तस्मादिति । पूर्वोक्तयोर्लक्षणयोः प्रत्येकमव्यापकत्वादुभयानुगतमध्यस्तवस्त्वभावबोधेऽध्यस्तविरोधिभावांतरज्ञानेच्छानुगतमन्यथाविज्ञातस्य सम्यग्विज्ञानं बाध इत्येतल्लक्षणमुच्यत इत्यर्थः । उभयानुगतत्वमेव दर्शयति ॥ रजतत्वादिनेत्यादिना सम्यग्विज्ञानं भवत्येवेत्यंतेन ॥ सर्वमिति । प्रागन्यथाज्ञानं विनैवायं घटोऽयं पट इत्यादिसम्यग्ज्ञानं यज्जायते तदपि बाधः प्रसज्यत इत्यर्थः । अस्तु तादृशज्ञानस्यापि बाध्यत्वमित्यत आह ॥ न चेति ॥ तस्यैवेति । अन्यथाविज्ञानवत एव पुरुषस्य कालांतरभाविबाधकप्रमानंतरभावि यत्स्वभावसिद्धं भ्रमोपमर्दकत्वेनानवतीर्णं सम्यग्विज्ञानं तत्र बाधत्वप्रसंग इत्यर्थः ॥ पूर्वज्ञानेति । ननु पूर्वज्ञानप्रसंजितान्यथाकारविलोडनात्मकत्वं नाम तन्निवर्तकत्वं वा तदभावावगाहित्वं वा तद्विरोधिभावांतरविषयत्वं वा । नाद्यः । पूर्वज्ञानप्रसंजितान्यथाकारस्य नित्यं विलोडितत्वेन सम्यग्ज्ञानस्य तन्निवर्तकत्वायोगात् । न द्वितीयतृतीयौ । बाधत्वेन प्रसिद्धपूर्वोक्तशाब्दादावव्यापनादिति चेन्मैवं । पूर्वज्ञानप्रसंजितान्यथाकारविलोडनशब्देनान्यथाकारप्रसंजके पूर्वज्ञानेऽप्रामाण्यबुद्ध्यापादकत्वस्य विवक्षितत्वाद्भवति खलु नेदं रजतमित्यध्यस्तवस्त्वभावबोधे इयंशुक्तिरिति तद्विरोधिभावांतरज्ञाने वाऽन्यथाकारप्रसंजके पूर्वज्ञानेऽप्रामाण्यबुद्धिः । एवं च न पूर्वोक्तातिप्रसंगः । शुक्तौ रजतत्वावगत्यनंतरं जातस्य शुक्तत्वादिज्ञानस्य पुरुषांतरीयशुक्तित्वादिज्ञानस्य च पूर्वज्ञानेऽप्रामाण्यबुद्ध्यनापादकत्वात्तत्पुरुषीयबाधकप्रमानंतरभाव्यज्ञानसिद्धशुक्तित्वादिगोचरसम्यग्विज्ञानस्य चान्यथाकारप्रसंजके पूर्वज्ञाने पूर्वोत्पन्नबाधकप्रमयैवाप्रामा-

ण्यबुद्धेरापादितत्वेन तदनापादकत्वादिति । ननु पूर्वज्ञानप्रसंजितस्यान्यथाकारस्य लोडनमित्येतत्प्रमेयं भाष्यकारैः किमिति नोक्तमित्यत आह ॥ तत्किमिति । तदेतत्पूर्वोक्तं प्रमेयं वक्तव्यं किं न हीत्यन्वयः । शंकते ॥ कथमिति । अनुच्यमानमपीदं प्रमेयमन्यथाविज्ञातस्येति वचनसामर्थ्याद्विज्ञास्यत इत्यभिप्रेत्य परिहरति ॥ अन्यथेति । पूर्वज्ञानप्रसंजितान्यथाकारस्य विलोडनमित्यर्थतात्पर्याभावेऽन्यथाविज्ञातस्येतिवचनस्य पूर्वोक्तातिप्रसंगनिवारकत्वेन वैयर्थ्यात्सम्यग्विज्ञानमित्येवावक्ष्यदित्यर्थः ॥ आग्रहमूलेति । मायायादिमते भेदमात्रस्याभावेन वियदादौ शुक्तिरजतादौ च सद्विलक्षणत्वासद्विलक्षणत्वाभ्युपगतेरनुचितत्वादिति भावः ॥ असंभवित्वादिकमिति । सर्वस्मात्सर्वानुगतात्सत्तासामान्यानधिकरणत्वं यद्यानिर्वाच्यत्वमित्युच्यते तदा सत्तासामान्यस्यैवाभावे तदनधिकरणत्ववचनस्य वैयर्थ्यापत्त्या तदंगीकारावश्यंभावात्तस्य च सत्तासामान्यस्यानेकाश्रयत्वनियमेन द्रव्यादीनामेव तदधिकरणत्वेन वक्तव्यत्वात्तदनधिकरणत्वस्यासंभवित्वमनुगतसत्तासामान्यानधिकरणत्वस्य स्वरूपसत्ताविरोधित्वेन प्रपंचो न सत्किं त्वनिर्वचनीय इत्युपक्रमासंगत्यं च ज्ञातव्यमित्यर्थः ॥ त्वप्रत्ययेति । त्वप्रत्ययार्थस्य सत्त्वरूपधर्मस्य ब्रह्मण्ययनभ्युपगमात्सत्त्वेन विचारासहत्वं ब्रह्मण्यस्त्येवेति भावः ॥ तच्चात्मनीति । आत्मनो देहाद्यात्माना विज्ञातस्य ततो विविक्तत्वेन सम्यग्विज्ञातत्वादिति भावः ॥ ❁ ॥ ❁ ॥

॥ कादाचित्कत्वेति । कार्यकादाचित्कत्वस्य सामग्रीनियतत्वेन रजताकारपरिणामस्याकारणकत्वे तदभावात्कादाचित्कत्वानुपपत्तिरिति भावः । बाधकाले रजतस्य शुक्त्याकारेण परिणतत्वाद्बाधे शुक्तित्वभानं संभवतीत्याशयेन शंकते ॥ अथेति ।

॥ कारणस्येति । रजतस्य शुक्त्याकारपरिणामकारणस्येत्यर्थः । न च वाच्यं तदा कारणदोषाभावोऽसिद्ध इति। तत्सत्वे बाधकप्रमाऽनुदयप्रसंगादिति भावः ॥ बाध इति । एवं सति रजतस्य शुक्त्याकारे परिणतत्वे नेदं रजतं किंतु शुक्तिरिति बाधोऽपि भ्रमः स्यात् । अन्यथा परिणते वस्तुनि ख्यातिरन्यथाख्यातिरिति तल्लक्षणलक्षितत्वादित्यर्थः । एतदिति । शुक्तिपरिणामरूपं रजतं सकलप्रतिपत्तृवेद्यं कुतो न भवेदित्यर्थः ॥ बाह्येति । सुखादिकमांतरं शुक्तिपरिणामरूपं रजतं तु बाह्यमिति विशेषाद्रजतस्य सुखादिवत्प्रतिपत्त्रसाधारण्यं न संभवतीति भावः ॥ अन्यथेति । रजतस्य बाह्यत्वेऽपि तत्तत्प्रतिपत्तृमात्रवेद्यत्वे घटादेरपि कुलालमात्रवेद्यतापातादित्युक्तातिप्रसंगस्यानिस्तारादित्यर्थः ॥ कमलेति । कमलकुड्मलस्य विकासे निमित्तं यत्सवितृसंबंधितेजस्तदपगमस्य तद्विकाशनाशहेतुता दृष्टेत्यर्थः । कैरवकुड्मलविकासे सावित्रतेजसो निमित्तत्वाभावात्कमलेत्युक्तं ॥ सत्येवाति । तथा च विकासनिवृत्तौ न सावित्रतेजोऽपगमः कारणमिति भावः । यदि च दलसंयोगध्वंसो विकासशब्दार्थस्तदा तस्य निवृत्तिरेव नेति सावित्रतेजोऽपगमस्य विकासनिवृत्तिहेतुता दृष्टेत्युक्तिरेव न संभवतीत्याह ॥ संयोगप्रध्वंस इति । ननु पूर्वेद्युस्थितस्य संयोगस्य ध्वंसोऽद्य मुकुलीभावावस्थायामस्तीति दलसंयोगध्वंसमात्रस्य विकासशब्दार्थत्वे तदाऽपि तत्प्रतीतिव्यवहारापत्त्या दलसंयोगध्वंसस्य यत्कालावच्छेदेन दलसंयोगासामानाधिकरण्यं तत्कालावच्छिन्नतद्ध्वंसस्यैव विकासशब्दार्थत्वेन वक्तव्यतया तस्य च विशिष्टस्य विशेषणनाशेन निवृत्तिसंभवात् । संयोगप्रध्वंसस्तु न कदाऽपि निवर्तत इत्ययुक्ताभिति चेत् । मैवं । विशेषणाभावप्रयुक्तविशिष्टात्यंताभावसत्वेऽपि विशेषणनाशप्रयुक्तविशिष्टनाशस्यासत्वात् । अन्यथा प्रतिक्षणं पूर्वपूर्वक्षणनाशेन

तद्विशिष्टघटादेरपि नाशापत्त्या क्षणभंगवादप्रसंगात् । विशिष्टनाशप्रतीतिस्तु स्वर्गी ध्वस्त इत्यादिवद्विशेषणनाशमात्रविषयेति न किंचिदनुपपन्नं । ननु सावित्रतेजोऽपगमजन्यकमलमुकुलीभावस्य विकासनिवृत्तिरूपतया विकासशब्दिततदलविभागस्य क्षणिकत्वं नोपपद्यते । तथात्वे प्रतिक्षणं विकासनिवृत्तेः सत्वेन तदात्मकमुकुलीभावव्यवहारप्रसंगादित्याशंक्य न विकासनिवृत्तिर्मुकुलीभावो नापि सावित्रतेजोऽपगमजन्य इत्याह ॥ पुनःसंयोगेति ॥ परत्वेति । परत्वापरत्वयोर्यथापेक्षाबुद्धिरूपनिमित्तकारणनाशान्नाशस्तथा प्रकृतेऽपि दोषरूपनिमित्तापगमाद्रजताकारपरिणामनाशः स्यादित्यर्थः ॥ विप्रतिपत्तेरिति । अपेक्षाबुद्धिसंयोगद्रव्यनाशात्पृथक् पृथक् । द्वाभ्यां द्वाभ्यां च सर्वेभ्यो विनाशः सप्तधा तयोरिति तार्किकोक्तस्यापेक्षाबुद्धिनाशप्रयुक्तपरत्वादिनाशस्यासम्मतत्वादित्यर्थः । एतेन रजतमुत्पन्नं विनष्टमित्येव प्रतीतिः स्यादित्युक्तदूषणेन । एवं सति दोषस्य रजताकारपरिणामहेतुत्वे । दुष्टकरणजन्याद्विज्ञानाद्रजतजन्मेति पक्षं विकल्प्य दूषयति ॥ किंचेत्यादिना । रजतप्रतीत्यन्यथाऽनुपपत्त्या रजतजन्मप्रतीतमित्यत आह ॥ प्रतीतिमिति ॥ तदेवेति । शुक्तिकारजतांतरालंबनं प्रतीत्यंतरमेव पूर्वरजतस्यापि कारणमिति रजतप्रतीतिपरंपरापत्त्याऽनवस्थाप्रसंगादित्यर्थः ॥ किंचेति । शुक्तिकाशकलस्य रजतात्मतायाः सत्वे शुक्तित्वमसदित्यागतं । एकस्योभयरूपत्वायोगात् । तथा चेदं रजतमिति संवित्प्रमा शुक्तिरियमिति संविच्चाप्रमेत्यापद्यत इत्यर्थः । यद्वा । एवं सति शुक्ते रजतात्मतायाः सत्वे रजतसंवित्प्रमा शुक्तिरेवेयमिति प्रतीतिश्चाप्रमेत्यापद्यते । शुक्तिरेवेत्यवधारणेन रजतात्मताया असत्वभानादिति भावः ॥ असदिति । असत्संबंधो यस्य तदसत्संबंधं । तच्च तद्विशेषणं च तद्विशिष्टप्रतीतिरित्यर्थः । अन्याकारं

ज्ञानमन्यथाख्यातिरित्यनेनार्थापेक्षया विलक्षणाकारं ज्ञानमन्यथाख्यातिरित्युक्तं भवति । तच्च समीचीनज्ञानेऽतिव्याप्तं । तस्यांतरत्वेनार्थस्य च बाह्यत्वेनार्थापेक्षया विलक्षणाकारत्वादित्याह ॥ तदसदिति । आदिपदेनार्थप्रकाशत्वतदभावादिपरिग्रहः ॥ विरुद्धमिति । स्तंभाकारोल्लेखिज्ञाने स्तंभ एवावभासते । कुंभाकारज्ञाने कुंभ एवावभासत इत्येवंरूपसंवित्स्वभावस्यानुभवसिद्धत्वात्तद्विरुद्धमित्यर्थः ॥ सर्वेति । सद्भावमात्रेणालंबनत्वे देशांतरीयवस्तूनामपि सद्भावेनास्मदादिज्ञानं प्रत्यालंबनत्वापत्त्या सर्वेषां सर्वज्ञता स्यादित्यर्थः ॥ एतेनेति । अतीतादिविषयकज्ञानस्य निरालंबनत्वापातेनेत्यर्थः ॥ अनर्थेति । अतीतादिज्ञानस्य निर्विषयत्वापत्तिरिति योऽनर्थस्तज्जन्येत्यर्थः ॥ व्याघ्रेति । व्याघ्रचोरादिज्ञानानंतरं तन्निवृत्त्यर्थमादीयमानदंडादेरपि व्याघ्रचोरादिज्ञानजन्यादानलक्षणातिशयभाक्त्वेन तद्विषयत्वप्रसंगादित्यर्थः । ननु व्याघ्रचोरादिज्ञानानंतरमसति दंडादिदर्शने तदुपादानाभावात्सति च तस्मिंस्तदभावाद्दंडाद्यादानस्य तद्दर्शनजन्यतया व्याघ्रचोरादिज्ञानजन्यत्वाभावान्नोक्तातिप्रसंग इति चेत् । मैवं । घटादिज्ञानानंतरमसति तत्पदज्ञाने तत्पदप्रयोगलक्षणव्यवहाराभावात्तस्मिंश्च सति तद्भावाद्व्यवहारस्य पदज्ञानजन्यतया घटादिरूपार्थज्ञानजन्यत्वाभावेन घटादेरपितज्ज्ञानाविषयत्वापत्तेः । यदि च घटज्ञानानंतरं पदज्ञानलक्षणसहकारिणि सति व्यवहारदर्शनात्तस्य घटादिज्ञानजन्यत्वमिति मन्यसे तदा व्याघ्रचोरादिज्ञानानंतरं दंडादिदर्शने सति तदादानदर्शनात्तस्यापि व्याघ्रचोरादिज्ञानजन्यत्वमिति समं ॥ तत्तेति । तत्तयाऽसन्निकृष्टं यच्चक्षुर्लक्षणं करणं तज्जन्येत्यर्थः ॥ आकाशादीति । वाक्यजनितज्ञानस्याकाशादिसन्निकृष्टवाक्यरूपकरणजनितत्वादाकाशादिविषयकतैवापाद्यत इत्यर्थः । आदिपदेन कालादिपरिग्रहः

॥ अवभासत इति। स्तंभज्ञाने स्तंभ एवावभासते कुंभज्ञाने कुंभ एवावभासत इत्येवंरूपसंवित्स्वभावानुभवमुल्लंघ्य रजतज्ञाने शुक्तिरवभासत इति ब्रुवाणः श्लाघनीयप्रज्ञो विपरीतलक्षणया निंद्यबुद्धिर्देवानामप्रियो मूर्ख इत्यर्थः ॥ यदिति। संवित्स्वभावानुभवमनुसृत्य रजतज्ञाने शुक्तिर्नावभासत इति यदि ब्रूयादित्यर्थः ॥ अतिप्रसंग इति। स्तंभाद्यवभासस्याप्यन्यालंबनत्वं स्यादित्यतिप्रसंगः कथं परिहरणीयो न कथंचिदित्यर्थः ॥ नन्विति। रजतावभासस्य रजतविषयत्वनियमे शुक्तिकायामिदंरजतमित्यत्र रजतत्वेन प्रतीयमानं रजतं स्यादित्यर्थः। इष्टापत्त्या परिहरति ॥ कथमिति। इदं रजतमित्यत्र रजतत्वेन भासमानेन वस्तुना रजतेन कथं न भवितव्यं तेन रजतेन भवितव्यमेव। तत्र रजतत्वेन भासमानं वस्तु रजतमेवेति यावत्। तत्र युक्तिं वक्ति ॥ न हीति। सत्यस्थले संप्रतिपन्नसमीचीनरजतस्य विषयत्वस्वीकारेऽपि रजतावभासादन्यन्निमित्तं न ह्यस्ति किंतु रजतावभास एव निमित्तं। तस्य च प्रकृतेऽपि सत्त्वादिति भावः। ननूभयत्र रजतावभासस्य तुल्यत्वेऽपि सत्यस्थलीयरजतावभासस्य रजतमेव विषयः। प्रकृते त्वरजतमेव विषय इति किं न स्यादित्यत आह ॥ न हीति। अन्यतरस्मिन्सत्यस्थल एव रजतस्य प्रतिभास इति पक्षपाते न हि कारणमस्तीत्यर्थः ॥ नास्तीति। अत्र रजतं नास्तीत्यपि प्रतिभासो वर्तते तद्बलादिह रजताभासस्यारजतविषयत्वं कल्प्यत इति शंकाभिप्रायः ॥ प्रतिभासेति। नास्त्यत्र रजतमिति प्रतिभासस्य पुरोदेशे रजताभावव्यवस्थापने सामर्थ्यात्पुरतो रजताभावोऽङ्गीक्रियते। अपिशब्दाद्रजतसंवित्सामर्थ्याद्रजतविषयत्वं चांगीक्रियते। नास्त्यत्र रजतमित्यवभासस्य रजतप्रतीते रजतविषयत्वव्यवस्थापने सामर्थ्याभावादित्यर्थः। प्रतीत्यो रजततदभावप्रतीत्योः ॥३९॥

॥ यथा न विरोध इति । शुक्तिकायामिदं रजतमित्यत्र रजतज्ञानस्य प्रमुष्टतत्ताकस्मृतिरूपस्य देशांतरीयरजतविषयतया नास्त्यत्र रजतमित्यवभासस्य च पुरोदेशस्थरजताभावविषयत्वेन च विरोधो नेति वक्ष्यमाणत्वादित्यर्थः। तेषां दाववदहनदग्धानां। शुक्तित्वसामान्यविशेषस्य शुक्तित्वरूपजातिविशेषस्य ॥ तन्मात्रामिति । रजतसदृशतया पुरोवर्ति द्रव्यमात्रं गृहीतं । तत्संस्कारोद्बोधक्रमेण रजतस्मृतिं जनयतीत्यर्थः । ननु रजतज्ञानं स्मृतिरूपं चेदनुभवतुल्यतया कथं तिष्ठतीत्यत आह ॥ सा चेति । अनुभवस्वभावरहिताऽपि सा रजतस्मृतिः प्रागनुभूततत्तांशस्य दोषवशात्प्रमुषिततयाऽनुभवस्वरूपत्वेनावतिष्ठत इत्यर्थः । दोषस्यैव भस्मकाख्यदोषस्यैव ॥ अनाकलितेति । आकलितरजतस्योत्पद्यमानत्वादित्युक्ते घटाद्यनुभवे व्यभिचारस्तन्निरासायानाकलितरजतस्यानुत्पद्यमानत्वादित्युक्तं । घटाद्यनुभवस्त्वनाकलितरजतस्यापि पुंस उत्पद्यत इति तेन तद्व्युदासः ॥ संप्रतिपन्नेति । रजतानुभवजन्यं यत्तद्रजतमिति स्मरणं तद्वदित्यर्थः ॥ तत्तेति । तत्तांशाविषयत्वादित्यर्थः । इंद्रियजन्यत्वं चेंद्रियव्यापारान्वयव्यतिरेकानुविधायित्वादित्यत्र किं तावन्मात्रं हेतुरुतानन्यथासिद्धेंद्रियव्यापारान्वयव्यतिरेकानुविधायित्वं । नाद्यः । व्यभिचारादिति मनसि निधाय द्वितीयमसिध्या निराचष्टे॥ स्मृतिबीजेति ॥ विनिर्यदिति । विनिर्गच्छंतो ये नयनरश्मयस्तद्वर्तिन इत्यर्थः ॥ पीतेति । पीतं यच्चिरबिल्वादिफलं यः पीतत्वप्रत्ययस्तदविशेषेणेत्यर्थः । चिरबिल्वो नक्तमालः करजश्च करंजक इत्यमरः ॥ एवमिति । पीतः शंख इति व्यवहार इवास्यगतपित्तद्रव्यगततिक्तत्वग्रहणस्य दोषवशादगृहीतमाधुर्यकगुडग्रहणस्य च भेदाग्रहे सत्यगृहीतभेदाद्ग्रहणद्वयात्तिक्तो गुड इति व्यवहारोऽपीत्यर्थः । नेदं रजतमिति ज्ञानस्य बाधकत्वा-

न्यथाऽनुपपत्तिरन्यथाख्यातौ प्रमाणमित्यत आह ॥ भेदाग्रहेति । भेदाग्रहप्रसंजितो यो भेदव्यवहारस्तद्बाधनेनैव नेदं रजतमिति भेदज्ञानस्य बाधकत्वमुपपद्यत इत्यन्यथाख्यातिं विना तस्यानुपपत्तिर्नेत्यर्थः । नन्वेतावंतं कालं मम भ्रांतिरासीदिति लोकसिद्धं भ्रांतित्वं । अन्यथा ख्यात्यभावे न संभवतीत्यत आह ॥ तदुपपत्ताविति । नेदं रजतमिति ज्ञानस्योक्तरीत्या बाधकत्वोपपत्तौ चागृहीतभेदज्ञानद्वयस्य तद्बाध्यव्यवहारजनकत्वेन लोकसिद्धं भ्रांतित्वं संभवतीत्यर्थः । तथा चान्यथाख्यात्यभावे न कस्याप्यनुपपत्तिरिति भावः ॥ पुरोवर्तीति । पुरोवर्तिविशेष्यकं साधारणाकारप्रकारकं ज्ञानमित्यर्थः ॥ मा हि भूदिति । शब्दो नित्यः कृतकत्वादित्यत्र नित्यस्य शब्दस्य पक्षीकारे बाध्याश्रयासिद्धत्वमपसिद्धांतो व्याघातश्च । अनित्यस्य पक्षीकारे सिद्धसाध्यता । एवं पर्वतोऽग्निमान् धूमवत्त्वादित्यत्राग्निमतः पर्वतस्य पक्षीकारे सिद्धसाध्यता । अनग्निमतः पक्षीकारे बाध्याश्रयासिद्धत्वादिति प्रकृतवदोषानुषंगादनुमानमुद्राया भंगो मा भूदित्यर्थः । तथा च तत्र यथा न विप्रतिपन्नाकारेण पक्षीकारः किंतूभयवादिसिद्धेन शब्दत्वादिनैव । एवं प्रकृतेऽप्युभयवादिसिद्धेनेदं रजतमित्यादिव्यवहारकारणावगमत्वेन पक्षीकार इति भावः ॥ अत इति । इदं वेदनरजतवेदनयोर्भेदेऽन्यथाख्यात्यभावादन्यथाख्यातिवादिभिर्वेदनयोरभेद एव वक्तव्योऽख्यातिवादिभिश्च स एव निराकर्तव्य इत्यस्यैव भेदाभेदयोर्विमतिरित्यर्थः ॥ कथमन्यथेति । अन्यथा विप्रतिपन्नाकारं विहायोभयसिद्धरूपेण पक्षीकार इत्यस्यानंगीकारे इदंरजतमिति ज्ञानस्य पुरोवर्तिविषयत्वसाधनाय हेतुमुपन्यस्यन्नन्यथाख्यातिवादी इतो दोषात्पक्षविकल्पदोषात्कथं विमुच्यते न कथंचिदित्यर्थः ॥ अथेति । रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिहेतुभूत-

ज्ञानं मयाऽन्यथाख्यातिवादिना रजतत्वप्रकारकत्वावच्छिन्नशुक्तिविशेष्यकत्वसाधनाय स्वविषयताव्यधिकरणप्रकारकत्वसाधनाय वा पक्षीक्रियत इत्यर्थः । शुक्तिविषयप्रवृत्तिहेतुज्ञानमित्येवोक्ते शुक्त्यर्थिताजन्यशुक्तिप्रवृत्तिहेतुशुक्तित्वप्रकारकशुक्तिविशेष्यकज्ञानस्यापि पक्षत्वप्राप्त्यांऽशतो बाधः स्यात्तन्निरासाय रजतार्थिताजन्येत्युक्तं । रजतार्थिताजन्यप्रवृत्तिहेतुज्ञानमित्येतावदुक्ते रजतार्थिताजन्यरजतविषयप्रवृत्तिहेतुरजतत्वप्रकारकसत्यरजतविशेष्यकज्ञानस्यापि पक्षत्वप्राप्त्यांऽशतो बाधः स्यात्तन्निरासाय शुक्तिविषयकेत्युक्तं । ज्ञानपदं तु तादृशव्यधिकरणप्रकारकेच्छायाः प्राभाकरमतेऽपि सत्वात्तामादाय यदंशतः सिद्धसाधनं प्रसक्तं तन्निरासायात्र च रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिजनकत्वे सति सविषयकत्वादिति वा तादृशप्रवृत्त्यसाधारणकारणत्वादिति वा हेतुरभिप्रेतो न तु रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिजनकज्ञानत्वादिति । येन दृष्टांतत्वेनाभिप्रेतायां व्यधिकरणप्रकारकेच्छायां साधनवैकल्यं हेतोरेव पक्षतावच्छेदकत्वेन हेतुसाध्यसामानाधिकरण्यग्राहकेणैव पक्षतावच्छेदकसाभानाधिकरण्येन साध्यस्य सिद्धत्वात्सिद्धसाधनमिति च स्यात् ॥ मोच्चैरिति । रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिहेतुभूतं ज्ञानं मया पक्षीक्रियत इत्युच्चैर्मावोचः । उच्चैरुक्तं चेत्परोऽपि श्रोष्यति । श्रुत्वा च याथार्थ्यसाधनाय मयाऽपि तादृशज्ञानमेव पक्षीक्रियत इति ब्रूयादित्यर्थः । ननु परेण तादृशं ज्ञानं पक्षीकर्तुं न शक्यते । तथात्वे ईश्वरज्ञानस्यापि रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिहेतुत्वेन पक्षतया तत्र च याथार्थ्यरूपसाध्यस्य सिद्धत्वेन सिद्धसाधनत्वप्रसंगादिति शंकते ॥ ईश्वरेति ॥ तवापीति । ईश्वरज्ञानस्यापि तादृशत्वेन पक्षतया तत्र रजतत्वप्रकारकत्वावच्छिन्नशुक्तिविशेष्यकत्वरूपसाध्याभावात्तवापि बाधः

कथं न स्यात् । स्यादेवेत्यर्थः ॥ प्रकृतेति । रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिहेतुजीवज्ञानमित्यर्थः ॥ मां प्रतीति । तथा च त्वदीयेऽन्यथाख्यातिसाधकेऽनुमाने पक्षेऽनीश्वरविशेषणस्य मां प्राभाकरं प्रत्युपरंजकत्वेन त्वां प्रति त्वीश्वरज्ञाने बाधवारणार्थत्वेन प्रयोजनत्वाद्विशेषणत्वं संगच्छते । उभयसिद्धप्रयोजनवत्त्वं हि तत्र तंत्रं न त्वेकस्य प्रयोजनस्योभयसिद्धिरपीत्येत्र त्वया समाधेयं । तच्च मदीये याथार्थ्यसाधकेऽनुमाने पक्षेऽनीश्वरविशेषणस्य त्वां प्रतीश्वरज्ञाने सिद्धसाधनवारणार्थत्वेन मां प्रति तूपरंजकत्वेन प्रयोजनवत्त्वान्ममापि सममिति भावः ॥ तथाऽपीति । अनीश्वरेति विशेषणेनेश्वरज्ञानमादाय प्रसक्तसिद्धसाधनपरिहारेऽपि यद्रजतं तदिष्टसाधनमिति व्याप्तिस्मारकस्येदंरजतमिति ज्ञानस्य व्याप्तिज्ञानतज्जन्येष्टसाधनतानुमितिभ्यां व्यवहितस्य रजतार्थिताजन्यशुक्तिविषयकप्रवृत्तिहेतुत्वेऽनुमितिमात्रव्यवहितस्य यद्रजतं तदिष्टसाधनमिति व्याप्तिज्ञानस्य सुतरामुक्तप्रवृत्तिहेतुत्वेन पक्षत्वात्तत्र च याथार्थ्यरूपसाध्यस्य सिद्धत्वात्सिद्धसाधनतेत्यर्थः ॥ तत्रेति । व्याप्तिज्ञान एवान्यथाख्यातिं साधयतो रजतत्वप्रकारकत्वावच्छिन्नशुक्तिविशेष्यकत्वादिरूपसाध्याभावाद्बाधप्रसंग इत्यर्थः ॥ उभयेति । वादिप्रतिवादिनोरसिद्धिरित्यर्थः । तामेव दर्शयति ॥ ज्ञानस्येति । ज्ञानस्यार्थाकारत्वे हि रजतं च तज्ज्ञानं चेत्यर्थस्य सिद्धिः स्यात् । तत्तु मतद्वयेऽपि नास्तीत्यसिद्धिरेवेति भावः ॥ असिद्धेरिति । रजतज्ञानं प्रति रजतशब्दस्य विषयत्वाभावादिति भावः । ननु रजतशब्दस्योल्लेखो नाम तज्ज्ञानजनितस्मृतिमात्रयोगः । स चास्त्येव प्रकृते वाच्यरजतदर्शनानंतरं वाचकरजतशब्दस्मृतेरुत्पत्तेः । अतो नाऽसिद्धिरित्यत आह ॥ तज्ज्ञानेति । तज्ज्ञानजनितस्मृतिमात्रयोगित्वमुल्लेखशब्दार्थश्चेत्तदा रजतशब्दस्मृतिहेतुज्ञानत्वं रज-

तशब्दोल्लेखिज्ञानत्वमित्युक्तं स्यात् । तच्च न हेतूकर्तुं युक्तं । यत्र पद्यादौ पूर्वपदमन्यदुत्तरं च रजतपदं तत्र पूर्वपदज्ञानेनोत्तररजतपदस्मृत्युत्पत्तेः पूर्वं पदज्ञाने रजतशब्दस्मृतिहेतुज्ञानत्वरूपहेतोर्विद्यमानतया रजतविषयकत्वरूपसाध्यस्य चासत्वेन व्यभिचारादित्यर्थः । तद्धेतुत्वेन रजतार्थिप्रवृत्तिहेतुत्वेन । अनेनेदमिति ज्ञाने हेतुसत्वमुपपादितं । शुक्तिकालंबनस्येत्यनेन तु साध्याभावःपूर्वेति रजतमिति ज्ञानं न रजतमिति ज्ञानं रजतज्ञानमिति पंचमपक्षस्य रजतस्य ज्ञानं रजतज्ञानं वेत्यादिना पूर्वमुक्ता ये चत्वारः पक्षास्ततो बहिर्भावाभावादित्यर्थः । तथा च तत्पक्षदूषणेनैवास्यापि दूषितत्वादयं पक्षो न युक्त इति भावः ॥ शुक्तीति । घटेऽयं घट इति घटविषयकज्ञानस्य पूरोवर्त्यालंबनतायाः पूर्वोत्तरवर्तिघटयोरभेदे सत्येव दर्शनाद्रजतविषयज्ञानस्यापि शुक्तिकालंबनतायाः शुक्तिरजतयोरभेदं विनाऽसंभवात्तयोरभेदप्रसंगादित्यर्थः ॥ नेति । ज्ञानस्य रजताकारत्वानभ्युपगमाद्रजतं च तज्ज्ञानं चेति द्वितीयपक्षो न युक्त इत्यर्थः ॥ शुक्तीति । शुक्तिज्ञानस्यापि कदाचिच्छुक्तिसंकेतितरजतशब्दस्मृतिहेतुत्वसंभवेन रजतशब्दोल्लेखिज्ञानरूपतया रजतज्ञानत्वेन शुक्तिविषयकत्वेन च रजतज्ञानं शुक्तिविषयकं सदन्यथाख्यातिरिति वदता त्वयोक्तदोषानास्पदं यद्रजतज्ञानं स्वीक्रियते तद्रजतज्ञानत्वमेव मया हेतूकरिष्यत इत्यर्थः । प्राभाकरस्त्वेकदेश्युक्तसमाधानमनूद्यावद्यति ॥ केचित्पुनरित्यादिना ॥ अन्यतरेति । विवादाध्यासितरजतज्ञानस्यान्यथाख्यातिवादिमते शुक्तिविषयकत्वेन तत्र रजतविषयकज्ञानत्वरूपहेतोरसिद्धेरित्यर्थः ॥ तस्मादिति । एकदेश्युक्तसमाधानस्यानुपपन्नत्वाद्रजतज्ञानं शुक्तिविषयकं सदन्यथाख्यातिरिति वदता यद्रजतज्ञानं स्वीक्रीयते तदेव मया हेतूकरिष्यत इत्युक्त एव परिहारः साधुरित्यर्थः

॥ ज्ञानमात्रेति । ज्ञानवृत्तित्वादित्युक्ते प्रमेयत्वादौ व्यभिचारः । तस्यायथार्थभूतेच्छावृत्तित्वेन यथार्थमात्रवृत्तित्वरूपसाध्यरहितत्वात्तन्निरासाय मात्रपदं । प्रमेयत्वादेर्ज्ञानादितरस्मिन्नपि सत्वेन ज्ञानमात्रवृत्तित्वाभावादवृत्तिगगनादौ व्यभिचारनिरासाय ज्ञानवृत्तीत्युक्तं । तत्र ज्ञानपदं स्वरूपकथनपरं । अवृत्तौ व्यभिचारस्य वृत्तिमत्त्वग्रहणेनैव निरस्तत्वात् । तथा च ज्ञानेतरावृत्तित्वे सति वृत्तिमत्त्वादित्यत्र तात्पर्यं । नन्विदानीं ज्ञानत्वमिति प्रतीत्या ज्ञानत्वस्य ज्ञानेतरकालवर्तित्वादसिद्धिरिति चेन्मैवं । ज्ञानेतरावृत्तित्वशब्देन जगदाधारताप्रयोजकसंबंधभिन्नसंबंधेन ज्ञानेतरवृत्तित्वाभावस्य विवक्षितत्वात् । वस्तुतस्त्विदानीमाकाश इत्यादिप्रतीत्या गगनादेरपि कालवृत्तितया वृत्तिमत्त्वाग्रहणमात्रेण तत्र व्यभिचारनिरासाभावाज्ज्ञानपदं सार्थकमेवेति द्रष्टव्यम् । ॥ वक्ष्याम इति । शुक्तिकाशकलमत्यंतासद्रजतात्मनावगाहमानं ज्ञानमन्यथाख्यातिर्न तु देशांतरीयरजतात्मनावगाहमानमित्यभिनवान्यथाख्यातिस्वरूपमुत्तरत्र वक्ष्याम इत्यर्थः । गुणादीनामाश्रयेण भेदः स्फुट इत्येतदुपपादयति ॥ न हि स्वयामिति । गुणादीनां परस्परं भेदः स्फुट इत्यंशमुपपादयति ॥ नापीति । आश्रयाणां चाभेदः स्फुट इत्यस्योपपादनं ॥ न चेति ॥ सविशेषत्वेति । तथा चाभेदस्थले प्राग्व्याहृतस्य भेदशब्दस्य भेदप्रतिनिधिविशेषपरत्वान्न कश्चिद्दोष इति भावः ॥ लिंगस्येति । साध्यधर्मिपदेन समुचितदेशो विवक्षितः । तथा चोर्ध्वदेशो वृष्टिमानधोदेशे नदीपूरात् । उपरिदेशः सूर्योदयवान्पद्मे विकासादित्यादौ नदीपूरविकासादिलक्षणलिंगस्याधोदेशपद्मादिलक्षणसमुचितदेशसन्निकर्षविशिष्टस्योर्ध्वदेशादौ वृष्टिसूर्योदयाद्यनुमितिजनकत्वात्तादृशानु-

मितिं प्रत्यधोदेशपद्मादिलक्षणसमुचितदेशोऽपि विषयः स्यादित्यर्थः । समुचितदेशसन्निकृष्टे च लिंगेनोक्तानुमितिर्जायेत्तदेवं परं यत्सन्निकृष्टकरणेन यज्ज्ञानं जन्यते स तस्य विषय इति लक्षणसत्वादुक्तानुमितिं प्रति समुचितदेशस्य विषयत्वापादनं संगच्छते । न चैतदस्ति । लिंगस्य क्वचिदतीतानागतत्वेनानुमितिकारणत्वस्यैवाभावाल्लिंगज्ञानस्यैव तत्करणत्वादित्याशयेन परिहरति ॥ नेति । अथवा । लिंगस्य साध्यधर्मिसन्निकर्षोऽलिंगिज्ञानकरणामिति पदच्छेदः । तथा चानुमितिकरणस्य लिंगसाध्यधर्मिसन्निकर्षो लिंगिज्ञानशब्दितानुमितिकारणं न भवति । उपरिदेशः सूर्योदयवान्पद्मे विकासादित्यादौ लिंगस्य साध्यधर्मिसन्निकर्षाभावात् । अतस्तत्रोपरिदेशादिरूपसाध्यधर्मिणोऽनुमितिविषयत्वं न स्यादिति शंकाभिप्रायः । परिहाराभिप्रायस्तु लिंगज्ञानस्यैव कारणत्वात्तस्य च साध्यधर्मिणा साकं तन्निष्ठसाध्यव्याप्तलिंगसंबंधरूपसन्निकर्षस्य सत्वात्साध्यधर्मिणोऽनुमितिविषयत्वं संभवतीति । यद्यपि लिंगस्य करणत्वेऽप्येवं समाधानं वक्तुं शक्यं । तथाऽपि वस्तुस्थितिर्वक्तव्येत्यभिप्रायेणैवमुक्तं । लिंगस्येत्यादिग्रंथस्य प्रकारांतरेण व्याख्यातत्वेन साध्यधर्मिणोऽनुमितिविषयत्वापादनपरतया प्रतीयमानो ग्रंथोऽनुपपन्नः । साध्यधर्मिणोऽनुमितिविषयत्वस्य सत्वेन तदापादनस्येष्टापादनत्वादिति चोद्यमनवकाशमिति ध्येयम् । न च वाच्यं लिंगज्ञानस्य करणत्वेऽप्युपरिदेशः सूर्योदयवान्पद्मे विकासादित्यादौ समुचितदेशरूपपद्मादिवृत्तिविकासादिरूपलिंगज्ञानस्य समुचितदेशेन सह तद्वृत्तिलिंगविषयकत्वरूपसन्निकर्षस्य सत्वात्तस्य चानुमितिं प्रति कारणत्वात्समुचितदेशस्य पद्मादेरनुमितिविषयत्वं स्यादिति । यत्सन्निकृष्टकरणेनेत्यत्र सन्निकर्षत्वेन कारणताया विवक्षितत्वात् । असन्निकृष्टज्ञापनेऽतिप्रसंगेन ज्ञाप्यज्ञापकयोरेव सन्निकर्षस्य गवेषणीय-

तया समुचितदेशतद्वृत्तिलिंगज्ञानयोश्च ज्ञाप्यज्ञापकभावाभावेन समुच्चितदेशवृत्तिलिंगविषयकत्वस्य संनिकर्षत्वेनाकारणत्वादिति ॥ अभ्युपगत इति । इंद्रियस्य तत्तया तदनुभवजनितसंस्कारसहकृतत्वलक्षणो लिंगज्ञानस्य लिंगिना तद्व्याप्तलिंगविषयकत्व-लक्षणो वाक्यज्ञानस्य वाक्यार्थेन संसर्गधर्मकपदार्थवाचिपदसमुदायविषयकत्वलक्षणश्च सन्निकर्ष एवं वदता त्वयाऽभ्युपगत इत्यर्थः । यद्यपि लिंगज्ञानस्य लिंगिव्याप्तलिंगविषयकत्वं वाक्यज्ञानस्य संसर्गधर्मकपदार्थवाचिपदसमुदायविषयकत्वं च सन्निकर्ष इत्यत्र विषयत्वस्य तद्रूपेण प्रवेशे आत्माश्रयापत्तिः । तथाऽपि लिंगज्ञानस्य लिंगिव्याप्तसंबंधः सन्निकर्षो वाक्यज्ञानस्य वाक्यार्थपरवाक्यसंबंधः सन्निकर्ष इति विषयत्वस्य संबद्धत्वेन रूपेण प्रवेशे तात्पर्यमवगंतव्यं । नन्वतीतानागतविषयस्य योगिज्ञानस्यातीतानागतासन्निकृष्टयोगींद्रियजन्यस्यातीतानागतविषयत्वं स्मर्यमाणार्थासन्निकृष्टमनोजन्यस्य स्मरणस्य स्मर्य-माणार्थविषयत्वं च न स्यादित्यत आह ॥ एवमिति । योगींद्रियस्यातीतानागतपदार्थैः सह तत्तत्पदार्थोपदर्श-कयोगजादृष्टसहकृतत्वलक्षणो मनसः स्मर्यमाणार्थेन सह तत्संबंध्यनुभवजनितसंस्कारसाचिव्यलक्षणश्च सन्निकर्षोऽस्तीत्ये-वंप्रकारेणैतादृशक्षुद्रोपद्रवाः परिहर्तव्या इत्यर्थः ॥ न चेति । एवं सति यत्सन्निकृष्टकरणेन यज्ज्ञानं जन्यते स तस्य विषय इति विषयत्वे व्यवस्थिते सति रजतज्ञानस्य शुक्तिविषयत्वांगीकारेऽनुभवविरोधो न चास्तीत्यर्थः । तदेवोपपादयति ॥ रजतेति । स्तंभकुंभादिज्ञानानां स्तंभकुंभादिसन्निकृष्टकरणजन्यत्वेन स्तंभकुंभादिविषयत्ववद्रजताभासस्यापि शुक्तिकासन्निकृष्टकरणजन्यत्वेन शुक्तिविषयत्वस्योपपत्तेर्न कश्चिद्विरोध इति भावः ॥ एवमिति । यज्ज्ञानं यत्प्रतिभासं तत्तद्वि-

षयकमिति व्यवस्थांगीकारे इदं रजतमिति ज्ञानस्य रजतप्रतिभासरूपतया रजतस्यापि तज्ज्ञानविषयता प्रसज्येतेत्यर्थः ॥ न चैवमिति । रजतज्ञानस्य रजतविषयत्वे इदमाकारज्ञानस्य चेदंपदार्थविषयत्वादख्यातिपक्षपात एव स्यात् । नान्यथाख्यातिपक्षपात इति न चेत्यर्थः ।॥ ज्ञानैक्येति । रजतपुरोवर्तिज्ञानैक्यस्याभ्युपगमादित्यर्थः । तथा चान्यथाख्यातिसिद्धिरिति भावः । ज्ञानैक्यमात्रेणान्यथाख्यातित्वे शुक्तिरजते इति समूहालंबनज्ञानमपि विभ्रमःस्यादित्यत आह ॥ नापीति ॥ रजतस्येति । भ्रमे सत्त्वेन प्रतीयमानस्य रजतस्यासत्त्वाभ्युपगमादसत्तादात्म्यावभासस्याभ्युपगमाच्चेत्यर्थः । तथा चासद्रजततादात्म्यावभासाभ्यां भ्रमत्वं वच्मो न ज्ञानैक्यमात्रेण येनोक्तातिप्रसंगः स्यादिति भावः ॥ वक्ष्यति चेति । विषयस्य कुतो बाधोऽविद्यमानं हि बाध्यते । न हि वंध्यासुतो बाध्यो यज्ञदत्तो हि बाध्यत इत्यत्रासतो रजततादात्म्ययोरिदंरजतमिति ज्ञानविषयतामाचार्यो वक्ष्यति चेत्यर्थः ॥ सहकारीति । पशुहिंसांगत्वेन विहितेतिकर्तव्यतालक्षणसहकारिवशादित्यर्थः ॥ किमिति । अनेन यदाकदाचित्सत्त्वेन किमित्यर्थः ॥ स्वेति । स्वस्यातीतादिविषयानुमित्यादेर्यो हेतुलिंगपरामर्शादिलक्षणस्तत्सामर्थ्यादेवेत्यर्थः ॥ अत एवेति । नियतयाथार्थ्येन कदाचिदपि संशयानास्कंदितेन साक्षिचैतन्येन निश्चितप्रामाण्यकत्वरूपस्यानाश्वासनिरसनोपायस्य सत्वादेवेत्यर्थः ॥ अन्यथेति । क्वचिद्विषयव्यभिचारदर्शनेन सर्वत्र ज्ञानेऽनाश्वासे क्वचिद्व्यवहारस्य विषयव्यभिचारे सति व्यवहारांतरे समाश्वासः परस्यापि कथं स्यादित्यर्थः । इदं स्मरणमनाकलितरजतस्यानुत्पद्यमानत्वादिति यद्रजतज्ञानस्य स्मरणत्वसाधकमनुमानमुक्तं तद्दूषयति ॥ अनाकलितेति ॥ रजतनिर्विकल्पकेति । एतच्च

नैय्यायिकरीत्योक्तमिति द्रष्टव्यम् । स्वमते निर्विकल्पकाभावात् । तदुक्तं पद्धतौ । द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधका-
भावेन निर्विकल्पकानुपपत्तिरिति ॥ **हानादीति** । इदं चोपलक्षणं । रजतलिंगकानुमितौ व्यभिचार इत्यपि बोध्यम् ॥ **संस्का-
रमात्रेति** । संस्कारसहकृतपदं साधनव्यापकत्वनिरासाय । मात्रपदं तु समव्याप्त्योपाधित्वाभिप्रायेण । प्रत्यभिज्ञायां साध्या-
व्याप्यत्वनिरासाय । तेनेंद्रियं व्यवच्छिद्यते ॥ **इतरेतरेति** । स्मृतित्वे ज्ञाते स्मृत्यन्यत्वरूपानुभवत्वज्ञानं । ज्ञाते चानुभवत्वे
तदनधिकरणत्वरूपस्मृतित्वज्ञानमित्यन्योन्याश्रयप्रसंगाच्चेत्यर्थः ॥ **दृष्टांतस्येति** । दृष्टांतितस्य संप्रतिपन्नस्मरणस्य मानस-
प्रत्यक्षजन्यतया संस्कारमात्रप्रभवत्वरूपस्मरणत्वाभावेन साध्यवैकल्याच्चेत्यर्थः ॥ **इंद्रियेति** । चक्षुरिंद्रियव्यापारान्वयव्यतिरे-
कविधायिरजतज्ञानं चाक्षुषमिति निश्चीयते । तथा च स्मरणत्वसाधकानुमानस्य बाधितविषयत्वमित्यर्थः । इंद्रियव्यापारा-
न्वयव्यतिरेकयोः स्मृतिबीजसंस्कारोद्बोधहेतुपुरोवर्तिसाधारणाकारग्रहण एवोपक्षीणतयेंद्रियजन्यत्वनिश्चयायोगान्न बाधितविष-
यत्वमिति शंकते ॥ **अन्वयेति** ॥ **अन्योन्येति** । अस्मादनुमानात्स्मृतित्वसिद्धाविंद्रियव्यापारान्वयव्यतिरेकयोरन्यत्रोपक्ष-
यसिद्धिस्तत्सिद्धौ चेंद्रियजन्यत्वनिश्चयाभावेन बाधितविषयत्वाभावादनुमानात्स्मृतित्वसिद्धिरित्यन्योन्याश्रयप्रसंगादित्यर्थः
॥ **तथा चेति** । इंद्रियव्यापारान्वयव्यतिरेकयोरन्यत्रोपक्षीणत्वकल्पनाप्रसंगादित्यर्थः । उक्तरीत्या कल्पकाभा-
वेनान्यत्रोपक्षयनिश्चयाभावेऽपि तत्संशयोऽस्त्येव । तथा चेंद्रियजन्यत्वनिश्चयाभावान्न बाध इत्याशयेन शंकते
॥ **अन्यत्रेति**। इदमिति ज्ञानजनन इत्यर्थः ॥ **तथाऽपीति** । अन्यत्रोपक्षयसंशयेन निश्चितकालातीतत्वाभावेऽपींद्रियव्या-

पारस्यान्यत्रोपक्षयो वा रजतज्ञान एवोपयोगो वेति शंकयाहितस्य स्मृतित्वतदभावसंदेहस्य सत्वेन संदिग्धकालातीतत्वस्यानि-
स्तारादित्यर्थः । यद्यपि पक्षाय साध्याभावसंदेहस्य न दोषत्वं । तथात्वेऽनुमानमात्रोच्छेदप्रसंगात् । तथाऽप्यन्याहितस्य दोषत्वं
संभवतीत्यनुसंधेयं ॥ **सम्भमिति** । असत्यस्थलेऽपि बाधकेन विना वृथाऽन्यत्रोपक्षयो न शंक्यत इति तुल्यमित्यर्थः । तथा
चान्यत्रोपक्षयः शंकाविरहादन्यत्रानुपक्षीणेंद्रियव्यापारानुविधानेन तज्जत्वे रजतज्ञानस्य निश्चिते स्मृतित्वाभावनिश्चयात्स्मृति-
त्वसाधकानुमानं बाधितविषयमेवेति भावः ॥ **एतेनेति** । रजतज्ञानस्योक्तरीत्येंद्रियव्यापाररूपप्रत्युत्पन्नकारणप्रभवत्वस्य निश्चित-
त्वेनाप्रत्युत्पन्नकारणप्रभवत्वरूपं स्मृतित्वं साध्यमित्येतत्परास्तमित्यर्थः ॥ **संस्कारेति** । संस्कारोत्पत्त्यनंतरमेव जातायां रजतस्मृतौ
रजतज्ञानवत एवोत्पद्यमानत्वादिति हेतुरस्ति साध्यमानमप्रत्युत्पन्नकारणप्रभवत्वरूपस्मृतित्वं तु नेत्यनैकांतिकत्वं चेत्यर्थः
॥ **द्वितीयेति** । धारावाहिकभ्रमस्थलीयद्वितीयादिरजतज्ञाने प्रथमं ज्ञानानुभूतार्थविषयत्वस्य सिद्धतयाऽनुभूतविषयत्वरूपस्मृतित्व-
साधने सिद्धसाधनादित्यर्थः ॥ **साध्याविशिष्टतेति** । हेतूक्तं रजतज्ञानवत एवोत्पद्यमानत्वं द्वेधा संभवति । रजतज्ञानजन्यत्वेन
वाऽनुभूतरजतविषयत्वेन वेति । तत्र प्रथमस्य विवक्षायां रजतलिंगकानुमितौ व्यभिचारापत्त्या द्वितीयस्यैव विवक्षणीयतया तस्य
साध्यमानानुभूतविषयत्वादविशेषेण साध्याविशिष्टताप्रसंगाच्चेत्यर्थः ।॥ **अनुभवेति** । भ्रमस्थलीयरजतज्ञाने तत्तांशोल्लेखित्वाभा-
वस्यानुभवसिद्धत्वेन तस्य तद्बाधितत्वादित्यर्थः । स घटः स पट इत्यादिस्मृतौ पूर्वं ज्ञात इत्येवं स इत्यंशे स्मर्यमाणार्थस्य ज्ञानसंभे-
दप्रतीतेर्ज्ञानसंभिन्नार्थगोचरत्वं स्मृतित्वं तदेव च प्रकृते साध्यमस्त्वित्यत आह ॥ **एतेनेति** । तत्तांशानुल्लेखिनो भ्रमस्थलीयरजतज्ञा-

नस्य ज्ञानसंभिन्नार्थगोचरत्वाभावस्यानुभवसिद्धत्वेन तत्साधनस्यानुभववाधितत्वात्साध्यमानं स्मृतित्वं ज्ञानसंभिन्नार्थगोचरत्वमित्येतदपि परास्तमित्यर्थः ॥ अनेनेति । भ्रमस्थलीयरजतज्ञानस्येंद्रियजन्यत्वसमर्थनेन तत्तांशोल्लेखित्वाभावसमर्थनेन चेदं ज्ञानमस्मरणं । तत्तांशविकलत्वान्नेयं स्मृतिरिंद्रियजन्यत्वादिति प्रागुक्तं प्रतिपक्षानुमानद्वयमपि समाहितं वेदितव्यमित्यर्थः । ननु प्रथमप्रयोगे पदजन्यपदार्थस्मृत्यादौ व्यभिचारस्य सत्वात्तस्य कथं समाहितत्वमित्यत आह ॥ नेदमिति । तथा च पदजन्यपदार्थस्मृत्यादौ स्मृतित्वव्यवहाराभावलक्षणसाध्यस्यापि सत्वान्न व्यभिचार इति भावः ॥ अत एवेति । भ्रमस्थलीयज्ञानस्य कुत्रापि स्मृतित्वाभावादेवानास्वादिततिक्तस्य शिशोस्तिक्तस्मरणानुपपत्तेः कथं तिक्तो गुड इति प्रत्यय इत्याशंक्य तत्र जन्मांतरानुभूतत्वात्तिक्तस्य स्मरणमुपपद्यत इत्यादिना या प्रक्रिया परेणोक्ता साऽपि परास्तेत्यर्थः ॥ यदपीति । विपर्ययमंगीकुर्वाणेनापि विवेकाग्रहो ग्राह्य एवेत्यादिना विपर्ययाभ्युपगमे यत्कल्पनागौरवमुक्तं तद्विवेकाग्रहमात्रेण प्रवृत्त्यादेरुपपत्तौ स्यात् । न च विवेकाग्रहमात्रेण प्रवृत्त्यादिकमुपपद्यत इति वक्ष्याम इत्यर्थः । एवं विशिष्टज्ञानकारणं भेदाग्रहमुपादाय विशिष्टज्ञानापलापे तर्हि सत्यरजतज्ञानादस्य सर्वात्मना विशेषः किमुत कश्चिद्विशेषोऽस्तीत्यपेक्षायामेतावाननयोर्विशेषोऽस्तीत्याह ॥ केवलमिति । एकं सत्यरजतज्ञानमपरं शुक्तिरजतज्ञानं विपर्ययेति विशिष्टविषयमनेकमपि शुक्ताविदं रजतमिति विशिष्टविषयतयैकत्वेन च प्रतिभासत इत्युक्तेऽविशिष्टविषये विशिष्टविषयत्वप्रतिभासस्यानेकस्मिन्नेकत्वप्रतिभासस्य चान्यथाख्यातिरूपतयाऽन्यथाख्यात्यंगीकारप्रसंगाच्चेत्यर्थः । नन्वविशिष्टविषयेऽनेकस्मिंश्च विशिष्टविषयत्वैकत्वप्रकारकः प्रत्ययो

नास्त्येव । किंतु तत्रापि तदसंसर्गाग्रहमात्रमतो नान्यथाख्यात्यंगीकारप्रसंग इत्याशयेन शंकते ॥ नास्त्येवेति । यद्वा । अन्यथाख्यातौ किं प्रमाणमिति प्रश्ने रजतज्ञानवद्विशिष्टविषयैकत्वग्राह्यनुभवोऽसत्यरजतज्ञानेऽप्यस्तीति स एव तत्र प्रमाणमित्युक्तं । तस्यानुभवस्यासिद्धिं शंकते । नास्त्येवेतीत्यवतारणीयोऽयं ग्रंथः ॥ स्वप्रकाशेति । स्वप्रकाशज्ञानस्य ज्ञेयस्य च प्रतिभासे तत्स्वरूपभूतभेदस्यापि प्रतिभासावश्यंभावेन तदनवभासानुपपत्तेरित्यर्थः । ज्ञानानवभासदशायां तत्स्वरूपभूतभेदस्यानवभासः संभवतीत्याशंकानिरासाय स्वप्रकाशेत्युक्तं । स्वप्रकाशस्य ज्ञानस्यानवभासदशैव नास्तीति भावः ॥ गुण इति । गुणे गुणानभ्युपगमेन सर्वत्र घटपटादिज्ञाने पृथक्त्वाभावादेव पृथक्त्वभेदाग्रहसंभवेन घटाद्यर्थिनः पटादावपि प्रवृत्तिप्रसंगादित्यर्थः । यद्यपि घटपटयोः पृथक्त्वरूपभेदग्रहसत्वेन स्वरूपतो विषयतश्चागृहीतभेदज्ञानद्वयाभावान्नान्यार्थिनोऽन्यत्र प्रवृत्तिप्रसंगः । तथाऽपि गुणानां क्रियाणां च परस्परपृथक्त्वरूपभेदाभावेनैकगुणादिज्ञानाद्गुणांतराद्युपस्थितिकाले तत्र तत्तादात्म्यव्यवहारप्रसंगः । स्वरूपतो विषयतश्चागृहीतभेदज्ञानद्वयस्याव्यवहारहेतोः सत्वादित्यत्र तात्पर्यं ॥ अत एवेति । इदंरजतयोरन्योन्याभावस्य तत्स्वरूपतया तयोरुपलंभकाले तस्यानवभासायोगादेवेत्यर्थः ॥ भेदस्येति । मया भेदस्य स्वरूपतावन्मात्रत्वानंगीकारात्स्वरूपविशेषत्वस्यैव चांगीकाराद्विशेषबलेन वस्तुनि गृहीतेऽपि तद्भेदाग्रहः संभवतीति भावः ॥ तादिति । प्रवर्तकाभेदग्रहसारूप्यादगृहीतभेदं ज्ञानद्वयमपि प्रवर्तकत्वेनेष्यत इत्यर्थः ॥ प्रवर्तकेति । प्रवर्तकत्वेनाभिमतसमीचीनरजतप्रत्ययेऽपीत्यर्थः । अपेक्षितोपायो रजतसत्यस्थले रजतस्येंद्रियार्थसन्निकर्षजननोपयुक्तत्वेन साक्षाज्ज्ञानकारणत्वाभावाद्रजतसाध्या बुद्धिरित्येतदयु-

क्तमित्याह ॥ अर्थस्येति । सादृश्यस्य सादृश्यत्वेन वेषेणोपयुक्तत्वेन रजतसाध्या बुद्धी रजतसदृशी ज्ञायत इति वक्तुं शक्यते। न चैतदस्ति । सादृश्यस्य दोषत्वेन रूपेणोपयुक्तत्वादित्याह ॥ सादृश्यं त्विति ॥ अस्ति हीति । नेदं रजतमिति निवर्तकभेदग्रहस्थले रजताभेदाग्रहणं यथा वर्तते तथाऽगृहीतभेदज्ञानद्वयस्थलेऽपि रजताभेदाग्रहणमस्तीति तद्रूपं निवर्तकभेदग्रहसारूप्यं तिष्ठतीत्यर्थः ॥ भेदग्रहेति । समीहितसाधनभेदग्रहसारूप्यात्समीहितसाधनाभेदाग्रहादपेक्षाया अप्यापातादित्यर्थः ॥ असंसर्गेति । यद्यपि प्राग्विकल्पदशायामुत सर्वोऽपि भेदाग्रहादिति भेदाग्रहस्य सार्वत्रिकव्यवहारकारणताया द्वितीयपक्षत्वेनोक्तत्वात् । इदानीं द्वितीयपक्षोत्थापनावसरेऽसंसर्गाग्रहोपपादनमसंगतमिवाभाति । तथाऽप्युत सर्वोऽपि भेदाग्रहादित्यत्रत्यस्य भेदाग्रहशब्दस्यासंसर्गाग्रहोपलक्षकत्वेनोत सर्वोऽपि व्यवहारो भेदाग्रहादसंसर्गाग्रहाद्वेति द्वितीयपक्षपर्यवसानात्तदुत्थापनकाले संसर्गाग्रहस्यापि व्यवहारकारणत्वोपपादनं संगतमिति द्रष्टव्यम् ॥ इंद्रियेति । समवायसंयुक्तसमवायलक्षणसन्निकर्षाभावेनेंद्रियसंयुक्तविशेष्यविशेषणभावस्य च संबंधलक्षणाभावेनासंबंधतया चेंद्रियसन्निकर्षाभावादित्यर्थः । तदा रजतव्यक्तिरजतत्वबोधोत्तरप्रवृत्तिपूर्वकाले । लिंगाभावाल्लिंगज्ञानाभावात् । तमेवलिंगप्रदर्शनपूर्वकमुपपादयति ॥ अविसंवादीति । अविसंवादिव्यवहारजनकत्वविशिष्टः साकांक्षयोर्धर्मधर्मिणोः सहोपलंभो हि तस्मिन्समवाये लिंगमित्यर्थः । यद्यप्येतादृशसहोपलंभः समवायरहितयोर्दंडदेवदत्तयोरप्यस्तीति व्यभिचारान्न तेन तत्साधनं युक्तं । तथाऽप्यनेन सहोपलंभेन रजतरजतत्वयोः संसर्गमात्रसाधनं युक्तमेव । न च समवायासिद्धिः । जातिव्यक्त्योः संबधांतराभावेन संसर्गमात्रसिद्धेः समवाय एव पर्यवसानादिति

द्रष्टव्यम् । तथा चेत्थं प्रयोगः । पुरोवर्तिरजतरजतत्वे परस्परसंसर्गवती अविसंवादिव्यवहारजनकत्वविशिष्टसाकांक्षधर्मधर्मिसहोपलंभविषयत्वाद्दंडदेवदत्तवदिति । अत्र धर्मधर्मिसहोपलंभविषयत्वमात्रं नेदं रजतमिति ज्ञानविषययोः शुक्तिरजतत्वयोरस्ति परस्परसंसर्गवत्त्वलक्षणं साध्यं तु नेति व्यभिचारस्तन्निरासाय साकांक्षेत्युक्तं । शुक्तिरजतत्वयोर्नेदं रजतमिति गृहीतासंसर्गत्वेन साकांक्षत्वाभावात्तेन तद्व्युदासः । साकांक्षधर्मधर्मिसहोपलंभविषयत्वमात्रं चेदं रजतमिति भ्रमविषययोः शुक्तिरजतत्वयोर्व्यभिचरितमित्यविसंवादिव्यवहारजनकत्वविशिष्टेत्युक्तं । तस्य च विसंवादिव्यवहारजनकत्वात्तेन तन्निरासः ॥ असंसर्गेति । असंसर्गो हि संसर्गस्याभावः । स चेदंरजतत्वयोः स्वरूपमेव # परेषामिति # कथं स्वरूपावभासेनावभासतेत्यसंसर्गाग्रहस्य निरस्तत्वाद्भेदाग्रहस्य च कोऽयं भेदो नाम किं स्वरूपं किंवा पृथक्त्वमित्यादिना विकल्प्य निरस्तत्वादित्यर्थः ॥ द्वितीय इति । संसर्गज्ञानस्य प्रवृत्तावनियतत्वे मध्यमवृद्धप्रवृत्त्या संसर्गज्ञानानुमानाभावेन पदानामन्वितार्थेषु व्युत्पत्त्यभावाच्छब्दप्रामाण्योच्छेदस्तदवस्थ इत्यर्थः । संसर्गज्ञानं प्रवृत्तौ नियतमपि न कारणमित्याद्यपक्षे दूषणांतरमाह ॥ किं चेति । नियतत्वेऽपि संसर्गज्ञानस्यासंसर्गाग्रहेणान्यथासिद्धत्वान्न प्रवृत्तिकारणत्वमिति शंकते ॥ प्रतिभासमानयोरिति ॥ विपर्ययस्येति । संसर्गग्रहे सत्यसंसर्गाग्रहस्यावर्जनीयसंनिधितयाऽन्यथासिद्धत्वमिति वैपरीत्यस्यापि वक्तुं शक्यत्वादित्यर्थः ॥ विवादेति । विवादविषयीभूतं रजतज्ञानं शुक्तिविषयकं तद्विषयकव्यवहारजनकज्ञानत्वादित्यर्थः । अत्र रजतज्ञानमित्येव पक्षीकारे सत्यरजतज्ञानस्यापि पक्षत्वप्राप्त्यांऽशतो बाधः स्यात्तन्निरासाय विवादविषयीभूतमित्युक्तं ।

हेतौ च ज्ञानत्वादित्येवोक्ते घटादिज्ञाने व्यभिचारः । तन्निरासाय शुक्तिविषयकव्यवहारजनकेति । तावत्युक्तेऽदृष्टादौ व्यभिचारस्तन्निरासाय ज्ञानपदं ॥ सम्मतेति । शुक्तिविषयकव्यवहारजनकशुक्तित्वप्रकारकशुक्तिज्ञानवदित्यर्थः ॥ रजतानुपायत्वे सतीति । एतच्च रजतार्थिप्रवृत्तिविषये रजतोपाये व्यभिचारवारणाय रजतानुपायत्वं च घटादावनैकांतिकमिति तद्वारणाय विशेष्यं ॥ प्रकाशमानादिति । एतच्चेदं ज्ञानाप्रकाशदशायां ततोऽप्रकाशमाने भेदे घटे च प्रकाशमाने पटादिज्ञाने व्यभिचारवारणाय ततोऽप्रकाशमानभेदत्वे सतीति । विशेषणं त्विदं ज्ञानात्प्रकाशमानभेदे घटादौ व्यभिचारवारणाय प्रकाशमानादिदंज्ञानाद्धर्मिज्ञानाभावेनाप्रकाशमाने भेदे वस्तुनि व्यभिचारवारणाय विशेष्यं । तथात्वे विपर्ययाभावे ॥ अत एवेति । उक्तरीत्या व्यवहारस्य तन्मते बाध्यत्वायोगेन बाध्यव्यवहारजनकतयाऽगृहीतभेदज्ञानद्वयस्य भ्रांतित्वप्रसिद्धिविषयताया उपपादयितुमशक्यत्वादेवेत्यर्थः । न च वाच्यं विमतमयथार्थं बाध्यत्वाद्व्यवहारवदित्यत्र यद्बाध्यत्वं सिद्धांत्यभिमतं तदेव तन्मतेऽपि भविष्यतीति । अयथार्थत्वेन विज्ञातत्वस्य सिद्धांत्यभिमतबाध्यत्वरूपत्वात्तस्य च विशिष्टविषयकायथार्थज्ञानाभावेन विशिष्टविषयायथार्थव्यवहारस्य परमतेऽसंभवाद्बाध्यत्वरूपत्वानुपपत्तेः । यथा च विशिष्टज्ञानं विना व्यवहारासंभवस्तथोपपादितमधस्तात् ॥ व्यवहारवदिति । दृष्टांतीकरणं तु पराभ्युपगममात्रेण ॥ एवं चेति । अनुकूलतर्कसचिवैरुक्तामानुमानैर्विगीतप्रत्ययस्यायाथार्थ्ये सिद्धे तद्याथार्थ्यसाधकप्रत्ययत्वानुमानं कालापदिष्टं वेदितव्यमित्यर्थः ॥ एतेनेति । अनुकूलतर्कसनाथोक्तानुमानै रजतज्ञानस्य शुक्तिविषयतायाः सिद्धतया कालात्ययापदिष्टत्वेन विवादाध्यासितं रजतज्ञानं रजतविषयं रजतज्ञानत्वादित्यनुमान-

मपि निरस्तमित्यर्थः ॥ तत्त्यागेनेति । मात्रपदत्यागेन विमतज्ञानवृत्तिज्ञानत्वं यथार्थवृत्तीति प्रतिज्ञायामुक्तानुमानैरनुकूलतर्कसचिवैर्विमतज्ञानस्यायथार्थत्वेन निश्चितत्वात्कालात्ययापदिष्टत्वरूपप्रथमानुमानदोष एवेत्यर्थः ॥ अदुष्टेति । दुष्टसामग्र्यजन्यमात्रवृत्तित्वमुपाधिरित्यर्थः । तेनेश्वरज्ञानत्वादौ न साध्याव्याप्तिः । मात्रपदाभावे साधनवति ज्ञानत्वरूपपक्षे उपाधेः सत्वात्साधनव्यापकता स्यात्तन्निरासाय मात्रपदं ॥ अपि चैवामिति । बाधितसंसर्गविषयकस्य मेरुसर्षप इत्यादिवाक्यस्याबोधकत्वेऽग्निरनुष्ण इति बाधितविषयस्य वाक्यस्य घटः पचतीत्यनन्वितवाचकपदप्रयोगरूपादपार्थकाद्भेदो न स्यात् । अबोधकत्वस्योभयत्र साम्यादित्यर्थः ॥ दृष्टांतस्येति । कूर्मरोमरूपदृष्टांतस्य प्रत्येतुमशक्यत्वलक्षणसाध्यवत्तया संदिग्धत्वेन पक्षसमत्वादित्यर्थः । तथा च दृष्टांतत्वं तस्य न घटत इति भावः ॥ समेत्येति । समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषांता ह्यंडमुत्पादयंति त इत्यादिपुराणादित्यर्थः ॥ न चेति । तस्य द्रव्यस्य येऽवयवास्तद्योगादन्यत्तत्सादृश्यं नाम न चास्तीत्यर्थः । ननु शुक्तिकादिषु रजतादिसद्भावे इयं शुक्तिरित्यादिनिर्देशव्यवस्था शुक्त्याद्युचितार्थक्रियाव्यवस्था च कथमित्यत आह ॥ निर्देशेति । भूयस्त्वात् शुक्त्याद्यवयवभूयस्त्वात् । शुक्त्यवयवभूयस्त्वे शुक्त्यर्थिप्रवृत्तिरेव तत्र स्यात् । न रजतार्थिप्रवृत्तिरित्यत आह ॥ दोषेति ॥ बाध्येति । अल्पांशभूयोंऽशविषयीकरणाभ्यामेव ज्ञानयोर्बाध्यबाधकभाव उपपद्यत इत्यर्थः । तदुक्तं रामानुजभाष्ये । यथार्थं सर्वविज्ञानमिति वेदविदां मतं श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितो बहु स्यामिति संकल्पपूर्वसृष्ट्याद्युपक्रमे । तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदितं । त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते । यदग्ने

रोहितं रूपं तेजसस्तदपामिति । शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता । श्रुत्यैव दर्शिता तस्मात्सर्वे सर्वत्र संगताः । पुराणे चैवमेवोक्तं वैष्णवे सृष्ट्युपक्रमे । मानावीर्याः पृथग्भूतास्ततस्ते संहितं विना । नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः । समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषांता ह्यंडमित्यादिना ततः । सूत्रकरोऽपि भूतानां त्रिरूपत्वं तथा वदन् । त्र्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिदाभिदा । सोमाभावे च पूतिकाग्रहणं श्रुतिदर्शितं । सोमावयवसद्भावादिति न्यायविदो विदुः । व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः । तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् । शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव बोधितः । रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुतः । रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते । अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः । कदाचिच्चक्षुरादेश्च दोषाच्छुक्त्यंशवर्जितः । रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते । दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते । अतो यथार्थरूप्यादिविज्ञानं शुक्तिकादिषु । बाध्यबाधकभावोऽपि भूयस्त्वेनोपपद्यते । शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः । नातो मिथ्यार्थसत्यार्थविषयत्वनिबंधनं । एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिरिति ॥ सुवर्णानुलिप्तेति । सुवर्णानुलिप्तशंखे पीतः शंख इति प्रत्ययो यथा परंपरासंबंधविषयतया यथार्थस्तथाऽयमपि प्रत्यय इति भावः ॥ एवं स्वप्नेति । स्वप्ने प्राणिनां पुण्यपापानुगुणं तत्तत्पुरुषमात्रानुभाव्यास्तत्तत्कालावसानाः पदार्था भगवतैव सृज्यंते न तत्र रथान् रथयोगान् पंथानो भवंत्यथ रथान् रथयोगान् पथः सृजत इत्यादिश्रुतेरतस्तत्प्रत्ययो यथार्थः । जपाकुसुमसमीपवर्ती स्फटिकमणिः स्वच्छद्रव्यसंयोगवशात्स्फुटतरमुपलभ्यमानजपाकुसुमप्रभाभिभूततया रक्त इति गृह्यते ।

अतः स्फटिकलौहित्यप्रत्ययोऽपि यथार्थः । मरीचिकाजलप्रत्ययोऽपि तेजःपृथिव्योरंबुनोऽपि विद्यमानत्वादिंद्रियदोषेण तेजःपृथिव्योरग्रहणाददृष्टवशाच्च अंबुनो ग्रहणाद्यथार्थः । आलातचक्रस्य द्रुततरगमनेन सर्वदेशसंयोगादंतरालाग्रहणात्तत्र चक्रप्रतीतिरुपजायते । चक्रप्रतीतावप्यंतरालाग्रहणपूर्वकं तत्तद्देशसंयुक्ततत्तद्वस्तुग्रहणमेव क्वचिदंतरालाभावादंतरालाग्रहणं क्वचिद्दैर्घ्यादिति विशेषः । अत आलातचक्रप्रत्ययोऽपि यथार्थः । दर्पणादिप्रतिहतगतयो हि नयनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृण्हंति । तत्राप्यतिदैर्घ्यादंतरालाग्रहणाद्दर्पणे निजमुखप्रत्यय इति सोऽपि यथार्थः । दिगंतरस्यास्यां दिशि विद्यमानत्वाददृष्टवशेनैतद्दिगंशवियुक्तस्य दिगंतरांशस्य ग्रहणाद्दिगंतरप्रत्ययोऽपि यथार्थः । अंगुल्यवष्टंभतिमिरादिभिर्नयनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चंद्रग्रहणद्वयहेतुर्भवति । तत्रैका सामग्री स्वदेशविशिष्टं चंद्रं गृण्हाति । द्वितीया तु किंचिद्वक्रगतिश्चंद्रसमीपदेशग्रहणपूर्वकं चंद्रं स्वदेशसंयुक्तं गृण्हाति । अतःसामग्रीद्वयेन युगपद्देशद्वयविशिष्टचंद्रग्रहणे ग्रहणभेदेन ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चंद्रमसाविति भवति प्रत्ययः । देशांतरस्य तद्विशेषणत्वं देशांतरस्य गृहीतस्वदेशचंद्रस्य च निरंतरग्रहणेन भवति । तत्र सामग्रीद्वयं पारमार्थिकं । तेन देशद्वयविशिष्टचंद्रद्वयग्रहणं च पारमार्थिकं । ग्रहणद्वित्वेन चंद्रस्यैव ग्राह्याकारद्वित्वं च पारमार्थिकमिति । द्विचंद्रप्रत्ययोऽपि यथार्थ इत्येवंप्रकारेण सर्वेऽपि प्रत्यया यथार्था बोद्धव्या इत्यर्थः । समाः पूतीकाद्यंशसमाः । अल्पीयांसः पूतीकाद्यंशापेक्षया । आनुकूल्यः प्रतिनिधिः ॥ उभयेति । उभयोः सोमत्वपूतीकत्वयोः दर्शनप्रसंगादित्यर्थः ॥ कथं सोमकार्यं कुर्यादिति । एतच्चोपलक्षणं । पूर्वतंत्रेसामान्यं

वि
अ
कस्मै
भवतः।

तच्चिकीर्षा हीत्यधिकरणे यदि सदृशमुपादीयतेऽतस्तेषामवयवानां कतिपया लभ्यंते । जातिमात्रमवयवांतरं मात्रं च परित्यक्तं भवतीत्युक्तेस्तत्सदृशे तज्जात्यभावेन सोमादिसदृशे पूतीकादौ सोमत्वादिप्रकारकज्ञानस्य याथार्थ्यं न स्यादित्यपि द्रष्टव्यम् ॥ अन्यथेति । सोमाद्यंशाल्पीयस्त्ववतः पूतीकादेः सोमादिकार्यकारित्वे रजतांशाल्पीयस्त्ववती शुक्तिकाऽपि रजतार्थक्रियां कुतो न कुर्यादित्यर्थः ॥ मातृमातंगेति । मात्रतिसादृश्यं भार्यायां मातंगशब्दितचंडालातिसादृश्यं द्विजे मदिरादिसादृश्यं च फेनिलदूर्वामूलरसेऽस्तीति मात्राद्यवयवयोगाद्भार्यादीनां भार्याद्युपभोगे प्रत्यवायः स्यादित्यर्थः । चंडालप्लवमांतगदिवाकीर्तिर्जिनंगमा इत्यमरः ॥अल्पेति । भार्यादिषु मात्राद्यल्पावयवयोगान्मात्राद्युपभोगेनैव न भार्याद्युपभोगेन प्रत्यवाय इत्यर्थः ॥ तर्हीति । तदल्पावयवयोगात्तत्कार्यकारित्वाभावे व्रीह्यल्पावयवयुक्ता नीवाराःकथं व्रीहिकार्यं कुर्युरित्यर्थः ॥ दत्तमिति । किं तर्हि तदवयवसद्भावकल्पनया श्रुतिप्रामाण्यादत्यंतविविक्तानामेव वस्तूनामर्थक्रियासाम्यमुपगम्यतामित्युत्तरं दत्तमित्यर्थः ॥ ककारेति । ककारखकारयोर्निरवयवत्वेनापरावयवयोगाभावादिति भावः ॥ द्वितीय इति । अल्पीयसां रजतावयवानां भूयस्त्वज्ञानेऽन्यस्यान्यात्मना भानादन्यथाख्यातिप्रसंग इत्यर्थः ॥ ब्रह्मज्ञानमिति । ब्रह्मस्वरूपेऽज्ञायमानांशस्यातिभूयस्त्वाज्ज्ञायमानस्य त्वंशस्यात्यल्पीयस्त्वाद्ब्रह्मविषयकं ज्ञानं महाभ्रांतिरूपं नेत्यर्थः ॥ अत एवेति । अल्पांशविषयकज्ञानस्य भ्रांतित्वायोगादेव बाधस्य बाधत्वमपि न संभवतीत्यर्थः । यथार्थं सर्वविज्ञानमिति वदता मायावादिनिष्ठानां जीवब्रह्मस्वरूपैक्यब्रह्मनिर्गुणत्वादिज्ञानानां यथार्थत्वांगीकारे तद्विषयसत्त्वापातेनापसिद्धांतापत्तिस्तेषामसद्विषयत्वेन भ्रमत्वांगीकारे तु शुक्तिरजतादिज्ञानानामसद्वि-

षयकत्वस्यैतावंतमसदेव रजतं प्रत्यभादित्यनुभवसिद्धत्वाद्भ्रमत्वमेवांगीकर्तुमुचितमित्यादिदूषणं स्फुटत्वाच्छिष्यैरेवोह्यमिति नोक्तं ॥ एवमिति । स्वाप्नपदार्थानां भगवत्सृष्टतया सत्यत्वात्तत्प्रत्ययो यथार्थ इत्यस्य संमतत्वाद्विप्रतिपन्नान्युदाहरणांतराणि निरसनीयानीत्युक्तं । तन्निरसनप्रकारस्तु । यदुक्तं जपाकुसुमसमीपवर्ती स्फटिकमणिर्जपाकुसुमप्रभाभिभूततया रक्त इति गृह्यत इति । तन्न । जपाकुसुमगतलौहित्यस्य स्फटिके प्रतिबिंबितत्वेन रक्तस्फटिक इति प्रतीतेः सर्वानुभवसिद्धत्वात् । किंच जपाकुसुमप्रभाभिभूतत्वेन स्फटिके रक्तत्वप्रत्यये जपाकुसुमसमीपवर्तिशुक्लघटादावपि रक्तत्वप्रतीतिप्रसंगः । न च वाच्यं स्वच्छद्रव्यसंयोगो न स्फुटतरलभ्यमानप्रभाया अभिभावकत्वान्नोक्तातिप्रसंग इति । स्वच्छद्रव्यसंबंधस्य प्रतिबिंबतोपयुक्तत्वेन स्फुटतरोपलंभे उपयोगाभावात् । अपिच जपाकुसुमप्रभा स्फटिकदेशपर्यंतव्यापिन्युत तदव्यापिनी । द्वितीयेऽभिभावकत्वायोगः । आद्ये सा किं रक्तरूपवती उत न । नेति पक्षे जपाकुसुमप्रभाभिभूततया स्फटिको रक्तत्वेन गृह्यत इत्यनुपपन्नं । नाद्यः । जपाकुसुमस्फटिकयोर्मध्यप्रदेशे रक्तरूपवत्यास्तस्या उपलंभप्रसंगात् । यच्च मरीचिकाजलज्ञानयाथार्थ्योपपादनं तदनुपपन्नं । तेजःपृथिव्योर्जलांशस्य सत्वेऽपि जलांशस्याल्पीयस्त्वज्ञानेऽजलत्वमेव तस्य विज्ञातमिति जलार्थिप्रवृत्त्यनुपपत्त्या ज्ञानमात्रस्य प्रवर्तकत्वेन सर्वत्र प्रवृत्त्यापातेन च जलांशभूयस्त्वज्ञानस्यैव प्रवर्तकत्वेन वक्तव्यतया तस्या याथार्थ्यावश्यंभावात्। यदप्यलातचक्रज्ञानस्य याथार्थ्योपपादनं तदचारु । अलातस्य द्रुततरगमने सति निरंतरालातचक्रप्रतीतेरनुभवसिद्धत्वेन तद्याथार्थ्योपपादनस्य कर्तुमशक्यत्वात् । प्रसिद्धचक्रप्रतीतावंतरालरहितत्वेन सर्वदेशसंयुक्तवस्तुग्रहणमेवानुभवसिद्धं । यच्च

दर्पणादिषु निजमुखादिप्रतीतेर्याथार्थ्योपपादनायोक्तं दर्पणादिप्रतिहतगतयो हि नयनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृण्हंतीति । तदपि स्थवीयः । दर्पणादिप्रतिहतगतीनां नयनरश्मीनां निजमुखादिग्राहकत्वे शिलातलप्रतिहतगतीनामपि नयनरश्मीनां निजमुखादिग्राहकत्वप्रसंगात् । न च वाच्यं शिलातलस्यास्वच्छत्वान्न तथात्वमिति । नयनरश्मिगतिप्रतिघातकत्वे स्वच्छताया अनुपयुक्तत्वेन काठिण्यस्यैव चोपयुक्ततया तस्य शिलातलेऽपि सत्वेन वैषम्यायोगात् । विरलावयवस्य जलस्यापि नयनरश्मिप्रतिघातकत्वे स्वच्छजलांतर्गतशिलादेरग्रहणापत्तेश्च । दर्पणादिप्रतिहतनयनरश्मिभिर्बहुयोजनव्यवहितोर्ध्वभागस्थसूर्यादिग्रहणे पृष्ठभागस्थस्यापि वस्तुनो ग्रहणापत्तेश्च । दर्पणादिप्रतिहतनयनरश्मिभिर्दर्पणादिदेशग्रहणपूर्वकं निजमुखादिग्रहणेन ग्रहणद्वयस्य यथार्थत्वेऽपि दर्पणे मुखमिति दर्पणस्थत्वेन मुखप्रत्ययस्य सर्वानुभवसिद्धस्यायाथार्थ्यायोगाच्च । यच्च दिङ्मोहस्य याथार्थ्योपपादनाय दिगंतरस्यास्यां दिशि विद्यमानत्वादित्युक्तं । तदप्ययुक्तं । यस्यां दिशि दिगंतरभ्रमस्तस्यां दिगंतरांशसद्भावे मानाभावात् । न च वाच्यं त्रिवृत्करणश्रुतिः समेत्याऽन्योन्यसंयोगमित्यादिस्मृतिश्च तत्र मानमिति । श्रुतेस्तेजोऽबन्नानामन्योन्यमिश्रणाभिधायकत्वेन स्मृतेश्च महदादीनां पृथिव्यंतानामन्योन्यसंयोगप्रतिपादकतयाऽव्याकृताकाशभागरूपदिशामन्योन्यमिश्रणे मानत्वाभात् । यद्यप्यंगुल्यवष्टंभतिमिरादिभिर्नयनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चंद्रद्वयग्रहणहेतुर्भवति । तत्रैका सामग्री स्वदेशविशिष्टं चंद्रं गृण्हाति । द्वितीया तु किंचिद्वक्रगतिश्चंद्रसमीपदेशग्रहणपूर्वकं चंद्रं स्वदेशवियुक्तं गृण्हाति । अतः सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचंद्रग्रहणे ग्रहणभेदेन

ग्राह्याकारभेदादेकत्वग्रहणाभावाच्च द्वौ चंद्रमसाविति भवति प्रत्यय इत्यादिना द्विचंद्रज्ञानस्य याथार्थ्योपपादनं तदपेशलं । स्वदेशविशिष्टचंद्रग्रहणस्य यथार्थत्वेऽपि देशांतरविशिष्टचंद्रग्रहणस्य याथार्थ्यायोगात् । नन्वेतद्दोषपरिजिहिर्षयैव देशांतरस्यागृहीतस्वदेशचंद्रविशेषणत्वं देशांतरगृहीतस्वदेशचंद्रयोर्निरंतरग्रहणेन भवतीत्युक्तमिति चेत् । सत्यमुक्तं दुरुक्तं तत् । वैशिष्ट्यप्रतीतिं विना विशेषणत्वस्य क्वाप्यदर्शनात् । अन्यथा नैरंतर्येण गृहीतयोर्गजाश्वयोर्विशेषणविशेष्यभावप्रसंगात् । ग्रहणभेदेन ग्राह्याकारभेदादिति चायुक्तं । एकविषयकधारावाहिकग्रहणभेदेऽपि ग्राह्याकारभेदाभावादिति द्रष्टव्यम् ॥ रजतेति । रजतसंस्कारश्च दोषश्च रजतसंस्कारदोषौ तत्साचिव्यमित्यर्थः ॥ रजतेति । रजतं च शुक्तीदमंशश्च तदुभयविषयं तयो रजतशुक्तीदमंशयोः संसर्गासंसर्गानवगाहमानमित्यर्थः । परमतप्रमोषः परमतस्तेयं । नन्विदंरजतमिति ज्ञानस्य शुक्तिरजतसंसर्गविषयत्वे संसर्गस्यासत्त्वादसत्ख्यातिः प्रसज्यते तत्परिहारार्थं परमतप्रमोष इष्यत इत्याशयेन शंकते ॥ असत्ख्यातीति ॥ तेषामिति। पदार्थानां मानांतरेणानधिगतत्वे तेषु पदसंगतिग्रहणानुपपत्त्या तेषामन्यतोऽधिगतत्वमिति भावः ॥ शंकेति । अगृहीतासंसर्गज्ञानद्वयत्वशंकाप्रसंगादित्यर्थः ॥ अपौरुषेयत्वादिनेति । अपौरुषेयत्वमादिः प्रयोजकं यस्य तेन निर्दोषत्वेनेत्यर्थः ॥ तदिति । वेदजनितज्ञाने विपर्ययरूपत्वशंकाया अप्यपौरुषेयत्वादिनैव निराकर्तुं शक्यत्वादित्यर्थः ॥ पुर इति । पुरोदेशे रजतस्यादर्शनादित्यर्थः । तदन्यत्र सत्त्वम् ॥ कालांतर इति । विनष्टोत्पत्स्यमानघटांतरयोरपि कालांतरे सत्ताऽस्ति । अतोऽत्र प्रतीयमानरजतस्यान्यत्र सत्ता कल्प्यत इति शंकितुरभिप्रायः । विनष्टोत्पत्स्यमानयोः कालांतरे सत्ताऽस्तीत्येतदंगीक्रियते । अत्र प्रतीतरजतस्यान्यत्र सत्ता कल्प्यत इति

सु०टि०
॥५१॥

तु नांगीक्रियते । इत्याशयेन परिहरति ॥ सत्यमिति । अत्र प्रतीयमानरजतस्यान्यत्र सत्ताकल्पनं कुतो नांगीक्रियत इत्याशंक्यान्यत्र सत्तायाः साक्षात्परंपरया वा भ्रांतावुपयोगाभावादित्याह ॥ न तस्या इत्यादिना ॥ एतेनेति । अत्र प्रतीतरजतस्यान्यत्र सत्तायाः प्रवृत्तावनुपयोगितया तां विना प्रवृत्त्यनुपपत्त्यभावेन प्रवृत्त्यनुपपत्तिस्तत्र मानमित्यपि परास्तमित्यर्थः ॥ तादात्म्यमिति । शुक्तिरजततादात्म्यमित्यर्थः । असतोऽपि तादात्म्यस्य प्रतिभासः संभवति । धर्मत्वात् । रजतस्य तु स न संभवति । धर्मित्वादित्यत आह ॥ धर्मेति । मात्रशब्देन धर्मधर्मिभावस्य प्रतिभासाप्रतिभासप्रयोजकत्वं व्यावर्त्यते ॥ तस्येति । अत्रैव रजतसत्तानिषेधस्यात्रैव रजतस्य प्रसक्तत्वेनोपपत्तेर्न तदनुपपत्त्याऽन्यत्र सत्त्वसिद्धिरित्यर्थः ॥ तद्विषयेति । असदेव रजतं प्रत्यभादिति रजतासत्त्वप्रमाणस्यात्रासत्त्वं विषय इति विषयसंकोचे नियामकस्यान्यत्र सत्त्वकल्पकप्रमाणस्य निरस्तत्वादित्यर्थः ॥ तदिति । तदारोप्यं । आरोप्यतादात्म्यं चेत्युभयमसत् । असदेव रजतं प्रत्यभादित्याद्यनुसंधानादित्यर्थः ॥ इंद्रियेति । इंद्रियसंप्रयोगेऽसत्यपरोक्षत्वादित्यर्थः । इंद्रियसंयोगेऽसत्यपरोक्षत्वादिति हेतावपरोक्षत्वमात्रमिंद्रियसंयोगादापरोक्ष्ये शुक्त्यादावनैकांतिकमिति तन्निरासायेंद्रियसंयोगेऽसतीत्युक्तं । नन्वसदेव रजतं प्रत्यभादित्यसत्त्वविषयकप्रत्ययेन रजतस्य बहिःसत्त्वमेव निषिध्यते । अतो ज्ञानरूपस्य रजतस्य सत्त्वे तद्विरोधो नेत्याशयेन शंकते ॥ बहिः सत्त्वमिति । रजतस्य ज्ञानरूपतया सत्त्वे केनचित्प्रमाणेन सिद्धेऽसदेवेति प्रत्ययस्य बहिः सत्त्वनिषेधविषयकत्वकल्पना स्यात् । तदेव तु नास्तीत्याशयेन परिहरति ॥ आंतरत्व इति ॥ बाह्यतायामिति । आंतरस्य रजतस्य

कं०रा०
प्र० प्र०
अ०१
॥५१॥

बाह्यतावभासो भ्रम इति वदता पूर्वपक्षिणा बाह्यताया ज्ञानरूपत्वानंगीकारेण तत्रानैकांत्यमिति भावः ॥ अपरोक्षताया इति । रजतस्येति शेषः । साधनवैकल्यमेवोपपादयति ॥ ज्ञानस्येति । ज्ञानस्य स्वरूपेंद्रियसंयोगादेवापरोक्षताया अंगीकृतत्वादित्यर्थः । एवं सति रजतस्य सदसत्त्वे सति । असतोऽवभासानुपपत्तिरिति किं विवेकाग्रहवादिमतावलंबनेनोच्यत उतान्यथाख्यातिवादिमतावलंबनेनाहोस्विद्विज्ञानख्यातिवादिमतावलंबनेनाथवा सत एव रजतस्य प्रतीतिरिति पक्षावलंबनेनेति विकल्प्य नाद्य इत्याह ॥ विवेकेति । विवेकाग्रहवादस्यैव निरस्तत्वात्तदवलंबनेनासतोऽवभासानुपपत्तिरिति वक्तुमशक्यमिति भावः । द्वितीयं निराह ॥ अन्यथाख्यातिरिति । तृतीयं निराचष्टे ॥ विज्ञानेति । चतुर्थं निराह ॥ सत एवेति । तथा च भ्रांतिबाधान्यथानुपपत्त्या तैरप्यसदवभासस्यांगीकर्तव्यतया सतोऽवभासानुपपत्तिरिति वक्तुमशक्यमिति भावः ॥ तथा सतीति । शुक्तिसन्निकर्षस्य सत्त्वे इदंरजतमिति ज्ञानस्य शुक्तिविषयकत्वावश्यंभावात्तत्र भासमानं सर्वमसदित्येतद्गतमिति भावः ॥ संवृतिरेवेति । एवशब्देन शुक्तिसन्निकर्षो व्यावर्त्यते । तथा च न तज्ज्ञानावश्यंभाव इति भावः ॥ अंधस्येति । तदा संवृतेरेव कारणत्वेऽधस्यापि रजतादिप्रतिभासःस्यात् । अनंधस्याप्यसन्निहितेऽपि शुक्तिकाशकले रजतादिप्रतिभासः स्यादित्यापादनद्वये तात्पर्यं ॥ सहकारीति । तथा चापादनद्वयं न प्रसज्यत इति भावः ॥ दोषेति । दोषप्रयुक्तं भानं यस्य तद्दोषप्रयुक्तभानं । तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥ विशेषणेति । न च वाच्यमसतो ज्ञानविषयत्वाभावेन तत्र व्यभिचारवारणार्थत्वाभावेऽपि दोषजन्यत्वविशेषणस्य ब्रह्मणि तद्वारणार्थत्वेन सार्थक्यमिति ।

तत्रासत्त्वाभावरूपसाध्यस्यापि सत्त्वेन व्यभिचाराप्रसक्तेः । न च सद्विलक्षणत्वविशेषितानिर्वाच्यत्वसाधने ब्रह्मणि व्यभिचार-निरासाय दोषजन्यत्वविशेषणोपादानं कृतमिति वाच्यं । अनाधेयातिशयस्य ब्रह्मणो वेदांतजन्यवृत्तिव्याप्यत्वेऽपि त्वन्मते ज्ञानविषयत्वाभावेन विशेषितसाध्येऽपि व्यभिचाराप्रसक्त्या विशेषणोपादानवैयर्थ्यानिस्तारात् ॥ असिद्धेरिति । ज्ञाततापर-पर्यायप्राकट्यस्यैवाभावादिति भावः ॥ सिद्धसाध्यत्वादिति । सत्त्वाभावासत्त्वाभावरूपानिर्वाच्यत्वस्य साध्यत्वे सत्त्वाभाव-स्यास्माभिरप्यंगीकृतत्वेन सिद्धसाध्यत्वमसत्त्वाभावमात्रसाधनेऽसदेव रजतं प्रत्यभादित्यसत्त्वावेदकप्रमाणेन बाध इत्यादिदूषण-स्यापरिहारादित्यर्थः ॥ अप्रसिद्धेति । अनिर्वाच्यत्वरूपसाध्यरहिते शुक्त्यादावात्मनि च वर्तमानतया सपक्षावृत्तित्वेन च भ्रमविषयत्वरूपहेतुर्विरुद्धश्चेत्यर्थः । यद्वा । साध्यरहिते शुक्त्यादावात्मनि च वर्तमानतया भ्रमविषयत्वरूपहेतुरव्याप्तश्चेत्यर्थः ॥ घटादाविति । देशकालव्यवस्थया सत्त्वमसत्त्वं च घटादौ प्रत्यक्षादिसिद्धमिति सत्त्वासत्त्वयोः सार्वकालिकसार्वदेशिकनि-षेधरूपात्यंताभावप्रतियोगित्वसाधने बाधितविषयत्वमेवेत्यर्थः ॥ अभावप्रतियोगित्वराहित इति । आत्मनः पारमार्थिक-त्वान्निर्धर्मिकत्वादिति भावः । ननु निर्विशेषवस्तुत्वमपि कथमस्तीत्यत आह ॥ अपि चेति ॥ तस्मिन्निति । ब्रह्मण्येव सत्त्वासत्त्वयोरभावेनैकनिष्ठसंसर्गाभावप्रतियोगित्वरूपसाध्यपर्यवसानादनिर्वाच्यसिद्ध्यभावेनार्थांतरता स्यादित्यर्थः ॥ एकत्वेति । एकत्वगुणवति विभिन्नेऽधिकरणे तत्संसर्गराहित्येनेत्यर्थः । तथा चैकत्वगुणवन्निष्ठसंसर्गाभावप्रतियोगित्वं सत्त्वासत्त्वयोः साध्यमानमेकत्वगुणवति कश्चित्पदार्थे सत्त्वाभावमेकत्वगुणवत्यन्यस्मिंश्चासत्त्वाभावमादाय पर्यवस्यतीत्येकत्रैव सत्त्वासत्त्वोभय-

राहित्यासिध्याऽर्थांतरं तदवस्थमेवेति भावः ॥ सत्त्वमिति । सत्त्वमसत्त्वानधिकरणं योऽनात्मा तन्निष्ठसंसर्गाभावप्रतियोगी भवितुमर्हतीति प्रतिज्ञातेऽसत्त्वानधिकरणानात्मन्येव सत्त्वसंसर्गाभावस्यापि सिध्या न पूर्वोक्तार्थांतरतेत्यर्थः । अत्र चानात्मपदं सत्त्वस्य निर्धर्मिकात्मनिष्ठसंसर्गाभावप्रतियोगित्वमादाय प्रतिज्ञापर्यवसानादर्थांतरतानिरासाय । तावत्युक्ते सत्त्वस्यानात्मशश-विषाणादिनिष्ठसंसर्गाभावप्रतियोगित्वमादाय प्रतिज्ञापर्यवसानादर्थांतरता स्यात्तन्निरासार्थमसत्त्वानधिकरणेत्युक्तं ॥ अनात्मेति । प्रमेयत्वादौ व्यभिचारपरिहाराय संसर्गाभावप्रतियोगीति विशेषणं । तावत्युक्तेऽनात्मत्वे व्यभिचारस्तन्निरासायानात्मनिष्ठेत्युक्तं ॥ असिद्ध इति । अनात्मनिष्ठसंसर्गाभावप्रतियोगित्वरूपविशेषणासिध्या विशिष्टो हेतुरसिद्ध इत्यर्थः । वस्तुस्वरूपं रूपादी-नामिति रूपादीनां सत्त्वानधिकरणानात्मशशविषाणादिनिष्ठसंसर्गाभावप्रतियोगितया यथाश्रुतसाध्यस्य तत्र संप्रतिपन्नत्वेऽपि सत्स्वरूपस्य सर्वस्य सत्त्वाधिकरणत्वेन सत्त्वानधिकरणानात्मवस्तुनिष्ठसंसर्गाभावप्रतियोगित्वस्यासंप्रतिपत्तेरित्यर्थः । यद्यपि सिद्धांते शशविषाणादौ सत्त्वाभाववत्सत्त्वानधिकरणानात्मवस्तुनोऽसत्त्वेऽपि तत्र रूपाद्यभावस्य सत्वात्सत्त्वानधिकरणानात्म-वस्तुनिष्ठसंसर्गाभावप्रतियोगित्वरूपसाध्यं रूपादावस्तीति न साध्यवैकल्यं दृष्टांतस्येति वक्तुं शक्यं । तथाऽप्यनयैव रीत्या सत्त्वानधिकरणानात्मनो वस्तुन एवाभावात्तन्निष्ठसंसर्गाभावप्रतियोगित्वमसत्त्वरूपपक्षे पर्यवस्यतीत्यनिर्वाच्यसिध्यभावादर्थांतरत्वं वज्रलेपायितमित्यत्र तात्पर्यं । ननु विमतं सद्विलक्षणत्वे सति असद्विलक्षणमिति सद्वैलक्षण्यविशिष्टासद्वैलक्षण्यं न साध्यं । येन विशिष्टाप्रसिध्याऽप्रसिद्धविशेषणता स्यात् । किं नाम विमतं सद्विलक्षणमसद्विलक्षणं चेति प्रधानभूते सद्विलक्षणत्वासद्वि-

लक्षणत्वे साध्ये। तत्र च विशकलितप्रसिध्या साध्याप्रसिद्धिः परिहर्तुं शक्यैवेत्याशयेन शंकते ॥ सद्विलक्षणत्वेति ॥ सिद्धेति। सद्विलक्षणत्वांशे सिद्धसाधनस्योक्तत्वादित्यर्थः ॥ जगदिति। असद्वैलक्षण्यरूपसाध्यवत्तया निश्चितयोर्जगद्ब्रह्मणोर्बाध्यत्वरूपहेतोरवृत्तेः सकलसपक्षव्यावृत्तत्वेनासाधारण्यापातादित्यर्थः। ननु शुक्तिरजतस्यासद्वैलक्षण्यमात्रे साध्यमाने प्रतीतत्वं हेतूकुर्मः। अतो नासाधारण्यमित्यत आह ॥ प्रतीतत्वस्येति। असद्विलक्षणत्वज्ञस्यै ज्ञातव्यमसदेव हीत्युत्तरत्रासत्यपि प्रतीतत्वस्य वृत्तेर्वक्ष्यमाणतया तत्र चासद्वैलक्षण्यरूपसाध्याभावाद्व्यभिचार इति भावः ॥ ख्यातीति। असतोऽपि प्रतीतेर्वक्ष्यमाणत्वेनासद्वैलक्षण्यं विना ख्यात्यनुपपत्तेरभावाद्बाध्यत्वस्य ज्ञाननिवर्त्यत्वरूपत्वे तस्य शुक्तिरजतादावसिद्धेरन्यथाविज्ञातस्य सम्यग्विज्ञातत्वरूपत्वे तस्यात्मन्यपि सत्वेन सद्वैलक्षण्यं विनाऽनुपपत्त्यभावादित्यनेन प्रकारेणानिर्वाच्यत्वे मानतया परोक्ताख्यातिबाध्यत्वान्यथाऽनुपपत्तिरपि निराकृता वेदितव्येत्यर्थः। नन्वसदेव रजतं प्रत्यभादिति प्रत्ययेन रजतस्यार्थक्रियासामर्थ्यलक्षणसत्त्वाभाव एव गृह्यते नात्यंतासत्त्वं। अतोऽनिर्वचनीयत्वेन तत्प्रत्ययविरोध इत्याशयेन शंकते ॥ असदिति ॥ प्रत्यगिति। अहंपदार्थसंभिन्नतया प्रकाशेतेत्यर्थः ॥ सर्वेति। सर्वस्यापि पुरुषस्य तादृग्रजतोपलब्धिप्रसंगादित्यर्थः। न च वाच्यं शुक्त्यवच्छिन्नचैतन्यस्थाविद्यायाः पुरुषविशेषं प्रत्याच्छादकत्वात्तद्विवर्तभूतं रजतं तं प्रत्येव प्रकाशत इति। आच्छादकाज्ञानस्याच्छाद्यशुक्त्यवच्छिन्नचैतन्यस्थत्वे सर्वं प्रत्याच्छादकत्वावश्यंभावात्। न ह्याच्छाद्यस्थं तमः पुरुषविशेषं प्रत्येव घटमाच्छादयति ॥ फलैक्यादिति। इदमंशावच्छिन्नचैतन्यस्यैवेदंरूप्यवृत्तौ च प्रतिफलनादिति भावः ॥ शुक्तिसंभेदेति। रजतस्य

वृत्तौ

शुक्तिसंभेदप्रतीतिनियमहेतोः शुक्त्यवच्छिन्नचैतन्यस्थाविद्यापरिणामरूपत्वस्य दूषितत्वादिति भावः ॥ अनुभवेति । ज्ञानैक्यानुभवविरोधापरिहारादित्यर्थः । तया प्रतीत्या ॥ चतुर्थीति । असद्विलक्षणज्ञप्त्यै इति तादर्थ्यार्थकचतुर्थीप्रयोगेण वैलक्षण्यज्ञानं प्रति प्रतियोगिज्ञानस्य कारणत्वमुक्तमिति भावः । तस्य परस्य मूकोऽहमिति प्रयोक्तुः ॥ निरुपाख्यादिति । निर्गतोपाख्या ख्यातिर्यस्मात् तन्निरुपाख्यं । निष्प्रतीतिकमिति यावत् । तस्मादित्यर्थः ॥ तादिति । तस्मान्निरुपाख्यात् । वैलक्षण्यं नाम शुक्तिरजतादेः सप्रतीतिकत्वमेव । न चैवंरूपवैलक्षण्ये कश्चिद्विप्रतिपद्यते । येनासद्वैलक्षण्यसाधनाय परस्यायं प्रयासः सार्थकः स्यादित्यर्थः ॥ द्वितीय इति । नरशिरसि विषाणमस्तीति वाक्याज्जायमानज्ञानादन्यदिति द्वितयिः । इदं वाक्यं बोधकं न चेति प्राग्विकल्पिताबोधकत्वपक्षेऽतर्भवति । तथा च तत्र वक्ष्यमाणमनुभवविरोधादिदूषणमत्रापीति भावः ॥ अत एवेति । योग्यताराहित्येऽपि प्रतिवादिप्रयुक्तपदेषु संसर्गबोधकत्वस्य सत्वेनव्यभिचारादेवेत्यर्थः ॥ अन्यथेति । अविद्यमानस्य सर्वात्मना कर्तृत्वकर्मत्वायोगे घटो जायते घटः क्रियत इत्यादि न स्यात् । जनेः पूर्वमविद्यमानस्य घटस्य सकलसामर्थ्यरहितत्वेन कर्तृत्वाद्ययोगादित्यर्थः ॥ अन्यथेति । इदं च तार्किकरीत्यैव । स्वमते घटस्य कारणात्मना पूर्वं सत्वात् । घटो जायत इत्यस्य मृद्घटोभवतीत्यर्थकत्वस्य वक्ष्यमाणत्वात् । ननु सदेव कार्यमुत्पद्यत इति सत्कार्यवादाश्रयणेन जनेः पूर्वं घटस्य सत्वात्कर्तृत्वादिसंभवेन घटो जायत इत्यादिकं युज्यत इत्यत आह ॥ सत्कार्यवादमिति ॥ न हीति । कारणानां सामग्र्यसाकल्ये सति कार्यानुत्पत्तिर्न हि युक्तेत्यर्थः । एककारणसत्वे कार्यानुत्पत्तेः संभवात्कारणसामग्र्येसतीत्युक्तं

॥ प्रातिभासिकमिति। यद्यपि किमनिर्वचनीयतया प्रतीयत इति विकल्पितत्वादनिर्वचनीयं वेति वक्तुमुचितं। तथाऽप्यनिर्वचनीयतया प्रतीतिस्वीकारपक्षेऽनिर्वचनीयस्य व्यावहारिकप्रातिभासिकभेदेन द्वैविध्याद्व्यावहारिकतया रजतस्य प्रतीत्यंगीकारेऽसत्या व्यावहारिकताया अपरोक्षप्रतीतिस्वीकारापत्त्या तस्य प्रातिभासिकतयैव प्रतीतेः स्वीकर्तव्यत्वादेवमुक्तमिति ध्येयम् ॥ विशिष्टेति। अपरोक्षतया सत्त्वेन च प्रतीयतेत्यर्थः। तथाऽपि रजते शुक्तिसत्तासंसर्गस्यासत एव भानमंगीकर्तव्यमित्यत आह ॥ शुक्तिकेदंतासंसर्गवदिति ॥ इतरेतरेति। शुक्तिकेदमंशस्य रजतत्वसंसर्गो रजतस्य चेदंतासंसर्ग इतीतरेतरसंसर्गो बोध्यः ॥ तथात्व इति। रजतगतस्य संसर्गद्वयस्य व्यावहारिकत्वे धर्मापेक्षया धर्मिणो न्यूनसत्ताकत्वायोगेन रजतस्यापि व्यावहारिकत्वापातादित्यर्थः। ननु नास्ति नासीन्न भविष्यति रजतमिति बाधबुद्धिगोचरस्य प्रतिपन्नोपाधिस्थत्रैकालिकनिषेधप्रतियोगित्वरूपधर्मस्य व्यावहारिकत्वेऽपि धर्मिणो रजतस्य प्रातिभासिकत्वान्नोक्तनियम इति चेत्। मैवं। धर्मिसत्ताप्रतिकूलत्वरहितधर्मापेक्षया धर्मिणो न्यूनसत्ताकत्वं नेति नियमस्य विवक्षितत्वेन प्रतिपन्नोपाधिस्थत्रैकालिकनिषेधप्रतियोगित्वरूपधर्मस्य च धर्मिसत्ताप्रतिकूलतया तद्भंगस्य वक्तुमशक्यत्वात् ॥ अनिर्वचनीयेति ॥ कोऽर्थ इति। व्यावहारिकताऽप्यनिर्वचनीयेति कोऽर्थः। किं व्यावहारिक्युत प्रातिभासिकी। नाद्यः। प्रवृत्त्यभावप्रसंगात्। द्वितीये व्यावहारिकतायां प्रतीयमाना व्यावहारिकता किं सत्युतासती। नाद्यः। व्यावहारिकतायाः प्रातिभासिकत्वानुपपत्तेः। न हि संभवति यस्य व्यावहारिकत्वं सत्तत्प्रातिभासिकमिति द्वितीयेऽपरोक्षतायाः सत्वेन चासतोऽपि प्रतीतिप्रसंगः। अथ व्यावहारिकतायां प्रतीयमाना व्यवहारिकताऽप्यनिर्वचनीयतयैवारोपितेत्युच्यते तदाऽनिर्वचनीयेति कोऽर्थ इत्यादेस्तत्राप्यावृत्त्या व्यावहारिकतारोपपरंपराया अपर्यवसानलक्षणानवस्थापत्तिः स्यादित्यर्थः ॥ तत्रैवेति। व्यावहारिकत्वारोपपरंपरापर्यवसानं द्वेधा क्वचिद्व्यावहारिकतायाः प्रातिभासिकत्वेन भानादसत्या एव भानाद्वेति। तत्राद्ये प्रवृत्त्यभावः प्रसज्येत। द्वितीयेऽसतो विशिष्टप्रतीतिः प्रसज्येतेति व्यवस्थिततया योजनीयं। सिद्धविषया प्रमाणसिद्धविषया ॥ विशेषणभेदेनेति। अत्र विशिष्टप्रत्ययशब्देनोक्तव्यावहारिकत्वविशिष्टप्रत्यय एव विवक्षितः। विशेषणशब्देन चोक्तानि व्यावहारिकत्वान्येव विवक्षितानि। तानि च प्रातिभासिकत्वात्प्रतीतिघटितस्वरूपाण्येव नार्थगतानि। एवं चोक्तप्रतीतिगर्भव्यावहारिकत्वरूपविशेषणानां भेदेंऽगीक्रियमाणे तद्घटितोक्तविशिष्टप्रत्ययभेद आवश्यक इति प्रकृताभिप्रायेणैवेदमुक्तमित्यवधेयम्। अतो दंडकुंडलरूपविशेषणभेदेऽपि विशिष्टप्रत्ययैक्यदर्शनात्कथमेतदिति शंकानवकाशः ॥ व्यावहारिकत्वेति। आपणस्थरजतसंसर्गद्वयस्य व्यावहारिकत्वप्रतीतावेवेष्टसाधनत्वानुमानदर्शनेनेह व्यावहारिकत्वाप्रतीत्येष्टसाधनतानुमानायोगात्तद्योगे च तन्मूलकेच्छानुपपत्तौ प्रवृत्त्यनुपपत्तेरित्यर्थः। ननु संसर्गद्वयस्य व्यावहारिकत्वाप्रतीतावप्युपस्थिते संसर्गद्वये व्यावहारिकत्वासंसर्गाग्रहमात्रेण प्रवृत्तिरुपपद्यत इत्यत आह ॥ अन्यथेति ॥ रजतस्यापीति। न हि यस्य सत्त्वं सत्तदसदिति संभवतीति भावः ॥ तदपीति। सत्त्वस्य सत्त्वमपि सदसद्वेति विकल्पे तत्र च सत्त्वपक्षांगीकारे रजतस्यापि सत्त्वापत्त्या रजतसत्त्वसत्त्वस्यासत्त्वेऽंगीकर्तव्ये तस्य तथैव प्रतीतौ प्रवृत्त्यभावापातेन तस्यापि सत्त्वेन प्रतीतेरंगीकार्यत्वात्सत्त्वप्रतीतिपरंपरापर्यवसानरूपानवस्थादोषो भवत्पक्षेऽपि समान इत्यर्थः। परिहरति ॥ न समान इति। ननु यदि सत्त्वस्यापरं

सत्त्वं नास्तीति सत्त्वांशे सत्त्वविशिष्टप्रत्ययो नांगीक्रियते तर्हि कथं प्रवृत्तिरिति पृच्छति ॥ किं त्विति । उत्तरमाह ॥ रजतेति ॥ सत्त्व इति । परेण सत्त्वेऽप्यवांतरभेदस्यांगीकृतत्वेन सत्त्वप्रतीतिमात्रस्य प्रातिभासिकसत्त्वेऽपि पर्यवसानसंभवात्प्रातिभासिकस्य चार्थक्रियास्वनुपयुक्तत्त्वेन तन्मात्रस्य प्रवृत्तावनुपयोगित्वादित्यर्थः ॥ ब्रह्मणीति । ब्रह्मणि पारमार्थिकसत्त्वमिवांबरादेर्मायोपाधिकं व्यावहारिकं । सत्त्वमिव शुक्तिरजतादावप्यविद्योपाधिकं प्रातिभासिकं सत्त्वमस्त्येवेत्यर्थः ॥ अज्ञानेति । यद्यप्यज्ञानातिरिक्तस्य मिथ्याभूतस्य जीवब्रह्मविभागादेर्नाज्ञानकार्यत्वमंगीकृतं परेण तस्यानादित्वाभ्युपगमात् । तथाऽप्यज्ञानातिरिक्तस्य मिथ्याभूतस्याज्ञानस्थित्यधीनस्थितिकत्वरूपाज्ञानप्रयुक्तत्वाभ्युपगमादित्यर्थो द्रष्टव्यः । अन्यथा जीवब्रह्मविभागादिकं प्रत्यज्ञानस्य प्रयोजकत्वस्याप्यभावे यावन्मोक्षं तु भेदः स्याज्जीवस्य परमस्य च । ततः परं न भेदोऽस्ति भेदहेतोरभावतः । विभेदजनके ज्ञाने नाशमात्यंतिकं गत इत्यादेर्निर्विषयत्वापातात् ॥ अत एवेति । अज्ञाने सिद्धेऽज्ञानकल्पितजीवभावासिद्धिस्तत्सिद्धौ च जीवावरणाज्ञानसिद्धिरित्यन्योन्याश्रयत्वादेवाविद्या जीवं प्रतिबध्नातीति द्वितीयोऽपास्तो वेदितव्य इत्यर्थः ॥ अनेनेति । अप्रकाशस्वरूपत्वाज्जडे ज्ञानं न मन्यत इत्यनेन परोक्तिव्याजेन जडावरणाज्ञाननिरासे चावरणमज्ञानमसत्ये तेन चेष्यत इति पूर्ववाक्योक्तान्योन्याश्रयत्वादियुक्तितोऽन्या युक्तिरयुक्ता भवतीत्यर्थः ॥ तथाऽपीति । अप्रकाशस्वरूपत्वादित्येतावन्मात्रोक्तौ तेन नेष्यत इत्येतदनावर्त्य न चावरणमज्ञानमसत्य इत्येतावन्मात्रमावर्त्याऽप्रकाशस्वरूपत्वादसत्ये जडेऽज्ञानं नास्तीतीयं युक्तिः स्वमतेनैवाभिहितेति प्रतीतिः स्यात् । तन्निरासार्थं जडेऽज्ञानं न मन्यत इत्युक्तमित्यर्थः ॥ तदिति । अज्ञानारोपनिमित्तत्वा-

योगादित्यर्थः ॥ योगो वेति । निष्कलंकैकरसाद्वितीयचैतन्यस्याज्ञानारोपनिमित्तत्वयोगो वाऽहंकाररजतादिसमारोपस्यापि तादृशचैतन्यानिमित्तकत्वोपपत्तौ तदारोपनिमित्तत्वेनाज्ञानकल्पनाया वैय्यर्थ्यादित्यर्थः ॥ चैतन्यमात्रहेतुकस्येति । अज्ञानारोपस्येति शेषः ॥ दूषणसमुच्चय इति । अज्ञानोपादानमज्ञानमज्ञानांतरोपादानकं चेत्तदप्येवमित्यनवस्था । अज्ञानोपादानमज्ञानं प्रथमाज्ञानोपादानकं चेदन्योन्याश्रयतेत्युक्तविधया दूषणसमुच्चयश्च व्यवस्थित इत्यर्थः ॥ उक्तेति । एकमेवाज्ञानं स्वोपादानमित्युक्तपक्षांतरद्योतक इत्यर्थः ॥ स्वाभाविकत्वेति । स्वाभाविकत्व-सहेतुकत्वाभ्यामन्यस्य प्रकारस्याभावेनानयोरन्यतरः प्रकारोऽज्ञानारोपेऽवश्यमंगीकार्यः । तत्राज्ञानारोपस्य स्वाभाविकत्वां-गीकारे स्वाभाविकस्य निवृत्त्यनुपपत्त्या मोक्षाभावप्रसंगः। सहेतुकत्वांगीकारे तु तस्य केवलात्मस्वरूपनिमित्तकतायामहंकाररज-तादिसमारोपस्यापि तथात्वोपपत्तावज्ञानकल्पनावैय्यर्थ्यं मोक्षेऽपि तदारोपानुवृत्तिप्रसंगश्च। अज्ञाननिमित्तकतायां त्वनवस्थादिक-मितिभावः। न च वाच्यमकारणकत्वापरपर्यायस्वाभाविकत्ववतःप्रागभावस्य निवृत्तिदर्शनात्स्वाभाविकस्य निवृत्त्यनुपपत्तिरित्ये-तदयुक्तमिति । स्वाभाविकस्य स्वभावस्य निवृत्त्यनुपपत्तिरित्यस्य विवक्षितत्वात् ॥ कर्मेति । कर्मपरंपरायाः प्रमाणसिद्धवि-षयत्वादस्याश्चातथात्वादित्युक्तप्रकारेण कर्मपरंपरावदियमनवस्थानदूषणमिति प्रतिबंदी मोचितैवेत्यर्थः ॥ न वै इति। अनुष्टु-प्त्रिष्टुबादिछंदांस्येकेनाक्षरेणाधिकेन न वियंति न भंगं प्राप्नुवंति तथा न द्वाभ्यामिति बह्वृचब्राम्हणवचनादनवस्थितिस्तथाच स्यादित्यत्राक्षराधिक्यप्रयुक्तछंदोभंगो न शंकनीय इत्यर्थः। नन्वनवस्था तथा च स्यादित्यक्षराधिक्यं विना प्रयोक्तुं शक्येऽपि

न वैकाक्षरेणेत्यादिवैदिकमर्यादामाश्रित्यानवस्थितिस्तथा च स्यादिति किमर्थं प्रयुक्तमिति जिज्ञासायामाह ॥ अनवस्थेतीति । वैदिकत्वख्यापनार्थं स्वस्येति शेषः । अहमज्ञ इत्याद्यवभासो ज्ञानाभावविषयत्वेनान्यथासिद्धत्वान्न भावरूपाज्ञाने प्रमाणमिति शंकते ॥ नन्विति । परिहरति ॥ नेति । अयमवभासो न ज्ञानाभावविषयः । अपरोक्षावभासत्वादित्यत्र हेतुरस्तु साध्यं मास्त्वित्युक्ते विपक्षे बाधकतर्काभावादप्रयोजकत्वमित्यत आह ॥ अभावस्येति । तथा चाभावस्यानुपलब्ध्याख्यप्रमाणगम्यतया तज्ज्ञानस्यापरोक्षावभासत्वाभावादहमज्ञ इत्याद्यवभासस्य ज्ञानाभावविषयत्वेऽपरोक्षावभासत्वं न स्यादिति हेतूच्छित्तिरेव बाधिकेति भावः ॥ षष्ठेति । ज्ञानाभावेऽनुपलब्धिप्रमाणविषये ज्ञाततफलरूपलिंगानुभावानुमेये चांगीक्रियमाणे धर्मिण्यात्मनि प्रतियोगिनि चावगते ज्ञानस्यैव सद्भावादनवगते त्वात्मादौ कारणाभावादेवात्मनि ज्ञानाभावप्रतीत्ययोगादित्यर्थः ॥ विषयेति । विषयव्यावृत्तत्वं च सविषयकभावरूपाज्ञानस्यैव संभवति न ज्ञानाभावस्येत्यतो शास्त्रार्थं न जानामीत्यनुभवो भावरूपाज्ञानविषय एवेति भावः ॥ स्वज्ञानेति । यद्यपि घटप्रत्यक्षानंतरं तत्र मुद्गरादिनिपाते कृते घटध्वंसस्य दृष्टत्वात्स्वज्ञानस्य स्वनिवृत्तिहेतुत्वं नेत्यत्र तात्पर्यमवसेयम् । वस्तुतस्तु निमीलितनेत्रपुरुषप्रत्यक्षपाषाणादिसंबंधे घटध्वंसदर्शनेन व्यभिचारान्न प्रतियोगिप्रत्यक्षं ध्वंसकारणं । न च वाच्यं यत्र घटादिकं दृष्ट्वा मुद्गरादिकं निपात्य तन्नाशं करोति । तत्र प्रतियोगिप्रत्यक्षस्य ध्वंसं प्रति कारणत्वावधारणादन्यत्रापीश्वरीयं प्रतियोगिप्रत्यक्षं तत्त्वेन कारणमिति कल्प्यत इति । निमीलितनेत्रपुरुषप्रक्षिप्तपाषाणसंबंधनिमित्तकघटादिध्वंसस्थले प्रतियोगिप्रत्यक्षाभावेऽपि ध्वंसस्य ज्ञायमानतया व्यभिचारज्ञाने सति कारणत्वावधारणायोगात् । न

चोक्तस्थले व्यभिचारसंशय एव । स च ग्राह्यसंशयरूपत्वेनाप्रतिबंधक इति वाच्यं । अन्यत्र ग्राह्यसंशयस्याप्रतिबंधकत्वेऽपि फलबलेन व्यभिचारसंशयस्य व्याप्तिनिश्चयप्रतिबंधकतायाः सर्वैरभ्युपगतत्वेन तस्य तद्भ्रमकारणतानिश्चयेऽपि प्रतिबंधकत्वावश्यंभावादिति द्रष्टव्यम् ॥ सुषुप्तिकालीनेति । सुषुप्तिकालीनानुभवजन्यपरामर्श इत्यर्थः ॥ अन्योन्याश्रयतेति । ज्ञानाभावसिद्धौ तेन सामग्र्यभावसिद्धिः सामग्र्यभावसिद्धौ च तेन ज्ञानाभावसिद्धिरित्यन्योन्याश्रयापत्तेरित्यर्थः ॥ व्यभिचारादिति । ज्ञानेऽपि बहुलं स्मरणाभावस्य सत्वेन स्मरणाभावस्य ज्ञानाभावव्यभिचारादित्यर्थः ॥ विवादगोचरेति । विवादविषयतापन्नं प्रमाणज्ञानं प्रमाणज्ञानप्रागभावव्यतिरिक्तं प्रमाणज्ञानविषयावरणं प्रमाणज्ञाननिवर्त्यं । प्रमाणज्ञानदेशगतं यद्वस्त्वंतरं तत्पूर्वकं भवितुमर्हतीत्यर्थः । अत्र पक्षे प्रमाणपदं भ्रांतिज्ञानस्यापि पक्षत्वे तस्याज्ञाननिवर्तकत्वाभावेनांशतो बाधः स्यात्तन्निरासाय । वस्त्वंतरपूर्वकमित्येतावत्युक्ते विषयगताज्ञातत्वपूर्वकत्वेनार्थांतरता स्यात्तन्निरासाय स्वदेशगतेत्युक्तं । विषयगताज्ञातत्वस्य प्रमाणज्ञानदेशगतत्वाभावात्तेन तन्निरासः । तावत्युक्ते प्रमाणज्ञानप्रतिबंधकादृष्टपूर्वकत्वेनार्थांतरता स्यात्तन्निरासाय स्वनिवर्त्येत्युक्तं । प्रमाणज्ञानस्य स्वप्रतिबंधकादृष्टनिवृत्त्यनंतरं जायमानतया तन्निवर्तकत्वाभावेन प्रतिबंधकादृष्टस्य प्रमाणज्ञानानिवर्त्यत्वाद्भवति तेन तद्व्युदासः । तावत्युक्तेऽदृष्टस्य फलनिवर्त्यतया प्रमाणज्ञानोत्पादकादृष्टस्य प्रमाणज्ञाननिवर्त्यत्वात्तत्पूर्वकत्वेनार्थांतरता स्यात्तन्निरासाय स्वविषयावरणेत्युक्तं । प्रमाणज्ञानोत्पादकादृष्टस्य प्रमाणज्ञानविषयावरणत्वाभावात्तेन तन्निरासः । तावत्युक्ते प्रमाणज्ञानप्रागभावदशायां विषयाप्रकाशव्यवहारेण प्रमाणज्ञानप्रागभावस्य स्वविषयावरण-

त्वात्तत्पूर्वकत्वेनार्थांतरता स्यात्तन्निरासाय स्वप्रागभावव्यतिरिक्तेत्युक्तं । हेतावप्रकाशितपदं विहायार्थप्रकाशकत्वादित्युक्ते धारावाहिकद्वितीयादिबुद्धौ प्रथमज्ञानेनैवाज्ञानस्य निवृत्ततया साध्याभावाद्व्यभिचारः स्यात्तन्निरासायाप्रकाशितपदं । दृष्टांते प्राथम्यविशेषणं द्वितीयादिप्रभायां साध्यसाधनवैकल्यदोषनिरासाय ॥ विगीतमिति । विप्रतिपन्नमित्यर्थः । एतच्च देवदत्तनिष्ठद्वितीयादिप्रमाणज्ञाने बाधवारणाय । यज्ञदत्तनिष्ठप्रमाणज्ञाने सिद्धसाधनतानिरासाय देवदत्तनिष्ठपदं । यद्यपि यज्ञदत्तगतप्रमाणज्ञानस्योक्तसाध्यतदभाववत्तया विप्रतिपत्तिविषयत्वाभावेन विगीतपदेनैव तन्निरासाद्देवदत्तनिष्ठपदं व्यर्थम् । तथाऽपि विगीतपदेन विमतिविषयतावच्छेदकं यत्स्वसामग्रीकालीनस्वसमानाधिकरणज्ञानाविषयविषयकदेवदत्तनिष्ठप्रमाणज्ञानत्वं तदेकदेशस्य स्वसामग्रीकालीनस्वसमानाधिकरणज्ञानाविषयविषयकत्वस्य धारावाहिकद्वितीयादिबुद्धिव्यावर्तकस्य विवक्षिततया तस्य च यज्ञदत्तनिष्ठाद्यप्रमाणज्ञाने सत्वात्सिद्धसाधनप्रसक्तौ तन्निरासाय देवदत्तनिष्ठपदं सार्थकमेव। एवमेव पूर्वत्र विवादगोचरापन्नशब्दस्याप्यर्थोऽनुसंधेयः । भ्रांतिज्ञानस्य पक्षत्वेऽपि तत्र देवदत्तनिष्ठप्रमाणज्ञानप्रागभावातिरिक्तस्वप्रागभावरूपानादिनिवर्तकत्वमादाय साध्यस्य सत्वे बाधाभावात् । अत एव हेतोस्तत्र व्यभिचाराभावाच्च पक्षे हेतौ च प्रमाणपदं चिंत्यं । वस्तुतस्तु प्रमाणज्ञानपदं विहाय देवदत्तनिष्ठाभावातिरिक्तानादेर्निवर्तकमिति साध्यनिर्देशेऽपि भावरूपाज्ञानसिद्धेरवैकल्यात्तावदेव साध्यत्वेन विवक्षितं । एवंच देवदत्तनिष्ठभ्रांतिज्ञाने विवक्षितसाध्यस्याभावाद्बाधव्यभिचारयोः प्रसक्तौ तन्निरासाय पक्षे हेतौ च प्रमाणपदं सार्थकमिति द्रष्टव्यम् ॥ यज्ञदत्तेति । यज्ञदत्तगतप्रमाणज्ञानं देवदत्तनिष्ठाभावातिरिक्तयज्ञदत्तनिष्ठस्वप्रागभा-

वरूपानादेर्निवर्तकमिति तत्र साध्यमस्तीति भावः । एतच्चाभावनिवृत्तिर्भावादन्येतिमतेऽभावनिवृत्तिर्भावरूपेतिमते तु देवदत्तनिष्ठाभावातिरिक्तयज्ञदत्तगतेच्छाप्रागभावरूपानादिनिवर्तकत्वाद्यज्ञदत्तगतप्रमाणज्ञानस्य तत्र साध्यसत्त्वमिति द्रष्टव्यम् ॥ त्वदुक्तमिति । परोक्तार्थे संशयादिरूपज्ञानमात्रसत्त्वेन व्यवहारस्य ज्ञानाभावविषयत्वायोगादिति भावः ॥ तत्कथमिति । तत्तस्मादज्ञानस्य ज्ञाननिरस्यत्वाभ्युपगमात्त्वदुक्तमर्थं न जानामीति ज्ञायमानेऽर्थे कथं न जानामीति व्यवहार इत्यर्थः । न ह्यज्ञानस्य प्रमाणबोध्यतामंगीकुर्मः । येन तस्य प्रमाणनिवर्त्यतया प्रमाणेन ज्ञायमाने ज्ञानावच्छेदकेऽर्थे ज्ञानानुपपत्त्या न जानामीति व्यवहारानुपपत्तिः स्यात् । किंतु साक्षिवेद्यत्वमेव तस्य चाज्ञानाविरोधित्वान्न काऽप्यनुपपत्तिरित्याशयेन परिहरति ॥ मैवमिति । नन्वज्ञानावच्छेदकस्यार्थस्य प्राक् प्रमाणानधिगतत्वेऽयं क इत्यनुवादप्रश्नौ न स्यातां । न ह्यज्ञातमनुवादार्हं प्रश्नार्हं च भवतीत्यत आह ॥ प्रमाणेति । प्रमाणज्ञानोदयात्प्रागज्ञातत्वाकारेणार्थः साक्षिसिद्ध इत्यनुवादगोचरो भवति प्रश्नार्हश्च भवतीत्यर्थः । तथा चानुवादप्रश्नयोर्ज्ञातत्वमात्रं तंत्रं न प्रमाणाधिगतत्वमिति भावः ॥ प्रमाणेति । जडावरणाज्ञाने प्रमाणस्य जडस्याप्रकाशस्वरूपत्वादेव स्वपरग्रहणाभावोपपत्तावावरणकृत्यस्य चाभावादित्यर्थः ॥ प्रत्यक्षत्वस्येति । षष्ठप्रमाणकल्पनायां गौरवादभावज्ञानस्येंद्रियव्यापारान्वयव्यतिरेकानुविधायित्वाच्च । अभावप्रत्यक्षत्वस्यांगीकर्तुमुचितत्वादित्यर्थः ॥ अनुपपत्तिरिति । ज्ञानाभावप्रत्यक्षस्येति शेषः ॥ इयमिति । साक्षिणा ज्ञानाभावप्रतीतावेवाहमज्ञ इति प्रतीतिर्भवतीत्यर्थः ॥ असिद्ध्यादीति । ज्ञानहेतुत्वं प्रकाशकत्वं चेत्पक्षेऽसिद्धिप्रसंगः । ज्ञानत्वं चेत्प्रदीपप्रभारूपदृष्टांते साधनवैकल्यप्रसंग इति

भावः ॥ तमोऽपीति । अज्ञानांधकारानुगतवस्त्वभावेन तमःसामान्यं विवक्षितमिति वक्तुमशक्यत्वादिति भावः । न च वाच्यमज्ञानांधकारान्यतरविरोधित्वरूपं प्रकाशकत्वं पक्षदृष्टांतानुगतमस्तीति । धारावाहिकद्वितीयादिबुद्धौ विवक्षितप्रकाशत्वाभावेन व्यभिचाराप्रसक्त्या हेतावप्रकाशितपदस्य वैयर्थ्यापत्तेः । साध्यावैशिष्ट्याच्च । ननु प्रमाणेन नाज्ञानं साध्यते येन तस्य मानगम्यत्वं स्यात् । किं त्वज्ञानाभावव्यावृत्तिबोधनमेव तेन क्रियत इत्याशंकते ॥ तदभाव इति ॥ अभावव्यावर्तनामिति । अभावव्यावृत्तेर्भावरूपत्वेनाभावव्यावृत्तिबोधनं भावसाधनमित्यनयोरेकार्थत्वादज्ञानाभावः प्रमाणेन व्यावर्त्यत इति वदता तेनाज्ञानसाधनं क्रियत इत्युक्तं स्यात् । तथा च मानागम्यत्वमसिद्धमेवेति भावः ॥ तृतीयेति । विगीतं देवदत्तनिष्ठप्रमाणज्ञानं देवदत्तनिष्ठप्रमाणाभावातिरिक्तानादेर्निवर्तकं प्रमाणज्ञानत्वाद्यज्ञदत्तगतप्रमाणज्ञानवदिति तृतीयानुमानं त्वेतत्कपालनिष्ठघट एतत्कपालनिष्ठघटाभावातिरिक्तानादेर्निवर्तको घटत्वात्कपालांतरगतघटवदिति । घटादेरपि स्वाभावातिरिक्तानादिसाधनसौलभ्येनाभाससमानयोगक्षेमवत्त्वात्परास्तमित्यर्थः ॥ ज्ञानाभावेति । त्वदुक्तमर्थं न जानामीति व्यवहारस्य ज्ञानाभावविषयत्वे बाधकाभावादिति भावः । ननु त्वदुक्तमर्थं न जानामीति व्यवहारस्य ज्ञानाभावविषयकस्य ज्ञानज्ञानाधीनज्ञानाभावज्ञानसाध्यत्वाज्ज्ञानज्ञानं तावदस्तीत्यंगीकर्तव्यं । तच्च ज्ञानावच्छेदकार्थज्ञानं विनाऽनुपपन्नमिति ज्ञानावच्छेदकस्यार्थस्यापि ज्ञानमस्तीत्येष्टव्यम् । एवं च त्वदुक्तार्थज्ञानाभावस्यैवायोगात्कथं तद्विषयको व्यवहार इति चेत् । भावरूपाज्ञानव्यवहारस्यापि विरोधनिरूपकज्ञानज्ञानाधीनभावरूपाज्ञानप्रतीतिसाध्यत्वाज्ज्ञानज्ञानं तावदस्तीत्यंगीकर्तव्यं । तच्च ज्ञानावच्छेदकार्थज्ञानं

विनाऽनुपपन्नमिति ज्ञानावच्छेदकार्थस्यापि ज्ञानमस्तीत्यंगीकार्यं । एवं च त्वदुक्तार्थविषयकभावरूपाज्ञानस्यैवायोगात्तद्विषयकोपि व्यवहारः कथमिति साम्यात् । ननु विरोधनिरूपकज्ञानावच्छेदकस्यार्थस्य ज्ञानं साक्षिरूपं । तच्च न भावरूपाज्ञानं विरुणद्धीति तद्विषयको व्यवहारः संभवतीति चेत् । सममभावविषयव्यवहारपक्षेऽपि । अवच्छेदकस्यार्थस्य ज्ञानं साक्षिरूपं । तच्च न वृत्तिज्ञानाभावं विरुणद्धि । अतस्तद्विषयको व्यवहारः संभवतीति सुवचत्वात् । तस्मात्त्वयाऽप्यवच्छेदकस्यार्थस्य सामान्यतो ज्ञाने विशेषे भावरूपाज्ञानं ज्ञायते । अतस्तद्विषयकव्यहारसंभव इति वाच्यं । तत्समं ज्ञानाभावव्यवहारपक्षेऽपि । किं च त्वन्मते जडावरकाज्ञानाभावेन त्वदुक्तमर्थं न जानामीति व्यवहारस्य ज्ञानाभावविषयत्वावश्यंभावादुक्तव्यवहारान्यथाऽनुपपत्तिर्भावरूपाज्ञाने प्रमाणमित्येतदत्यंतायुक्तं । न च जडे आवरणरूपातिशयाभावेऽपि विक्षेपरूपातिशयमादाय भावरूपाज्ञानविषयत्वस्य सत्त्वात्त्वदुक्तमर्थं न जानामीति व्यवहारस्य तद्विषयत्वसंभवेन ज्ञानाभावविषयत्वावश्यंभावेनेति वाच्यं । अपरोक्षतो घटत्वेन ज्ञाते घटेऽयं घटो नेति वाक्याभासप्रयुक्तविक्षेपसद्भावेऽपि घटं न जानामीत्यज्ञानविषयत्वव्यवहाराभावेन विक्षेपमादाय भावरूपाज्ञानविषयत्वस्य वक्तुमशक्यत्वात् । न च जडे न जानामीति व्यवहारस्य तदवच्छिन्नचैतन्यविषयतया जडावच्छिन्नचैतन्ये चावरणाज्ञानसद्भावाद्भावरूपाज्ञानविषयत्वं संभवतीति वाच्यं । अवच्छेदकजडांशानावरणस्याज्ञानस्य जडावच्छिन्नचैतन्यावरणत्वायोगेन केवलचैतन्यावरणत्वस्यैव स्वीकारापातात् । नचेष्टापत्तिः । शुद्धात्मज्ञानात्प्रागनिवृत्तिप्रसंगेन त्वदुक्तार्थज्ञानेन तदज्ञानं निवृत्तमित्यनुभवविरोधात् । अपिच त्वदुक्तार्थज्ञानं

मम नास्तीति ज्ञानाभावविषयकव्यवहारात्त्वदुक्तमर्थं न जानामीति व्यवहारस्य मात्रयाऽपि विषयीकृतवैलक्षण्यं नानुभूयत इति तस्यापि ज्ञानाभावविषयत्वमेव वक्तुमुचितं तस्मात्साधूक्तं त्वदुक्तमर्थं न जानामीति व्यवहारस्य ज्ञानाभावविषयोऽपि भविष्यतीति । तथात्वे बाधाभावेन रजतज्ञानस्य सत्यत्वे साक्षिचैतन्यस्वरूपस्य सत्यत्वेऽपि तद्विषयस्य सुखदुःखादेः परमते सत्त्वाभावादिति भावः ॥ ज्ञानादिति । अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च स इत्यादिवाक्यबलेन ज्ञानात्प्रसन्नस्य परमेश्वरस्यैव बंधविध्वंसकत्वाज्ज्ञानाद्बंधनिवृत्तिरसिद्धैवेत्युक्तं । अतो न तदन्यथाऽनुपपत्तिरपि बंधोपादानाज्ञाने प्रमाणमिति भावः ॥ न चैवमिति । एवं यावत्प्रमाणसिद्धं तावत्सुघटस्य दुर्घटस्य वा घटनायामविद्या पटुरिति त्वया न च वक्तुं शक्यते । सुघटांशेऽविद्यात्वाभावप्रसंगादित्युक्तमित्यर्थः ॥ विप्रतिपन्न इति । विपरीतज्ञानवानित्यर्थः ॥ अज्ञानमिति । निर्विशेषे स्वयं भाते किमज्ञानावृत्तं भवेदित्युपक्रमेऽज्ञानशब्दं प्रयुज्यानंतदोषदुष्टं च हेयं मायामतं शुभैरित्युपसंहारे मायाशब्दप्रयोगः । एकस्यैवाज्ञानस्याच्छादनप्राधान्येनाज्ञानमिति संज्ञा विक्षेपप्राधान्येन मायेति संज्ञा न त्वज्ञानमाययोः स्वरूपभेद इति परमतस्याविष्करणार्थ इत्यर्थः ॥ उपपादितमिति । एकस्यैवाज्ञानस्य संज्ञाद्वयं न वस्तुभेद इत्येतत्परेणैक्यलक्षणभेदाल्लोकव्यवहारसामर्थ्याद्वा तयोर्भेदः कल्प्यते । न तावल्लक्षणभेदः। अनिर्वचनीयतया तत्त्वावभासप्रतिबंधविपर्ययावभासलक्षणस्याविशेषादित्यादिना। तस्माल्लक्षणैक्याद्वृद्धव्यवहारेण चैकत्वावगमादेकस्मिन्नपि विक्षेपप्राधान्येन मायाच्छादनप्राधान्येनाविद्येति व्यवहारभेदः । इच्छाधीनत्वे तद्वैपरीत्येन वा व्यवहारभेद इत्यंतेन ग्रंथेन विवरणेनोपपादितमिति नास्माभिरुपपादनीयमिति भावः ॥ मंत्रब्राह्मणेति ।

यानि वाक्यानि प्रयोगकालेऽनुष्ठानोपयुक्ताभिधानप्रयोजकानि तानि मंत्रशब्देनोच्यंते । मंत्रभागादन्यो वेदभागो ब्राह्मणशब्देनोच्यते । तदुक्तं पूर्वतंत्रे । तच्चोदकेषु मंत्राख्या शेषे ब्राह्मणशब्द इति सूत्रद्वयेन । तदर्थस्तु । तस्यानुष्ठेयार्थस्य चोदकेषु प्रकाशकेषु मंत्राख्या मंत्रशब्दो मंत्रभागादविशिष्टवेदभागे ब्राह्मणशब्द इति । यद्यप्यदृष्टार्थमंत्रे इदमव्याप्तं । तथाऽप्यभियुक्तानां यत्र मंत्रप्रसिद्धिः स मंत्र इति मंत्रलक्षणं ज्ञातव्यम् ॥ परागिति । जडवृत्तिनिरोधद्वारेणेत्यर्थः ॥ स्वरूपमात्रलक्षणया वेति । यद्यपि पूर्वतंत्रे रथघोषेण माहेंद्रस्य स्तोत्रमुपाकरोतीत्यत्रेतरेतरयोगद्वंद्वे पदद्वयमपि श्रुतिवृत्तं स्यात्तदा तु रथघोषाभ्यामिति द्विवचनं स्यात् । समाहाराश्रयणे तु द्वेऽपि पदे समाहारलक्षणार्थे स्यातां । ततो वरं पूर्वपदमात्रं लक्षणावृत्तत्वमंगीकृत्य षष्ठीसमासाश्रयणमिति पदद्वयलक्षणाश्रयणस्य जघन्यत्वोक्तेस्तत्त्वंपदयोर्लक्षणाश्रयणेन तत्त्वमसीत्यादेर्मायावाद्युक्तं शोधितचैतन्यैक्यपरत्वं न संभवति । किं त्वेकपदामुख्यवृत्त्याश्रयणेन त्वं तन्नियम्योऽसीत्याद्यर्थपरत्वमेव न्याय्यम् । उक्तं चैतदेवाभिप्रेत्याचार्यचरणैर्विष्णुतत्त्वविनिर्णये । न च जीवब्रह्मणोरभेदे कश्चिदागम इति । तथाऽपि तत्त्वमसीत्यादेः पूर्वतंत्रन्यायविरुद्धमपि पदद्वयलक्षणैक्यपरत्वं मायावादिनांऽगीकृतमिति तथाऽनूदितं । न च वाच्यमुपक्रमादिना निर्विशेषे तात्पर्यस्य निश्चितत्वात्तत्त्वमसीत्यादौ पदद्वयलक्षणापरत्वकल्पनं युक्तमिति । सदेवेत्याद्युपक्रमस्थसदादिशब्दैः सत्त्वादिविशिष्टस्यैव प्रतीतेरुपक्रमादिना सविशेष एव तात्पर्यस्य निश्चितत्वात् । न चोपक्रमस्यापि निर्विशेषे तात्पर्यग्राहकमुपक्रमाद्यंतरमस्ति । न च वाच्यं विनिगमकाभावात्पदद्वयलक्षणेति । असिपदान्वयार्थं तत्पद एव

लक्षणायाः कल्प्यत्वात् । तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति तानि ह वा एतानि त्रीण्यक्षराणि सत्ति यमिति तद्यत्सदमृतं अथ यत्ति तन्मर्त्यं अथ यद्यं तेनोभे यच्छतीति छंदोगश्रुत्युक्तस्य मुक्तामुक्तनियामकत्वस्यैव गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयं वेदोऽयमाश्रयत्यर्थं को नु तं प्रतिकूलयेदिति न्यायेन सत्यशब्दार्थत्वेन ग्राह्यतया तत्सत्यमिति वाक्येन सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिवाक्येन च विरोधात् । तत्त्वमसीत्यस्य जीवब्रह्मैक्यपरत्वासंभवाच्च पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्तेनामृतत्वमेति । जुष्टं यदा पश्यत्यन्यमीशमित्यादौ भेदज्ञानेनैव फलश्रवणाच्चांतर्यामिब्राह्मणविरोधाच्च । न ह्येकत्र विंशति कृत्वांऽतर्यामित्वमभ्यस्तं साध्यद्वयमिति तत्त्वमसीत्यादिवाक्यं त्वंपदमुख्यार्थस्य तत्पदमुख्यार्थैक्यप्रतिपादकं नेत्यत्र साध्ये प्रत्यक्षविरोधो हेतुस्तदेव वाक्यं मिथ्याभूतविरोध्याकारत्यागेन चिन्मात्रलक्षणयैक्यबोधकं नेत्यत्र दुःखादेः सत्यत्वाद्दुःखादेर्विरोध्याकारस्य प्रत्यक्षेण सत्यत्वावगमादिति ॥ हेतुरिति । पृथक् साध्यद्वये हेतुद्वयमित्यर्थः ॥ कथं नेति । दुःखादिविशिष्टस्य निर्दुःखत्वाद्युपेतचैतन्यात्प्रत्यक्षेण भेदस्यैव ग्रहणादिति भावः ॥ नापीति । तत्त्वमसीत्यादिवाक्यं भागत्यागलक्षणया त्वंपदलक्षितस्य तत्पदलक्षितेनैक्यप्रतिपादकमिति न युक्तमित्यन्वयः । तत्त्वंपदलक्षणा हि मुख्यार्थैकदेशविरोधिदुःखाद्याकारं जहाति तदेकदेशभूतविशेष्यं तु न जहातीति जहदजहल्लक्षणेत्युच्यते ॥ वर्तमानेति । इदानीं विरोध्याकारस्य सत्त्वेनैक्याभावत्वं तदसीति वर्तमाननिर्देशस्यायोगादित्यर्थः ॥ तथा सतीति । विरोध्याकारस्यानित्यत्वे सति तन्निवृत्त्यनंतरं जीवब्रह्मैक्यस्य भविष्यत्वात्तत्त्वं भविष्यसीति निर्देशः स्यादित्यर्थः ॥ प्रत्यक्षेणेति । तेनेत्यस्य

व्याख्यानं प्रत्यक्षमेवेति परत्वनिर्दोषत्वाभ्यां प्रबलेन नायं सर्प इत्याप्तवाक्येन विरुद्धस्य दोषशंकाकलितस्य पूर्वस्यायं सर्प इति प्रत्यक्षस्याप्रामाण्यदर्शनादिति भावः ॥ न प्रतीतार्थमिति । प्रतीतार्थपरं नेत्यर्थः ॥ प्रत्यक्षेति । प्रमाणत्वे सति प्रतीतार्थे प्रत्यक्षविरुद्धत्वादित्यर्थः । तेन प्रतीतार्थे प्रत्यक्षविरुद्धमपि भ्रांतवाक्यं तत्परं दृष्टमिति तत्र व्यभिचार इति दूषणमलग्नकं बोद्धव्यम् । यद्वा । न प्रतीतार्थं प्रतीतार्थे न प्रमाणमिति साध्यार्थः । एवं च भ्रांतवाक्ये साध्यस्यापि सत्वान्न व्यभिचार इति ध्येयम् ॥ व्यभिचार इति । प्रस्तरवाक्ये परत्वनिर्दोषत्वयोःसत्त्वेऽपि बलवत्त्वस्याभावादिति भावः । यजमानः प्रस्तर इति वाक्ये यजमानपदस्य तत्कार्यकरत्वगुणयोगात्प्रस्तरे गौणी वृत्तिः । सा च न गृहीतेत्यगृहीतवृत्तित्वस्यैव दोषस्य सत्त्वेन निर्दोषत्वहेतोरेव तत्राव्रृत्तेर्न व्यभिचार इति शंकते ॥ नन्विति ॥ तत्त्वमस्यादीति । तत्त्वमस्यादिवाक्येऽपि तच्छब्दस्य जीवे ब्रह्मगुणसदृशगुणयोगाद्गौणी खलु वृत्तिः । सा च न गृहीतवृत्तित्वस्यैव दोषत्वान्निर्दोषत्वहेतोस्तत्रासिद्धिरित्यर्थः ॥ उपजीव्येति । यजमानमुद्दिश्य प्रस्तरैक्ये बोध्यमाने यजमानग्राहकप्रत्यक्षस्य धर्मिग्राहकत्वेनोपजीव्यतया तेन च यजमानस्य प्रस्तराद्भेदस्यैव ग्रहणेनोपजीव्यप्रत्यक्षविरोधाद्यजमानःप्रस्तर इति वाक्यस्य प्रतीतार्थपरित्याग उपजीव्योपजीवकयोरुपजीव्यं च बलवदिति न्यायादित्यर्थः ॥ शास्त्रीयत्वादिति । तद्भावस्य देवतोद्देश्यकद्रव्यत्यागात्मकयजनकर्तृत्वरूपयजमानत्वस्य शास्त्रसमधिगम्यत्वादित्यर्थः ॥ श्रुतिरिति । यजमानः प्रस्तर इति श्रुतिरित्यर्थः ॥ प्रत्यक्षेति । केवलप्रत्यक्षविरोधोऽपि कथमित्यर्थः ॥ प्रत्यक्षाकारस्येति । यजमानत्वाकारस्याप्रत्यक्षत्वेऽपि यजमानस्य प्रत्यक्षासिद्धो योऽयमाकारस्तस्य प्रस्तराभेदप्रति-

पादने क्रियमाणे प्रत्यक्षविरोधोदाहरणत्वेनोक्ता यजमानः प्रस्तर इतीयं श्रुतिरतः प्रत्यक्षाविरोधोऽपि कथमिति कथंताया अनवकाश इति शंकाभिप्रायः ॥ सममिति। यजमानः प्रस्तर इति वाक्यस्योपजीव्यप्रत्यक्षविरोधादेव प्रतीतार्थत्याग इति वदतो ममापि यजमानसंबंधिप्रत्यक्षाकारस्य प्रस्तराभेदप्रतिपादने उपजीव्यप्रत्यक्षाविरोध इति समं । एवंच यजमानः प्रस्तर इति वाक्य इव तत्त्वमसीत्यत्रोपजीव्यप्रत्यक्षविरोधाभावान्न प्रतीतार्थत्यागो घटत इति यतः शंका प्राप्ता । अतःप्रकृतेऽपि विरोधिप्रत्यक्षस्योपजीव्यत्वमाहेत्यर्थः ॥ तद्योऽहमिति । अस्यांशस्य जीवानुवादेन तस्य ब्रह्मत्वविधायकत्वेऽपि योऽसौ सोऽहमित्यंशस्य योऽसौ परमात्मा सोऽहमिति ब्रह्मानुवादेन जीवाभेदविधायकतया तत्त्वेनोदाहरणमिति द्रष्टव्यम् । तन्मानता भवेदित्यत्र तच्छब्दस्यावृत्तिमभिप्रेत्य व्याचष्टे ॥ तत्तस्मादिति ॥ प्रमाणामिति । तथा चोपजीव्यप्रत्यक्षविरुद्धमपि तत्त्वमसिवाक्यं नायं सर्पः किंतु रज्जुरेवेत्याप्तवाक्यवत्प्रमाणं भविष्यतीति भावः ॥ विनिगमनेति । उपजीव्यं प्रत्यक्षं तत्त्वविषयं न भवत्युपजीवकं तत्त्वमस्यादिवाक्यं तु तत्त्वविषयमिति विनिगमने कारणाभावेनोपजीवकस्य तत्त्वविषयताया अनिर्णयादित्यर्थः ॥ तदेवेति । तत्त्वविषयतानिश्चयार्थमपेक्षितं न्यायांतरमेव प्राबल्यप्रयोजकत्वेन वाच्यं । अनेन तत्त्वविषयकेणोपजीवकेनाप्युपजीव्यं बाध्यत इति न्यायेन किमित्यर्थः । ननूपक्रमादिरूपं न्यायांतरमेवोपजीवकस्यापि तत्त्वमसिवाक्यस्य प्राबल्यप्रयोजकत्वेन प्राचक्ष्मह इत्यत आह ॥ निरशिष्यन्न इति ॥ स्वतंत्रेति । स्वाधीनामुख्यप्रयोग इत्यर्थः । अकस्मात् निमित्तं विना प्रयोजनं विनेति यावत् । स्वातंत्र्य इत्यादिका निमित्तसप्तमी कुतो विषयसप्तमी किं न स्यादित्यत आह

॥ एतच्चेति ॥ प्रयुञ्ज्महीति । प्रपूर्वाद्युजेर्विधिलिङि प्रोपाभ्यां युजेरयज्ञपात्रेष्वित्यात्मनेपदं रुधादिभ्यः श्नमिति श्नमि श्नसोरल्लोप इत्याकारलोपो लिङःसीयुडिति सीयुडागमे लिङः सलोपोनंत्यस्येति सकारलोपे लोपोव्योर्वलीति यकारलोपे च रूपमेतत् । प्रयुञ्ज्महे इति पाठे लटिरूपमिति द्रष्टव्यम् ॥ व्यवहारास्त्विवति । वशीकृतग्रामं पुरुषमधिकृत्यायं ग्रामस्त्वयमेवेति स्वातंत्र्येणाभेदप्रयोगो द्रष्टव्यः । विद्यादिविशिष्टब्राह्मणमधिकृत्याऽस्मिन्ग्रामे ब्राह्मणाः सर्वेऽप्ययमेवेति वैशिष्ट्ये च गोष्ठ एकीभूता गावा इति स्थानैक्ये च पूर्वं परस्परविरुद्धा ब्राह्मणा इदानीमेकीभूता इति मत्यैक्ये चाग्निर्माणवक इति सादृश्ये चेति सन्न्यायरत्नावलीकृतोक्ताः स्वातंत्र्यादिनिमित्तकैक्यव्यवहारा द्रष्टव्या इत्यर्थः ॥ एतच्चेति । अद्वैतश्रुतेर्यथासंभवं स्वातंत्र्यादिनिमित्तत्वं च । अतोऽभेदवदेवैताः श्रुतयः प्रवदंति । पौराणानि च वाक्यानि सादृश्याभेदसंश्रयात् । सादृश्याच्च प्रधानत्वात्स्वातंत्र्यादपि चाभिदां । आहुरीशेन जीवस्य न स्वरूपाभिदां क्वचित् । स्थानैक्यमैकमत्यं च मुक्तस्य तु विशिष्यत इत्यत्राचार्याः स्पष्टीकरिष्यंतीत्यर्थः ॥ वृत्तीति । तत्त्वमसीत्यादिव्यपदेशः सादृश्याद्रौणो नान्योऽतोऽस्ति द्रष्टेत्यादिव्यपदेशो वैशिष्ट्यस्वातंत्र्ययोर्लाक्षणिकः । यत्र त्वस्य सर्वमात्मैवाभूत् विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते । आत्मनो ब्रह्मणोऽभेदमसंतं कः करिष्यतीत्यादिमुक्तैक्यव्यपदेशस्तु स्थानैक्येन निमित्तेन यदा प्रवृत्तस्तदा लाक्षणिकः । ऐकमत्यानिमित्तेन प्रवृत्तत्वे तु तस्य लक्षितलक्षणाविषयैक्यान्मत्यैक्यं ततश्च मतिमतामैक्यं लक्ष्यत इति । एवंप्रकारेण वृत्तिचिंतां तत्रैव करिष्याम इत्यर्थः ॥ अनभ्युपगमादिति । भेदश्रुतिः प्रमितस्य भेदस्यानुवादिनीति

त्वदभ्युपगमाभावादित्यर्थः ॥ अभ्युपगमे वेति । भेदश्रुतेः प्रमितभेदानुवादित्वस्याभ्युपगमे वा यत्प्रमाणप्रमितिभेदानुवादत्वं भेदश्रुतेस्तत्प्रमाणविरोधस्याद्वैतश्रुतेरित्यर्थः ॥ एतेनेति । भेदश्रुतेः प्रमितानुवादत्वस्य भ्रांतिसिद्धानुवादत्वस्य च निरासेनाप्राप्तप्रापकतारूपापूर्वताविरहाद्भेदश्रुतिर्दुर्बलेत्येतन्निरस्तमित्यर्थः । वर्णकांतरं व्याख्यानांतरं ॥ अस्येति । बंधमिथ्यात्वाभावतत्सत्यत्वरूपार्थस्येत्यर्थः ॥ अपेक्षितेति । शास्त्रस्यारंभणीयत्वसिद्ध्यर्थमपेक्षितोऽर्थो भगवज्जिज्ञासायाः कर्तव्यत्वं तत्र साधकं बंधनिवृत्तिलक्षणमोक्षस्य जिज्ञासोत्थज्ञानजन्यभगवत्प्रसादैकसाध्यत्वं तत्र हेतुर्बंधमिथ्यात्वाभावस्तत्सत्यत्वं च बंधस्य मिथ्यात्वेऽध्यस्तस्याधिष्ठानतत्त्वज्ञाननिवर्त्यतया तन्निवृत्तिलक्षणमोक्षस्य भगवत्प्रसादसाध्यत्वायोगात्तादृशहेतुसूचकेनेत्यर्थः । यद्वा । जिज्ञासाकर्तव्यतासिध्यर्थमपेक्षितावर्थौ विषयप्रयोजने तयोः साधको हेतुस्तत्सूचकेनेत्यर्थः । ततश्चातःशब्दस्यैवं योजना । बंधस्यामिथ्यात्वात्तत्प्रयुक्तसत्त्वात्तन्निवृत्तेरीश्वरप्रसादैकसाध्यतया तदर्था तज्जिज्ञासा कर्तव्येति । उत्तमत्वमेव विवृणोति ॥ कृपालुत्वादीति । एवं दृष्टः स भगवानित्यत्र स इति पदं व्याचष्टे ॥ स तथाविधगुण इति ॥ मीमांसेति । मीमांसाप्रयोजनार्थत्वेन तत्समर्थनार्थत्वेन चेत्यर्थः ॥ तथाभूत इति । वाक्यपर्यवसानहेतुभूतप्रतिपादनवान्पदांतरोपादानफलभूतप्रतिपादनवांश्च कार्यात्मैवेत्यर्थः ॥ वाक्येति । वाक्यतात्पर्यविषय इत्यर्थः । मद्वत् ममेव धर्मिणीति पक्ष इत्यर्थः ॥स्वतंत्रेति । एतच्चास्वतंत्रदारुयोषादिप्रवृत्तौ व्यभिचारवारणाय । शब्दस्तद्व्यापारो वेति लिङादिप्रत्ययरूपशब्दस्तन्निष्ठः शब्दभावनाख्यव्यापारो वेत्यर्थः । एतच्छब्दपरामृष्टं हेतुमाह ॥ बालेनेति । ननु स्वप्रवृत्तौ शब्दतद्व्यापारयोः कारणत्वानवधारणेऽपि ॥६२॥

परप्रवृत्तौ तयोः कारणत्वेन कल्पनं किं न स्यादित्यत आह ॥ तथाविधस्येति । दृष्टानुसारिणी हि कल्पनेति न्यायेन स्वप्रवृत्तौ कारणतया दृष्टस्यैव परप्रवृत्तौ कारणत्वावधारणान्न तयोः परप्रवृत्तिकारणत्वकल्पनमिति भावः ॥ व्याख्यानांतरेति । अतःशब्दस्येति शेषः ॥ कार्यं न हि क्रियाव्याप्यमिति । क्रियाव्याप्यत्वं कार्यत्वं न भवतीति प्रतिषिद्ध्यते । तदनुपपन्नं । कार्यशब्दार्थत्वेन संभावितस्यैव प्रतिषेधव्याप्यत्वात् । क्रियाव्याप्यत्वस्य कार्यशब्दार्थत्वाभावादित्यतस्तस्य तच्छब्दार्थत्वेन प्रसक्तिं दर्शयन्व्याचष्टे ॥ कार्यमिति ॥ हीति ॥ कृत्येति । ऋहलोर्ण्यदिति करोतेर्ण्यत्प्रत्ययेऽचोञ्णितीति वृद्धौ उरणरपर इति रपरत्वे सति निष्पन्नः कार्यशब्दः कृत्याः प्राङ्ण्वुल इति कृत्यसंज्ञण्यप्रत्ययांतत्वात्कृत्यप्रयांत इति भावः ॥ कृत्याश्चेति । यद्यपि तयोरेव कृत्यक्तखलर्था इति सूत्रे तयोरित्यनेन भावकर्मणोर्ग्रहणात्तयोरुभयोः कृत्याः स्मर्यंते । तथाऽपि लः कर्मणि च भावे चाकर्मकेभ्य इत्यस्मात्सूत्रात् भावे चाकर्मकेभ्य इत्यनुवृत्तेः सकर्मकेभ्य कृत्यादयो भावे न भवंतीति वृत्तिकारेणोक्तत्वेन सकर्मकेभ्यः कृत्यानां कर्मण्येव विधानात्तदभिप्रायेण कृत्याश्च कर्मणि स्मरंत इत्युक्तमिति द्रष्टव्यम् ॥ कर्म चेति । कर्तुरीप्सिततमं कर्मेति स्मरणादिति भावः ॥ तेनेति । कार्यशब्दस्य भविष्यति प्रयोगेणेत्यर्थः । ननु परसंबंधिन्यां भविष्यतिक्रियायां परस्य ममेदं कार्यमिति बुद्धिर्न भवति । परं प्रति तस्याः कार्यत्वाभावादित्यत आह ॥ न हीति । सा परसंबंधिनी क्रिया न भविष्यतिनेत्यपि न किंतु भविष्यत्वे सति क्रियात्वं परं प्रति तत्रास्त्येव । तन्मात्रशरीरं च कार्यत्वमिति तत्र परस्य कार्यत्वासिद्धिः स्यादेवेत्यर्थः । परसंबंधिन्यां भविष्यत्क्रियायां परस्य ममेदं कार्यमिति प्रत्ययोऽस्तु को दोष इत्यत आह ॥ प्रवृत्तिरपीति ॥ आवश्यककार्ये इति ।

कृत्याश्चेत्यत्रावश्यकाधमर्ण्ययोर्णिनिरिति पूर्वसूत्रादावश्यकाधमर्ण्ययोरित्यस्यानुवृत्तेरिति भावः ॥ भवति हीति । अतिशयित-
कामक्रोधाक्रांतचेतसः कस्यचित्परांगनागमनेन ब्राह्मणहननेन वा विना स्थातुं न शक्नोमीति बुद्धिर्भवति हीत्यर्थः ॥ अत्रेति।
तदिष्टं साधनं तथा कार्यमित्युपसंहारे तस्मात्पक्षांतराणामसंभवाद्वाक्यपर्यवसानहेतूभूतं कार्यमिष्टसाधनं वेत्यर्थके इष्टस्यापि
कार्यत्वेन ग्रहणात्कार्यता च न काचित्स्यादिष्टसाधनतां विनेत्युपक्रमेऽपीष्टत्वमिष्टसाधनतां विना न काचित्कार्यता स्यादिती-
ष्टत्वमपि ग्राह्यं । अन्यथोपक्रमोपसंहारयोर्वैरूप्यप्रसंगादिति भावः ॥ कृतिसाध्यत्वस्येति । कार्यं न हि क्रियाव्याप्यं
निषिद्धस्य समत्वत इति क्रियाव्याप्यत्वस्य निषिद्धब्रह्महननादिसाधारण्यरूपदोषस्तदनतिभिन्नस्य कृतिसाध्यत्वस्यापि
तत्साधारण्यलक्षणदोष उक्तप्राय इति भावः ॥ एतेनेति । फलसाधनता नाम या सा कार्यता नैव हि यस्मात्कार्यता
कृतिसाध्यत्वं फलसाधनता तु फलोत्पत्तौ कारणत्वमित्येवं ते कार्यताफलसाधनते परस्परं भिद्येते तस्मादिति कार्यतायाः
कृतिसाध्यतारूपत्वं यदुक्तमेतदप्येतेन निषिद्धब्राह्मणहननादिसाधारण्यरूपदोषेण निरस्तमित्यर्थः ॥ सत्यपीति । तथा च
नेष्टसाधनत्वं कार्यत्वमिति भावः ॥ अनिरूपणादिति । इष्टसाधनताबुद्ध्यतिरिक्तायाः कार्यताबुद्धेरनिरूपणादिति भावः ।
यद्वा । इष्टसाधनत्वातिरिक्तायाः कार्यताया अनिरूपणादित्यर्थः ॥ नन्विति । तथा च कार्यताज्ञानेष्टसाधनताज्ञानयोः
प्रवर्तकत्वाप्रवर्तकत्वे तज्ज्ञानविषययोः कार्यत्वेष्टसाधनत्वयोर्भेदं विना नोपपद्येते इति तद्भेदावश्यंभावादिष्टसाधनत्वं कार्यत्वमि-
त्येतन्न संभवतीति भावः ॥ असिद्धेरिति । इष्टसाधनताज्ञानं प्रवर्तकं नेत्यस्यासिद्धेरित्यर्थः । इष्टसाधनताज्ञानस्य

प्रवर्तकत्वेऽतिप्रसंगं शंकते ॥ अतीतादाविति । इष्टसाधन इति शेषः ॥ इदानीमिति । तथा च प्रवर्तकस्येदानीमिष्टसाधनमिति ज्ञानस्यातीतादावभावान्न प्रवृत्तिप्रसंग इति भावः ॥ एकार्थेति । एकार्थनिष्ठा इत्यर्थः ॥ भूतादीति । अतीतादौ गमकस्य कृतिसाध्यत्वावच्छिन्नेष्टसाधनत्वस्य सत्वाद्गम्यस्य कार्यत्वस्याप्यवगमः स्यादित्यतिप्रसंगस्यानिवारणादित्यतीतादेः कथं कृतिसाध्यत्वमित्यत आह ॥ न हीति ॥ तथा सतीति । अतीतादेः कृत्यसाध्यत्वे तत्कथं कृतितो जातमतः कृतिसाध्यमेवेत्यर्थः । नन्विदानीं कृतिसाध्यत्वविशेषितमिष्टसाधनत्वं कार्यत्वगमकं तस्य चातीतादेरिदानीं कृतिसाध्यत्वाभावेन तत्राभावान्न कार्यत्वावगमप्रसंग इति शंकते ॥ तथाऽपीति । नेदानीं कृतिसाध्यं भूतादिकमिति संबंधः ॥ इष्टसाधनत्वमिति । अतीतादेरिष्टसाधनत्वमपीदानीं नेतीदानीमिष्टसाधनत्वस्यैवातीतादिव्यावृत्तस्य गमकत्वोपपत्तौ कृतिसाध्यत्वविशेषणं व्यर्थमित्यर्थः । न च वाच्यमिदानीमिष्टसाधनत्वमेव कार्यत्वस्य गमकमिति ब्रूम इति । इष्टसाधनत्वातिरिक्तस्य कार्यत्वस्याभावेन तस्य तद्गमकत्वानुपपत्तेः । न च कृत्युद्देश्यत्वरूपं कार्यत्वमिष्टसाधनत्वातिरिक्तमस्तीति वाच्यं । मुख्यस्य कृत्युद्देश्यत्वस्य विवक्षायां त्वमुख्यस्य कृत्युद्देश्यत्वस्येष्टसाधनत्वानतिरेकेण तस्य तद्गमकत्वानुपपत्तेस्तादवस्थ्यात् । नन्वमुख्यं कृत्युद्देश्यत्वं न चिकीर्षाधीनकृतिसाध्यत्वं । तच्चेष्टसाधनातिरिक्तमेवेति नोक्तदोष इति चेन्न । फलेऽपि तत्प्रसंगात् । तत्रेच्छामात्रं न चिकीर्षेति चेन्न । सुखं कृत्या साधयिष्यामीतीच्छाया अनुभवेन चिकीर्षायास्तत्रापि सत्त्वात् । तथाऽपि फलेन साक्षाच्चिकीर्षाधीनकृतिसाध्यत्वं तस्य साधनद्वारा कृतिसाध्यत्वादिति चेन्न। शरीरचेष्टाद्वारा कृतिसाध्ये होमादौ तदभावप्रसंगात्। भोजनचिकीर्षाधी-

नकृतिसाध्यश्रमे तत्प्रसंगाच्च । ननु श्रमः कृतिसाध्यशरीरावयवस्पंदरूपभोजनक्रियासाध्यो न तु साक्षात्कृतिसाध्यः । कृते स्वध्वंसस्वसाक्षात्कारातिरिक्ते स्वभोजने चिकीर्षाविषय एव जनकत्वनियमात् । श्रमस्य च स्वजनकचिकीर्षाविषयत्वाभावादत एव श्रमो नांतरीयक इत्युच्यते । अतो न श्रमप्रसंग इति चेन्न । नित्यगम्यनिश्चलदेहश्रमत्वादिजडीकृतदेहस्य चलनादिक्रियाऽनुत्पादेऽपि श्रमानुभवेन कृतेरेव साक्षात्तं प्रति हेतुत्वात् । न च क्रियानुत्पादे कृतौ मानाभावः । अहं प्रयत इत्यनुभवात् । ननु चिकीर्षाधीनकृतित्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं तद्विवक्षितं श्रमनिष्ठकार्यतानिरूपितकारणतावच्छेदकं न चिकीर्षाधीनकृतित्वं किंतु द्वेषयोनियत्नादपि श्रमोत्पत्तेर्जीवनयोनिकृत्युत्पत्तिकृतित्वमेव । अतश्चिकीर्षाधीनकृतित्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य श्रमेऽभावान्नातिप्रसंग इति चेन्न । द्वेषयोनियत्नपदेन निवृत्तिलक्षणस्य यत्नस्य विवक्षायां ततः श्रमानुभवेन द्वेषयोनियत्नादपि श्रमोत्पत्तेरित्यस्यायोगात् । श्वशुवधादिगोचरप्रवृत्तिलक्षणस्य विवक्षायां तु तस्य भिन्नविषयकशत्रुगोचरद्वेषाजन्यतया प्रत्युत समानविषयकशत्रुवधगोचरचिकीर्षाजन्यत्वेन तादृशयत्नसाध्यश्रमे चिकीर्षाधीनकृतित्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य वज्रलेपायितत्वात् । द्वेषसिद्धिस्तु शत्रुं द्वेष्मीत्यनुभवात् । ननु स्वविषयकचिकीर्षाधीनकृतिसाध्यत्वं तद्विवक्षितं । श्रमश्च भोजनादिविषयकचिकीर्षाधीनकृतिसाध्यो न स्वविषयकचिकीर्षाधीनकृतिसाध्यः । अतो न तत्रातिप्रसंग इति चेन्न । एतादृशकार्यत्वस्य निषिद्धे कलंजभक्षणादावपि सत्त्वेन निषेधानुपपत्तेः । फले स्वविषयकचिकीर्षाया उपपादितत्वेन तत्रातिप्रसंगस्यानिवारणाच्च । साक्षादिति

विशेषणप्रक्षेपे तूक्तं । नन्विष्टसाधनत्वं कार्यत्वमिति भवत्पक्षेऽपि निषिद्धसाधारण्यं तुल्यं । तस्यापि तात्कालिकेष्टसाधनत्वादिति चेत् । इष्टसाधनत्वस्य निषिद्धसाधारण्यं वदता किमभिप्रेयते । तज्ज्ञानेन तत्र प्रवृत्त्यापत्तिरुत निषेधानुपपत्तिः । आद्येऽपि तस्यानिष्टसाधनत्वाप्रतिसंधानदशायां तदापत्तिरुत तत्प्रतिसंधानदशायां । नाद्यः । इष्टत्वात् । न द्वितीयः । कलंजभक्षणादेरनिष्टसाधनत्वप्रतिसंधानदशायां तज्जन्यतात्कालिकतृप्तिरूपफले इच्छाया एवाभावेनेष्टसाधनताज्ञानस्याभावात् । न द्वितीयः । न कलंजं भक्षयेदित्यादिनिषेधवाक्यगतनञोऽसुरा इत्यादाविवेष्टसाधनत्वविरुद्धानिष्टसाधनत्वार्थकत्वेन निषेधोपपत्तेः । तत एवास्तिककामुकस्याकार्यमेव । एतत्कलंजभक्षणादिकमकृत्वा स्थातुं नोत्सह इति बुद्धिरुत्पद्यते । अकार्यशब्दार्थस्य निषेधवाक्यावगतस्यानिष्टसाधनत्वस्य तत्र सत्त्वात् । न च वाच्यं क्रियायोगस्थले नञः प्रसज्यप्रतिषेधार्थकत्वमेवेति । यजतिषु ये यजामहं करोति नानूयाजेष्वित्यादौ नञः पर्युदासार्थत्वेन तन्नियमाभावादिति दिक् ॥ गम्येति । कार्यताया गम्यत्वेनेष्टसाधनत्वस्य गमकत्वेन तयोर्भेदावश्यंभावादिष्टसाधनत्वमेव कार्यत्वमित्येतदनुपपन्नमिति भावः ॥ तदिति । कार्यत्वेष्टसाधनत्वयोर्गम्यगमकभावस्यैवानभ्युपगमादित्यर्थः ॥ निरुपाधिकेति । अन्येच्छानधीनेच्छाविषय इत्यर्थः ॥ संभावनेति । सुमनसामित्यनेन भगवतो मुख्येष्टत्वमस्तीत्यत्र संभावकमेव न तु प्रमाणमित्यर्थः ॥ अतिशयेनेति । प्रियशब्दात् द्विवचनविभज्योपपदे तरबीयसुनावित्यतिशयार्थे ईयसुन्प्रत्ययेऽपि प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राधिवृंदा इति प्रियशब्दस्य प्रादेशे तस्य प्रकृत्यैकाजिति टिलोपाभावेन गुणे च सति प्रेयशब्दस्य निष्पन्नत्वादिति

भावः ॥ बुद्धिरिति । निश्चयरूपांतःकरणवृत्तिर्बुद्धिः संकल्पविकल्परूपांतःकरणवृत्तिर्मन इत्यर्थः । व्युत्पत्तेः प्राथमिकव्युत्पत्तेः ॥ तेनेति । विकसितवदनत्वेन लिंगेनेत्यर्थः ॥ प्रियार्थश्चेति । प्रियार्थश्च तदेव पुत्रजन्म वेति ज्ञात्वेति संबंधः । तत्र हेतुः स्वदृष्टं पुत्रजन्म परित्यज्यान्यस्य प्रियार्थस्य कल्पनायोगादिति ॥ प्रियार्थं स्वदृष्टमिति । प्रियार्थरूपं स्वदृष्टपुत्रजन्म परित्यज्यान्यस्य कल्पनायोगात्तदेव पुत्रजन्मैव प्रियार्थ इति ज्ञात्वेति योजनीयं ॥ तन्निरासायेति । अत्यपूपांस्तव भ्रातेत्यादौ सिद्धार्थपरेऽपि पूर्वं कस्यापि पदस्य संगतिग्रहणरहितबालोऽपि व्युत्पत्तिमतीत्यनेन सिद्धपरवाक्यस्थलीयव्युत्पत्तौ कार्यव्युत्पत्त्यनंतरभावित्वासिद्धिकथनात्तन्निरासः कृतो भवतीत्यर्थः ॥ पिक इति । पिकः कोकिल इति प्रसिद्धार्थककोकिलशब्दसमानाधिकरणपिकशब्दप्रयोगात्कोकिलस्य पिकशब्दवाच्यत्वं जानातीत्यर्थः । यद्वा । पिकशब्दसमानाधिकरणप्रसिद्धार्थककोकिलशब्दप्रयोगात्कोकिलस्य पिकशब्दवाच्यत्वं प्रत्येतीत्यर्थः ॥ व्याप्तिमिति । यः सास्नादिमान्स गोशब्दवाच्य इति व्याप्तिमवधार्येत्यर्थः ॥ आनंतरिकीति । पदांतरव्युत्पत्त्यनंतरभाविनीत्यर्थः ॥ अस्या इति । मधुकरादिशब्दव्युत्पत्तेः कमलादिशब्दव्युत्पत्त्यनंतरभावित्वेऽपीत्यर्थः ॥ कमलादिपदानामिति । छोटिकावादनादिनाऽव्युत्पन्नमभिमुखीकृत्य कमलं जिघ्रंतं भ्रातरमंगुलीप्रसारणादिना प्रदर्श्य देवदत्त तव भ्राताऽयं कमलं जिघ्रतीति वाक्ये प्रयुक्ते कमलादिपदार्थानां वर्तमानत्वेन प्रतिसंबंधिनां प्रत्यक्षत्वोपपत्तेरिष्टत्वेन जिज्ञासायाः संभवात् । पदसमुदायस्यार्थसमुदाये सामान्यतः शक्तिमवधार्य पश्चादावापोद्धाराभ्यां तत्तत्पदस्य तत्तदर्थे शक्तिमवधारयतीत्याद्युक्तरीत्या कमलादिपदानां योग्यान्वितस्वार्थ एव व्युत्पत्तेरित्यर्थः । तावदागामिकार्य-

पर्यंतं । तदनुसंधानस्य वाक्यानुसंधानस्य ॥ अर्थेति । अर्थेन शब्दस्य यः संबंधो वाचकत्वरूपस्तज्ज्ञानवानित्यर्थः ॥ कालसंबंधीति । कालत्रयासंबंधिनि पराभिमतकार्ये व्युत्पत्त्यसंभवप्रतिपादनार्थं कालसंबंध्येवाकांक्षादियुतमिति वक्तव्ये वर्तमानमतीतं च भविष्यदिति च क्रमात् । आकांक्षादियुतं यस्मादिति क्रमप्रदर्शनं दृष्ट्याज्ञातपदार्थस्येत्युक्ते वाक्ये वर्तमानार्थभविष्यदर्थव्युत्पत्त्योर्यत्पौर्वापर्यमपेक्ष्यते तदर्थमित्यर्थः ॥ कर्तव्यमिति ॥ शब्दादिति । देवदत्तकृतः किं त्वया कटः क्रियते वेति पृष्टे न मया कृतो नापि क्रियते किं तु कार्य इति भविष्यत्कालीने कार्यशब्दप्रयोगदर्शनेन कार्यवाचकशब्दादेष्यत्कालीनत्वप्रतीतेरुक्तत्वादित्यर्थः ॥ न चेति । सिद्धार्थबोधः प्रवृत्तिनिवृत्त्यौपयिकार्थविषयो नेत्यर्थः ॥ स्वप्रधानमेवेति । न तु कार्यशेषतयेत्यर्थः ॥ तदर्थमिति । साक्षात्कारसाधनोपासनाहेत्वंतःकरणमलक्षयार्थमित्यर्थः । यद्वा । अंतःकरणनैर्मल्योपासनाद्वारा तत्साक्षात्कारार्थमित्यर्थः ॥ तदंगतयेति । कर्मणामीश्वरसाक्षात्कारांगत्वं चोक्तप्रनाड्या द्रष्टव्यम् ॥ प्रतिपत्ताविति । सत्यज्ञानादिवाक्यैर्जायमानब्रह्मप्रतिपत्तेः पारार्थ्येन तत्स्वरूपविषयत्वाभावात्प्रतिपत्तेरेव च प्रमाणफलत्वात्स्वप्रधाने ब्रह्मणि वेदस्य प्रामाण्यं संभवतीति भावः ॥ विशिष्टेति । विशिष्टमष्टाश्रयत्वादिरूपं संस्थानं यस्य तदित्यर्थः ॥ तदपीति । मानांतराप्राप्तत्वात्तदविरुद्धत्वाच्च खादिरो यूपो भवतीत्यादिवाक्यतात्पर्यविषयतया खादिरत्वादिकमपि गृह्यत इत्यर्थः ॥ सममिति । मानांतराप्राप्तत्वादविरुद्धत्वाच्चोपासनाकर्मभूतं सकलगुणक्रियाद्युपेतं ब्रह्मापि सत्यज्ञानादिवाक्यतात्पर्यविषयतया गृह्यत इति सममित्यर्थः ॥ श्रुतेरितीति । खादिरो यूपो भवतीत्यादिश्रुतेः खादिरत्वादौ प्रामाण्यनिश्चये सति हि विहितस्य खादिरत्व-

स्याभावेऽपूर्वनिष्पत्तिर्नेति वक्तुं शक्यं । पार्थिवद्रव्यमात्रे बंधनसंभवेन खादिरत्वादावतात्पर्योपपत्तेः । स एव तु नास्तीति
भावः ॥ अविद्यमानेति । तथा चाविद्यमानार्थोपासनेन फलाभावात्फलनिष्पत्त्यर्थमुपासनाकर्मकारके सकलगुणक्रियाद्युपेते
ब्रह्मणि श्रुतेस्तात्पर्यमवश्यमंगीकर्तव्यमिति भावः । अलमित्यस्याविद्यमानेनान्वयायोगाच्छेषपूरणेनान्वयं दर्शयति ॥ अलमिति
॥ दृष्टो हीति । अधीतस्य वेदस्य कर्मावबोधनरूपं दृष्टं हि प्रयोजनमित्यभियुक्तवाक्यात्कार्यनिष्ठताया अभ्युपगमात्कृत्स्नवे-
दस्यैकवाक्यत्वायोगेन वाक्यभेदः कल्प्यत इति शंकितुराशयः ॥ तर्हीति । यद्यभियुक्तवाक्यस्यानुसर्तव्यत्वनियमस्तर्हि
वेदोषरा वेदांता इति वेदांतानामुषरशब्दोक्तवस्तुतत्त्वप्रमितिरूपफलजनकत्वाभावप्रतिपादकं यदभियुक्तवाक्यं तदपि परमा-
स्तिकेन भवताऽनुसर्तव्यं स्यात् । तदनुसरणे च वस्तुतत्त्वप्रमापकवेदांतविचाराय शारीरकमीमांसारंभ इत्ययुक्तं स्यादिति
भावः ॥ एवमिति । वाक्यभेदकल्पनमित्यर्थः ॥ अवांतरेति । समस्तस्य वेदस्य ब्रह्मनिष्ठत्वेऽपि तदेकदेशस्यावांतरतात्पर्येण
कार्यनिष्ठतया तस्य तत्रोपक्रमाद्यानुगुण्यसंभवान्नेदं वाक्यभेदकल्पकमिति भावः ॥ अधिकारेति । कार्यनिष्ठवेदभागे स्वर्गा-
दिकामोऽधिकारी ब्रह्मनिष्ठवेदांतभागे तु मुमुक्षुरिति तयोरधिकारभेदाद्वाक्यभेदः कल्प्यत इति भावः ॥ तथा सतीति ।
अधिकारिभेदाद्वाक्यभेदे उपनिषत्स्वपि मध्वादिविद्यास्वप्यधिकारभेदस्य सत्वाद्वाक्यभेदः स्यादिति भावः ॥ देहव्य-
तिरिक्तात्मेति । पारत्रिकफलस्य देहव्यतिरिक्तात्मज्ञानाभावे पारत्रिकफलककर्मानुष्ठानानुपपत्तेरित्यर्थः । अनेनात्म-
ज्ञानस्य कर्मस्वरूपनिवर्तकत्वेन सन्निपत्योपकारकत्वरूपं तच्छेषत्वमुक्तं भवति । ततश्चात्मज्ञानद्वारा तत्प्रकर-

णस्याप्यात्मप्रकरणस्य कर्मांगभूतदेवतास्मरणार्थत्वे आत्मज्ञानस्य मोक्षरूपफलांतरोक्तिर्न स्यात् । अंगानां प्रधान-
फलव्यतिरिक्तफलायोगादित्यत आह ॥ तत्रेति ॥ आत्मेति । आत्मा ज्ञातव्य इत्यात्मज्ञानं मोक्षसाधनत्वेन
न विहितं किंतु तस्योक्तप्रकारद्वयेन कर्मानुष्ठानहेतुत्वं लक्ष्यते । एवमात्मज्ञानस्य कर्मशेषत्वेऽवगते या फलश्रुतिः साऽर्थवाद
एव भवेदतः स्वर्गादेरन्यन्मोक्षरूपं फलं नास्तीत्यर्थः ॥ प्रयाजादिष्विति । क्रतूपकाररूपाल्पफलकेषु प्रयाजादिषु वाक्यप-
र्यवसानाभावस्य दर्शनादित्यर्थः ॥ अत्रेति । न गिरा गिरेति ब्रूयादित्यत्रेतिशब्दः शब्दस्वरूपग्रहणार्थ एवातः कथमितिशब्द-
स्य वैपरीत्यवाचित्वमिति भावः ॥ अत एवेति । यत एव तत्रार्थप्रकरणे शब्दस्वीकारार्थमितिशब्दोऽत एव स वैपरीत्यवा-
चीत्युक्तमित्यर्थः । यद्वा न गिरा गिरेति ब्रूयादित्यत्रेतिशब्दो गिरा गिरेत्यनेनार्थग्रहणे प्रसक्ते तन्निवारणेन तस्य शब्दस्वरूपपर-
त्वव्यवस्थापकोऽतः कथमितिशब्दस्य वैपरीत्यवाचित्वमिति भावः । परिहाराभिप्रायस्तु यतोऽर्थप्रकरण इतिशब्दो यस्मात्परतः
प्रयुक्तस्तस्य शब्दस्य शब्दस्वरूपपरत्वव्यवस्थापनार्थोऽत एव कारणात्स वैपरीत्यवाचीत्युक्तं न तु स्वयमेव वैपरीत्यवाचकत्वा-
त्तद्वाचीत्युक्तमिति ॥ प्रमितिरिति । अनधिगततथाभूतार्थनिश्चय इत्यर्थः । तेन होमानुवादेन दध्यादिगुणविधिपरेण दध्ना
जुहोतीति वाक्येन होमप्रमितिरुत्पद्यते । न च तद्वाक्यं तत्परमिति चोद्यं निरस्तं । अत एवोत्तरत्र यूपादिवाक्यजन्यज्ञानस्य
प्रमितत्वोपपादनाय न चानुवादोऽयमिति ज्ञातार्थविषयकत्वरूपानुवादत्वपरिहारोऽपि संगच्छत इति द्रष्टव्यं ॥ प्रमाणावगत-
मिति । उक्तरीत्येति शेषः । ननु सत्यत्वादिविशिष्टस्य ब्रह्मणः सत्यज्ञानादिवाक्यार्थतया कथं पदार्थ इत्युक्तिरित्यत आह

॥ पदार्थ इति । अवांतरवाक्यार्थोपलक्षणमित्यनेन पदार्थशब्दस्यावांतरवाक्यार्थेऽजहत्स्वार्थलक्षणामभिप्रैति । तेन ब्रह्मात्मा-
दिपदार्थस्यावांतरवाक्यार्थस्य सत्यत्वादिविशिष्टब्रह्मणश्च तात्पर्यविषयत्वमुक्तं भवतीति द्रष्टव्यं । ननु काकेभ्यो दधि-
रक्ष्यतामित्यादौ काकादिपदानां शक्याशक्योपसंग्राहकदध्युपघातकत्वादिरूपधर्मपुरस्कारेणैव श्वादिष्वजहत्स्वार्थलक्षणाद-
र्शनात्प्रकृते च शक्याशक्ययोः पदार्थावांतरवाक्ययोरुपसंग्राहकधर्माभावेन पदार्थशब्दस्यावांतरवाक्यार्थे कथमजह-
त्स्वार्थलक्षणेति चेन्मैवम् । अवांतरवाक्यार्थस्यापि महावाक्यार्थरूपान्वयप्रतियोगितयाऽन्वयप्रतियोगित्वस्यैव पदार्था-
वांतरवाक्यार्थसंग्राहकस्य सत्वात् ॥ तथात्व इति । अवांतरवाक्यभेदाभाव इत्यर्थः । भिन्नावांतरवाक्यसमुदायरूपत्वान्म-
हावाक्यस्येति भावः । अत्र कश्चिदाह । अवांतरवाक्यार्थस्य न महावाक्यार्थेऽन्वयः किंतु महावाक्यस्थसर्वपदगोचरसमूहा-
लंबनस्मृतिरूपं करणं बुद्धतावत्पदार्थगोचरसमूहालंबनस्मृतिरूपावांतरव्यापारसहितमेकदैव महावाक्यस्थसर्वपदार्थानान्विततया
बोधयतीति । तन्न । दिनेदिने श्रुतेन शास्त्ररूपमहावाक्यैकदेशरूपावांतरवाक्येन तदर्थबोधोदयस्यानुभवसिद्धतया तस्याः
प्रक्रियायास्तद्विरुद्धत्वात् । किं चैवं सति प्रतिज्ञावाक्येन विशिष्टस्वार्थावबोधनात्कुत इत्याकांक्षानुदयेन हेतुवाक्यस्यानन्वयः न
स्यात् । तथा च बधिरकलहः स्यात् । तस्मादवांतरवाक्यार्थबोधपूर्वकत्वान्महावाक्यार्थबोधस्योक्तमुपपन्नमिति ॥ सत्यत्वा-
दीनामिति । अनुवादेन भाव्यमित्यनुषंजनीयं ॥ युगपदिति । एकदाऽनुवाद्यत्वविधेयत्वयोर्विरोधादित्यर्थः । अग्निहोत्रं
जुहोतीत्युत्पत्तिवाक्यविधेयस्य होमस्य दध्ना जुहोतीत्यादिगुणविधानदशायामनुवाद्यत्वदर्शनाद्युगपदित्युक्तं । अत एव वाजपेयेन ॥६७॥

स्वराज्यकामो यजेतेत्यत्र वाजपेयशब्दस्य गुणविधित्वे यागानुवादेन गुणविधानाद्यागस्यानुवाद्यत्वं फलोद्देशेन तस्य विधेयतया विधेयत्वं चापततीति कार्यनामधेयत्वमाश्रितं वाजपेयाधिकरण इति भावः ॥ स्वतंत्रेति । महावाक्यभेदकल्पनेत्यर्थः । नन्वरुणादीनां गवादिभिरन्वयस्य मीमांसकैरंगीकृतत्वात्कथमुच्यते तेषां क्रियापदेनान्वयस्तैरंगीकृत इत्याशंकायामाह ॥ अरुणादीनामिति । आरुण्यादेर्गुणस्य परिच्छेद्याकांक्षायां द्रव्यस्य च परिच्छेदाकांक्षायां सति च योग्यतादौ तद्वशादरुणादीनां गवादिभिः पार्ष्णिकः पाश्चात्योऽन्वयोंऽगीकृतः । तेन प्रथमं त्वरुणयेत्यादीनां क्रीणातीति क्रियापदेनैवान्वयोंऽगीकर्तव्य इति नोक्तविरोध इति भावः ॥ तदस्माकमपि सममिति । एतच्चोपलक्षणं । यद्यरुणयेत्यादावारुण्याद्यनेकगुणविशिष्टैकक्रियाविधानाद्वाक्यभेद इत्युच्यते । तदा सत्यं ज्ञानमनंतमित्यादावपि सत्यत्वाद्यनेकधर्मविशिष्टैकब्रह्मविधानाद्वाक्यभेद इति समानमित्यपि द्रष्टव्यम् ॥ न प्रमा जायत इति । व्युत्पत्तिविधुराणामित्यर्थः । निर्विषयत्वाच्च शब्दो न प्रमाणमित्याह ॥ किं चेति । शब्दाप्रामाण्यवादिबौद्धमतमनुवदति ॥ नन्वित्यादिना ॥ अद्वितीयत्वमिति । यद्यपि तत्त्वमसीत्यत्रैक्यमेव विधेयं । तथाऽपि जीवब्रह्मैक्यस्य द्वितीयसत्यत्वेऽनुपपत्तेरद्वियत्वमप्यर्थाद्विधीयत इत्यभिप्रेत्यैतदुक्तमिति द्रष्टव्यं ॥ तेनेति । प्रत्यक्षादिनाऽऽनंदादिरूपत्वाद्वितीयत्वविपरीतयोरनानंदादिरूपत्वसद्वितीयत्वयोर्जीवेऽवगाहनादित्यर्थः ॥ अमुख्येति । ज्ञानानंदादिरूपत्वेन ब्रह्मसादृश्यरूपामुख्यार्थकल्पनोपपत्तेरित्यर्थः ॥ तच्चेति । जीवस्यानंदादिरूपत्वं तद्विपरीताकारोल्लेखिप्रत्यक्षविरुद्धं । तथाऽऽनंदो न जीवस्वरूपभूतो योग्यत्वे सति तद्रूपत्वेनानुपलभ्यमानत्वात् । योग्यत्वे सति यद्यद्रूप-

त्वेन नोपलभ्यते नासौ तत्स्वरूपः । यथा पटस्वरूपत्वेनानुपलभ्यमानो घटो न तत्स्वरूपभूत इत्यनुमानविरुद्धं चेत्यर्थः ॥ अविद्येति । आनंदस्य जीवस्वरूपत्वेऽप्यविद्यावरणतिरोधानेनानवभाससंभवात्तद्विपरीताकारोल्लेखिप्रत्यक्षं भ्रांतमनुमानं चान्यथासिद्धमिति भावः । ननु जिज्ञासाया एव ज्ञानजकत्वेऽतो ज्ञानफलान्येव कर्माणीति कर्मणां ज्ञानफलत्वोक्तिर्विरुद्धा स्यादित्यत आह ॥ कर्माणि त्विति ॥ न विरोध इति । कर्माणि ज्ञानफलानीत्युक्ते जिज्ञासायाश्च तद्धेवेदित्यनेन विरोधो नेत्यर्थः ॥ विषयेति । असाधारणविषयसद्भावेनेत्यर्थः ॥ बाह्येति । बाह्यकरणप्रत्यक्षत्वादात्मन्यनाश्रितत्वाच्च शब्दो न प्रमाणमिति संबंधः । अत्र चाद्यहेतौ बाह्यकरणेति विशेषणं धूमज्ञाने व्यभिचारनिरासाय द्वितीयहेतावात्मनीति पदमसिद्धिवारणाय ॥ आकाशेति । अत्रापि शब्दो न प्रमाणमिति संबंधः । लिंगज्ञाने व्यभिचारनिरासायाकाशपदं ॥ मुखेति । दाहादिजनकवन्ह्याद्यभिन्नस्य शब्दस्य मुखे सत्वादिति भावः ॥ सर्वगतत्वेति । शब्दस्य मूर्तत्वे सर्वगतत्वे चेत्यर्थः ॥ न घटादिनेति । घटादेः शब्दस्य चायुतसिद्ध्यभावादिति भावः ॥ विशेष इति । आप्तत्वानाप्तत्वरूपो विशेष इत्यर्थः ॥ तस्येति । पुरुषस्य वाक्योच्चारण एवोपक्षीणत्वेन तस्य वाक्यजन्यज्ञानं प्रत्यकारणतया तद्गतविशेषस्य वाक्योत्पाद्यज्ञानगतसंवादित्वविसंवादित्वरूपवैलक्षण्यं प्रत्यप्रयोजकत्वादित्यर्थः ॥ संभावनेति । उत्कटकोटिकः संशयः संभावनेत्यर्थः ॥ सर्वशब्दानामिति । येन समवायस्तद्बोधकत्वादिति भावः । उतासंबद्ध इति पक्षं निराह ॥ न द्वितीय इति ॥ चशब्द इति । प्रत्यक्षवदित्यादिभाष्यमतःशब्दस्य व्याख्यानांतरमिति द्योतनार्थश्चशब्द इत्यर्थः ॥ स्वप्रयुक्तेति । शब्दो न प्रमाणमिति स्वप्रयुक्तवाक्यस्य

बाधाभावे शब्दप्रामाण्यमापततीति शब्दो न प्रमाणमित्यनेन व्याघातः । बाधाभावे तु शब्दो न प्रमाणमित्यस्यैव शब्दस्य प्रामाण्यमायातीत्युभयथाऽपि व्याघात इति भावः । यदा सर्वत्रापि बाधोऽस्तीति स्वप्रयुक्तवाक्यस्य बाधाभावे सर्वत्राबाध एवागत इति सर्वत्र बाधोऽस्तीत्यनेन व्याघातः । बाधाभावे त्वत्रैव वाक्यबाधाभावेन सर्वत्रापि बाधोऽस्तीत्यनेन व्याघात इति भावः ॥ शब्द इति । अत्र वक्ष्यमाणहेतुघटितशब्दत्वं पक्षतावच्छेदकत्वेन विवक्षितं । तेन शब्दत्वमात्रस्य पक्षतावच्छेदकत्वे शब्दाभासे बाधः । हेतोः पक्षतावच्छेदकत्वे प्रत्यक्षस्यापि पक्षतापत्त्या तत्र सिद्धसाधनं । अन्वयव्याप्तिग्राहकेणैव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेर्जातत्वेनानुमानवैफल्यं चेति दूषणानवकाश इति ध्येयम् ॥ संशयेति । अयथार्थज्ञानजकत्वे सति ज्ञानजनकत्वादिति हेत्वर्थो विवक्षितः । तेन विपर्ययाजनकत्वं नामायथार्थनिश्चयाजनकत्वं । तत्र चायथार्थज्ञानाजन्यत्वस्यैव हेतुविशेणत्वसंभवे शेषवैय्यर्थ्यमिति चोद्यानवकाश इति ध्येयं । अत्र सत्यंतं दुष्टेंद्रियादौ व्यभिचारवारणाय । तावन्मात्रं चाबोधके व्यभिचरितमिति विशेष्योपादानं ॥ इदमेवेति । अयथार्थज्ञानाजनकत्वे सति ज्ञानजनकत्वमेव प्रामाण्यमिति हेतोः साध्याविशिष्टत्वमित्यर्थः ॥ याथार्थ्यमिति । यार्थार्थ्यमेव प्रामाण्यं तन्मुख्यं ज्ञानशब्दयोरित्यत्र याथार्थ्यस्यैव प्रामाण्यशब्दार्थत्वेन वक्ष्यमाणतया तस्माच्चोक्तहेतोर्भिन्नत्वेन न साध्यावैशिष्ट्यमिति भावः ॥ शब्दमात्रेति । शब्दो न प्रमाणं तस्मिन्सत्यपि प्रमानुत्पत्तेरित्यत्र शब्दमात्रपक्षीकरणेंऽशतः सिद्धसाधनः । अश्रुते विस्मृतशक्तिके च शब्दे साध्यस्य सिद्धत्वात् । श्रुतत्वानुस्मृतसंगतिकत्वविशिष्टशब्दपक्षीकारे च हेतोरसिद्धिरित्यर्थः ।

नन्वेकस्य पदस्य श्रुतस्यानुस्मृतसंगतिकस्यापि प्रमानुत्पादकत्वात्कथमसिद्धिरिति चेन्मैवम् । वक्ष्यमाणरीत्या स्मृतेरपि प्रमात्वेनैकस्यापि पदस्य पदार्थस्मारकतया प्रमोत्पादकत्वस्यैव तत्र सत्वाच्छब्दस्यापि परोक्षविषयत्वे शब्दानुमानयोः साजात्यं स्यात् । अपरोक्षविषयेषु चाक्षुषस्पार्शनादिष्वेकजातीयत्वस्य दर्शनादित्याशयेन शंकते ॥ तथाऽपीति ॥ तत्किमिति । सर्वथा सर्वप्रकारेण तदेकजातीयत्वमापाद्यते उत यथाकथंचिदेकजातीयत्वमथानुमानत्वेनैकजातीयत्वमित्यर्थः ॥ चाक्षुषादाविति । चाक्षुषस्पार्शनादिष्वपि चाक्षुषस्पार्शनत्वादिरूपवैजात्यस्य सत्वेन सर्वथैकजातीयत्वस्याभावादित्यर्थः ॥ इष्टेति । परोक्षविषयत्वेन शब्दानुमानयोरेकजातीयत्वस्यास्माभिरंगीकृतत्वेन यथाकथंचिदेकजातीयत्वापादनमनिष्टापादनमिति भावः ॥ वैलक्षण्यस्येति । शब्दस्य शब्दत्वेनैव प्रामाण्यं नानुमानविधयेत्यनुमानात्तस्य वैलक्षण्यस्यापि समर्थयिष्यमाणत्वादित्यर्थः ॥ एतदपीति । अनुमानवदित्यर्थकेन चशब्देनैतदपि प्रमेयमुक्तमित्यर्थः । संकेतवादी शंकते ॥ अथाऽपीति ॥ असिद्धिरिति । अविज्ञानात्मकत्वहेतोरिति शेषः ॥ ज्ञानांगीकारेणेति । धूमज्ञानस्य प्रामाण्यांगीकारेण बाह्यकरणप्रत्यक्षत्वात्मासमवेतत्वरूपहेतुद्वयवति धूमादौ साध्यस्यापि सत्वात् । साध्यरहिते च धूमादिज्ञाने उक्तहेतोरेवाभावान्न व्यभिचार इति व्यभिचारपरिहारेऽस्माभिरपि शब्दज्ञानं प्रमाणमित्यंगीकृतत्वेन तत्र हेतोरसिद्धिरेवेत्यर्थः ॥ अव्याप्तीति । गमकस्य धूमस्य गम्येनाग्निना संयोगसद्भावेऽपि कृतकत्वादेरनित्यत्वादिना संयोगाभावादव्याप्त्या घटाद्यगमके पटादौ घटसंयोगस्य सत्वाद्वेति व्याप्त्या च संयोगस्य लिंगलिंगिनोः क्वापि समवायाभावादसंभवेन समवायस्य च गमकतायां प्रयोजकत्वासंभवा-

दित्यर्थः ॥ सांकेतिकत्व इति । शब्दार्थसंबंधस्येति शेषः ॥ तस्या इति । पुरुषेच्छायाश्चानियतत्वादित्यर्थः ॥ स्वाभाविकेति । यवादिशब्दः क्वचिद्दीर्घशूकादौ स्वाभाविक्या शक्त्यावबोधकः क्वचित्प्रियंग्वादौ संकेताद्बोधक इत्यार्यम्लेंच्छादीनां प्रागुक्तः प्रयोगप्रत्ययानियमो युज्यत इत्यर्थः ॥ अनियमस्येति । कृतकत्वस्य नित्यत्वेन सह संबंधग्रहणलक्षणदोषभावात्कश्चित्कृतकत्वेन नित्यत्वं प्रतिपाद्यते । तदभावाच्च कश्चित्तेनानित्यत्वं प्रत्येतीत्येवंप्रकारेणानियमस्योपपन्नत्वादित्यर्थः । ननु केषांचिच्छब्दानामसति स्वाभाविकेऽर्थसंबंधे संकेत एव कर्तुमशक्यः । अथ केनचिच्छब्देन निर्दिश्य खल्वयमस्माद्बोद्धव्य इति संकेतः कर्तव्यः । न चायं निर्देशः शब्दार्थयोः स्वाभाविकसंबंधं विना युज्यते । सर्वशब्दानां वाचकत्वस्य संकेताधीनत्वे निर्देशशब्दस्याकृतसंकेतत्वेन तेनार्थस्य निर्देष्टुमशक्यत्वात् । न च वाच्यमुक्तरीत्या शब्देन निर्देशायोगेऽपि प्रत्यक्षोपस्थितं घटादिकमंगुल्या निर्दिश्य तत्र घटादिशब्दसंकेतः कर्तुं शक्य इति । अतींद्रियपदार्थेंऽगुलिनिर्देशायोगेन तत्र शब्देनैव निर्दिश्य संकेतस्य कर्तव्यत्वात् । तस्य चोक्तरीत्याऽनुपपत्तेः । तस्मात्संकेतकरणमेव स्वाभाविकसंबंधं विनाऽनुपपद्यमानं तं गमयतीत्याशयेन शंकते ॥ नन्विति । उक्तरीत्याऽस्मदादिभिः संकेतस्य कर्तुमशक्यत्वेऽपि परमेश्वरेण सर्गाद्यकालोत्पन्नमहर्षिदेवताः प्रति तत्तच्छब्दानां तत्तदर्थेषु संकेतः कर्तुं शक्यत एव । परमेश्वरानुग्रहवशाद्धर्मज्ञानादिसंपन्नानां महर्षिदेवतानामतींद्रियादिसकलार्थसाक्षात्कारवत्त्वेन ताः प्रति तमर्थमंगुल्या निर्दिश्य ततच्छब्दप्रयोगस्य कर्तुं शक्यत्वादित्याशयेन परिहरति ॥ मैवमिति ॥ धर्मज्ञानेति । यद्यपि ज्ञानसंपत्तिरेव वक्तव्या प्रकृतोपयुक्तत्वात् । तथाऽपि योगजादृष्टजन्यत्वादतींद्रियादि-

विषयकज्ञानस्य ज्ञानसंपत्तिहेतुत्वेन धर्मग्रहणं । सति चित्तविक्षेपेऽनंतेषु पदार्थेषु संकेतो दुर्ग्रह इत्यतश्चित्तविक्षेपाभावं सूचयितुं वैराग्यग्रहणं । अनंतेषु पदार्थेष्वनंतानां शब्दानां संकेतग्रहणमसमर्थानां न संभवतीत्यतः सामर्थ्यापरपर्यायैश्वर्यग्रहणं च कृतमिति द्रष्टव्यम् । एतत्सर्वं कुतः संपन्नमित्याकांक्षायां परमेश्वरानुग्रहादित्युक्तम् ॥ परमेश्वरस्येति । यद्यपि सुकरशब्दस्येषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खलिति खल्प्रत्ययांतत्वात्तद्योगे च नलोकाव्ययनिष्ठाखलर्थतृणामिति षष्ठीप्रतिषेधात्परमेश्वरस्येति निर्देशानुपपत्तिस्तथाऽपि नलोकेत्यादिसूत्रेण कृद्योगलक्षणाया एव षष्ठ्याः प्रातिषिद्धत्वेन शेषलक्षणायाः षष्ठ्याः प्रतिषेधाभावात्तामादाय परमेश्वरस्येति निर्देशोपपत्तिरिति द्रष्टव्यम् ॥ सामयिकत्वे त्विति । वाचकत्वस्येति शेषः ॥ इश्वरेति । ईश्वरसंकेतितशब्दैर्व्यवहारनिष्पत्तिवदनीश्वरसंकेतितशब्दैरपि तन्निष्पत्तेरनुभवसिद्धत्वेन व्यवहारमात्ररूपं शब्दप्रयोजनमीश्वरानीश्वरसंकेतयोः समानमिति भावः । ननु दृष्टप्रयोजनस्य व्यवहारमात्रस्योभयसाधारण्येऽपीश्वरसंकेतितशब्दप्रयोगस्य साधुशब्दप्रयोगरूपत्वेन धर्मसंपादकत्वादीश्वरसंकेतितशब्दानां साधुत्वव्युत्पादनपरं व्याकरणमदृष्टार्थतया सार्थकं भविष्यतीत्याशयेन शंकते ॥ अदृष्टार्थमिति ॥ अतिप्रसंग इति । दंडचक्रादिसहकारिसंपत्तिमादाय घटादिकार्यापलापोऽपि स्यात् । क्षितिजलादिसहकारिसंपत्तिमादाय बीजस्यांकुरजननसामर्थ्यापलापप्रसंगात् । अंत्यतंतुसंयोगसहकारिणमुपादाय पटलोपोऽपि स्यादित्यर्थः भवेदेतद्यदीश्वरसंकेतितशब्दप्रयोगस्य धर्मार्थत्वे किंचित्प्रमाणं स्यात् । तदेव तु नास्तीत्याशयेन परिहरति ॥ नेति । ननु श्रूयते हि तस्माद्ब्राह्मणेन न म्लेच्छितवै म्लेच्छो ह वा एष यदपशब्द इत्याद्यपशब्दप्रयोगनिषेधः । तथैकः शब्दः सम्यग्ज्ञातः

सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति गुणवादः । तथाऽऽहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टिमित्यादिप्रायश्चित्तविधानं । तथा उतत्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनामित्यादयो मंत्राः शब्दापशब्दविभागाभिज्ञतदनभिज्ञस्तुतिनिंदापराः। तथा नानृतं वदेदित्यादीन्यर्थानृतभाषणनिषेधपराणि वाक्यानि सत्यान्न प्रमदितव्यं सत्यपूतं वेदवाक्यमित्यादीन्यर्थसत्यशब्दसत्यभाषणविधानपराणि च । एतैश्च साधुशब्दप्रयोगनियमस्य विधेयत्वाध्यवसायेन तस्य धर्मार्थत्वावगमात्कथं प्रमाणाभाव इत्यत आह ॥ श्रुत्यादेरिति । उदाहृतश्रुत्यादेः साधुशब्दप्रयोगनियमस्यादृष्टार्थतावगमकत्वेऽपि स्वाभाविकशक्तिमच्छब्दप्रयोगेश्वरसंकेतितशब्दप्रयोगयोरदृष्टार्थतायामौदासीन्यान्न त्वदभिमतार्थसिद्धिरिति भावः । ननु सास्नादिमत्यर्थे संकेतितं यच्चेष्टादिकं तत्र साध्यसत्वेऽप्यसाधुशब्दत्वस्याभावेन साध्याव्यापकत्वान्न तस्योपाधित्वमित्यत आह ॥ साधनावच्छिन्नेति। तथा च साधनावच्छिन्नसाध्यस्य चेष्टादावभावात्तद्वत्सु गाव्यादिशब्देषु चासाधुशब्दत्वस्य सत्त्वान्न तस्यानुपाधित्वशंकावकाश इति ॥ अन्यथेति । असाधुशब्दत्वस्य शुद्धसाध्यव्यापकत्वाभावेनानुपाधित्वमंगीकृत्य तत्र प्रयुज्यमानशब्दत्वेन तत्र संकेतित्वसाधने गोशब्दः सास्नादिमत्यर्थेऽस्मादिसंकेतितस्तत्र प्रयुज्यमानशब्दत्वाद्गाव्यादिशब्दवदित्यप्यनुमानं प्रसज्येत । तत्रेदमेव त्वया वक्तव्यं। साधनावच्छिन्नसाध्यव्यापकस्यासाधुशब्दत्वस्योपाधित्वान्नास्मदादिसंकेतितत्वानुमानं संभवतीति । तच्च ममापि सममिति भावः । यद्वा । तत्र प्रयुज्यमानशब्दत्वस्य तत्र संकेतितत्वेन गाव्यादिशब्देषु सहचारदर्शनमात्रेण तेन तत्साधने गोशब्दः सास्नादिमत्यर्थेऽस्मदादिसंकेतित इति प्रतिज्ञायामस्मदादिविशेषणं प्रक्षिप्य तेनैव हेतुनाऽस्मदादिसंकेतित्वमपि साधनीयं

स्यात् । सहचारदर्शनस्याविशिष्टत्वादिति भावः ॥ शब्दस्येति । सर्वस्यापि शब्दस्येत्यर्थः ॥ अतिरात्र इति । ज्योतिष्टोमस्य चतस्रः संस्थाः । अग्निष्टोम उक्थः षोडश्यतिरात्र इति । अग्निष्टोमस्यैव विधांतरमत्यग्निष्टोमो वाजपेयश्च षोडशिन एव भेदः । अप्तोर्यामश्चातिरात्रस्य भेद इति मीमांसकोक्तेः । तत्रातिरात्र इति रात्रिमतीत्य यः संतिष्ठते यज्ञः स उच्यते तस्मिन्नतिरात्रे षोडशिनं गृण्हातीति षोडशिशब्दितग्रहस्य ग्रहणं विधाय नातिरात्रे षोडशिनं गृण्हातीति षोडशिग्रहणं निषिध्यतेऽतो व्याहतो वेद इति भावः ॥ त्रिः प्रथमामिति । दर्शपूर्णमासयोः सामिधेनीः पंचदश विधायैकादश ऋचः पठित्वा तासां पंचदशत्वसंपत्त्यर्थं त्रिःप्रथमामन्वाहत्रिरुत्तमामित्याम्नातं । तत्र पुनरुक्तिर्वर्तत इति भावः ॥ न चानृतत्वामिति । पुत्रकामः पुत्रेष्ट्या यजेतेत्यादिवेदैकदेशेऽप्यर्थव्यभिचारित्वरूपमनृतत्वं नैवास्ति । क्वचित्फलाभावस्य कर्मवैगुण्यादिनिबंधनत्वादिति । दृश्यते त्विति सूत्रकार एव वक्ष्यतीत्यर्थः ॥ यदा चासिद्धिरिति । वेदवाक्येषु सर्वथा व्याघातस्यासिद्धिर्यथा भवति तथा श्रुतीनां परस्परविरोधपरिहारात्मके पादद्वये सूत्रकृदेव वक्ष्यतीत्यर्थः । यद्यपि न वियदश्रुतेरित्यादिसूत्रेष्वतिरात्रे षोडशिनं गृण्हातीत्यादीनां वाक्यानां भाष्यकृताऽनुदाहृतत्वात्तेषामविरोधस्तत्र नोक्त इति भाति । तथाऽपि पृथिव्यधिकाररूपशब्दांतरादिभ्य इत्यत्रादिशब्देनापौरुषयत्वादियुक्तिं संगृह्य निर्दोषवेदवाक्यानां सर्वथा विरोधो न संभवतीत्युक्तत्वात् । अतिरात्रेत्यादिवाक्यस्य विकल्पपरतयोदितहोमादिवाक्यस्य शाखाभेदविषयत्वेनाविरोध उक्तप्राय एवेति द्रष्टव्यं ॥ तीव्रत्वादिति । तारत्वमंद्रत्वादिधर्मोपेतत्वेनेत्यर्थः । तारत्वमंद्रत्वादेः कारणप्रयोज्यजातिविशेषरूपत्वादनित्यत्वगमकत्वमिति भावः ॥ प्रत्यक्षविशेषस्येति ।

धर्म्यंशविषयकप्रत्यक्षस्येत्यर्थः । धर्म्यंशज्ञाने व्याप्यवत्त्वज्ञानजन्यानुमितौ च कदाऽपि प्रामाण्यसंदेहाभावात्तत्प्रामाण्यस्य स्वतस्त्वमिति भावः । उत्पत्तौ स्वतस्त्वं निर्वक्ति ॥ ज्ञानजनकेति । प्रमाप्रमासाधारणधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयमात्रप्रयोज्यत्वमित्यर्थः । तेन ज्ञानजनकत्वं ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं वा ज्ञानव्यक्तिं प्रति जनकत्वं वा । नाद्यः । ज्ञानत्वस्याकार्येश्वरज्ञानवृत्तित्वेन कार्यतानवच्छेदकतया ज्ञानत्वावच्छिन्नकार्यताया एवाप्रसिद्धेः । न द्वितीयः । गुणस्यापि ज्ञानव्यक्तिं प्रति जनकतया ज्ञानजनकसामग्रीमात्राधीनजन्मत्वस्य प्रामाण्ये परतस्त्वपक्षेऽपि सिद्धत्वादित्यादिदूषणमलग्नकं बोद्धव्यम् । गुणस्याप्रमाव्यावृत्तधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वेन तत्साधारणधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वरहिततया तदाश्रयमात्रप्रयोज्यत्वस्य परतस्त्वपक्षे प्रामाण्ये सिद्धत्वाभावात् ॥ करणानामिति । करणानां प्रामाण्यस्य स्वतस्त्वं करणगतज्ञानजननशक्त्यैव ज्ञानगतयाथार्थ्यजनकत्वमित्येतदेव करणगतयथार्थज्ञानजननशक्तेस्तद्गतज्ञानजननशक्त्यभिन्नत्वं करणगतप्रामाण्यस्योत्पत्तौ स्वतस्त्वमिति फलितोऽर्थः । (ज्ञानजननशक्त्यभिन्नयथार्थज्ञानजनकशक्तिकत्वं करणगतप्रामाण्यस्य स्वतस्त्वं) । न च वाच्यं करणगतयथार्थज्ञानजननशक्तेस्तद्गतज्ञानजननशक्त्यभिन्नत्वे भ्रमस्थले ज्ञानजननशक्तेरप्रतिबंधः प्रमाजननशक्तेस्तु प्रतिबंध इति व्यवस्था न स्यादिति । एवं मां दहेत्यादावेकस्या एव दाहशक्तेर्विषयभेदेन प्रतिबंधाप्रतिबंधवत्प्रकृतेऽपि व्यवस्थोपपत्तेः ॥ ज्ञानगतेति । एतच्च करणगतयाथार्थ्यनिरासाय । न च वाच्यं लिंगज्ञानादेः करणत्वेन करणगतयाथार्थ्यमपि ज्ञानगतं भवतीति । ज्ञानगतशब्देन ज्ञप्तिमात्रगतत्वस्य

विवक्षितत्वात् ॥ ज्ञानग्राहकेणेति । ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकानुव्यवसायविषयत्वनैय्यत्यं ज्ञप्तौ स्वतस्त्वमित्यर्थः । अत्र च नैय्यत्योक्त्या तार्किकैरपि क्वचिदनुव्यवसायेन प्रामाण्यग्रहस्यांगीकृतत्वात्सिद्धसाधनमिति शंकाऽनुव्यवसायेत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यं प्रतिबद्धं घटज्ञानविषयकं ज्ञानं प्रति घटज्ञानप्रामाण्यस्याविषयत्वाद्बाध इति शंका ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घटज्ञानं गृह्णताऽनुव्यवसायेन पटज्ञानप्रामाण्यस्याग्रहाद्बाध इति शंका ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितेत्युक्त्याऽस्मन्मतेऽपि ग्राह्यप्रामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबंधे सत्यप्यनुव्यवसायेन प्रामाण्यस्याग्रहाद्बाध इति शंका च निरस्ता । अत्र यद्यप्येतादृशानुव्यवसायं प्रत्येव विषयत्वमिति नियमो न युक्तोऽस्मन्मतेऽपि ज्ञानयाथार्थ्यस्यानुमित्याऽपि ग्राह्यत्वात्तथाऽपि सर्वमेतादृशानुव्यवसायं प्रति विषयत्वमेवेति नियमो युक्त एव । अनुव्यवसायत्वं च ज्ञानांशे लौकिकप्रत्यक्षत्वं वा व्यवसायप्रकारकतया तत्प्रकारवद्विशेष्यकतया च व्यवसायविषयकत्वं वेति न कश्चित्क्षुद्रोपद्रवः । ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वमित्यस्याभिप्रेतमन्यदपि पक्षद्वयं स्वामिचरणैस्तर्कतांडवे निरूपितं द्रष्टव्यम् । नन्वेवं ज्ञानकरणस्य सतोऽप्रामाण्ये निरस्ते स्वत एवेति ब्रूम इति पूर्वोक्तसिद्धांतविरोध इत्यत आह ॥ अथवेति । नन्वत्र ज्ञानजनकत्वं येन येन गृह्यते तन्मध्ये येनकेनापि करणनिष्ठयाथार्थ्यज्ञानजनकत्वस्य ग्राह्यत्वं स्वतस्त्वमिति विवक्षितमुत ज्ञानजनकत्वं येन येन गृह्यते तेन सर्वेणापीति । नाद्यः । करणनिष्ठयथार्थज्ञानजनकत्वानुमनस्यापि ज्ञानजनकत्वग्राहकतया ज्ञानजनकत्वग्राहकेण येनकेनापि ग्राह्यत्वस्य करणनिष्ठप्रामाण्येऽ-

प्यभ्युपगत्वेन तादृशस्वतस्त्वस्याव्युत्पादनीयत्वात् । न द्वितीयः । ज्ञानजनकत्वग्राहकेण चक्षुरादिकं ज्ञानजनकमिति शब्देन प्रमाणभूतस्य चक्षुरादेरयथार्थज्ञानजनकत्वसाधनानुमानाभासेन च करणनिष्ठप्रामाण्यस्य ग्रहणेन तादृशस्वतस्त्वस्य करणप्रामाण्ये बाधितत्वादिति चेन्मैवं । तज्ज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च ज्ञानं गृह्णद्यत्करणनिष्ठज्ञानजनकत्वग्राहकं तेन सर्वेणापि करणनिष्ठप्रामाण्यस्य ग्राह्यत्वं स्वतस्त्वमिति विवक्षितत्वात् । न चैवंभूतेन करणनिष्ठज्ञानजनकत्वग्राहकेण सर्वेणापि करणप्रामाण्यस्य ग्राह्यत्वं मतांतरेऽपि सिद्धत्वादिति वाच्यं । न्यायमते मानांतरोपनीतव्यवसायनिष्ठचक्षुर्जन्यत्वादिग्राहकेण व्यवसायप्रकारप्रकारकतया तद्वद्विशेष्यकतया च ज्ञानग्राहकेणाप्यनुव्यवसायेन तद्द्वयस्य स्वातंत्र्येणाभाततया ज्ञानगतयाथार्थ्यानिश्चयेन यथार्थज्ञानसाधनत्वस्याप्यनिश्चिततया करणप्रामाण्यस्यैवंविधेन सर्वेणाग्राह्यत्वादिति ॥ प्रामाण्यमिति । ज्ञानगतयाथार्थ्यं प्रमाप्रमासाधारणधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयातिरिक्तदोषरूपकारणापेक्षज्ञानगतयाथार्थ्ये व्यभिचारनिरासाय । ननु प्रतिभ्रमं विशेष्यप्रकारघटिताप्रामाण्यस्य भिन्नभिन्नत्वादेकभ्रमगताप्रामाण्ये भ्रमांतरगताप्रामाण्यादितरत्वस्य सत्वेन व्यभिचारस्तदवस्थ एव । न च वाच्यमप्रामाण्यत्वावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वमप्रामाण्येतरत्वं विवक्षितमतो नोक्तदोष इति । अप्रामाण्यत्वस्यैकस्यानुगतस्याभावेनैकास्मिन्नप्रामाण्येऽप्रामाण्यांतरगतं यदप्रामाण्यत्वं तदवच्छिन्नप्रतियोगिताकान्योन्याभावस्य सत्वेन व्यभिचारस्य दुष्परिहारत्वादिति चेन्मैवं । अप्रामाण्यप्रतियोगिताका यावंतोऽन्योन्याभावास्तद्वत्त्वस्याप्रामाण्येतरपदेन विवक्षिततयैकस्मिन्नप्रामाण्ये चाप्रामाण्यप्रतियोगिकयावदन्योन्याभावमध्यपतितस्वान्योन्याभावाभावेन व्यभिचारस्य सुपरिहरत्वादिति रूपादौ

सु०टि०
॥७३॥

व्यभिचारनिरासाय ज्ञानधर्मपदं ॥ तादिति । ज्ञानविशेषत्वादित्यर्थः ॥ व्याघातादिति । ज्ञानस्य ज्ञानहेत्वतिरिक्तहेत्वधीनत्वस्य व्याहतत्वादित्यर्थः ॥ जात्यतिरिक्तेति । ज्ञाने जात्यातिरिक्तभावधर्मानभ्युपगमादित्यर्थः । तेन गुणत्वसमवायसत्वेऽपि तस्य संबंधरूपत्वेनाधर्मत्वात् ॥ प्रध्वंसश्चात्रेति । प्रमारूपज्ञान इत्यर्थः । प्रमात्वं प्रध्वंसरूपं चेदप्रमात्वमेव तत्प्रतियोगीति वाच्यं । अन्यस्य तथात्वासंभवात् । न च तत्संभवति ध्वंसप्रतियोगिनोः सामानाधिकरण्यनियमेन प्रमारूपज्ञानेऽप्रमात्वस्य प्रतियोगिनः कदाऽप्यभावेन तद्ध्वंसस्याप्यसंभवादिति भावः ॥ एतेनेति । प्रमात्वं ज्ञानहेत्वतिरिक्तहेत्वधीनं कार्यवृत्तित्वे सति ज्ञानत्व-व्याप्यत्वादप्रमात्ववदिति प्रयोगोऽपि प्रमात्वं जातिरन्यद्वा । जातित्वे बाधः । अकार्यत्वात् । अन्यत्वे भावोऽभावो वा । नाद्यः । ज्ञाने जात्यातिरिक्तभावानभ्युपगमात् । न द्वितीयः । प्रध्वंसातिरिक्तस्य तस्याजन्यत्वात् । प्रध्वंसस्य चात्रासंभवादिति पूर्वोक्तदूषणेनैव निरस्त इत्यर्थः । ननु हेत्वधीनत्वं नाम न तज्जन्यत्वमत्र विवक्षितं किंतु तज्जन्यव्यक्तिवृत्तित्वमेवातो न दोष इत्याशंकते ॥ अस्तुजातिरिति ॥ शब्द इति । शब्दजन्यप्रमायामित्यर्थः ॥ प्रामाण्यमिति । ज्ञानगतयाथार्थ्य ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसर्वानुव्यवसायविषय इत्यर्थः । विशेषणानां प्रयोजनं तूक्तमेव ॥ अप्रामाण्येतरेति । ननु विशेष्यव्यावृत्तिप्रकारकज्ञानत्वे उक्तानुव्यवसायविषयत्वरहितेऽप्रामाण्येतर-ज्ञाननिष्ठधर्मत्वस्य सत्वाद्व्यभिचार इति चेन्मैवम् । अप्रामाण्येतरपदेनोक्तानुव्यवसायविषयत्वायोग्योपाध्यघटितत्वस्य विवक्षितत्वेन व्यवसायानुपनीततयाऽनुव्यवसायविषयत्वायोग्यविशेष्यावृत्तिघटिते विशेष्यावृत्तिप्रकारकज्ञानत्वे व्यभिचारानव-

कं० रा०
प्र० प्र०
अ० १
॥७३॥

काशात् । न चासिद्धिः । विशेष्यत्वप्रकारत्वयोर्ज्ञानवृत्तिवेद्यत्वेन तद्वत्त्वादिरूपबाहिरर्थस्य च व्यवसायोपनीततयाऽनुव्यवसायविषयत्वयोग्यत्वेन तद्घटितज्ञानयाथार्थ्यस्यानुव्यवसायविषयत्वायोग्योपाध्यघटितत्वाद्योग्यायोग्योपाधिघटिते प्रमाप्रमान्यतरत्वादौ व्यभिचारनिरासाय नञ्द्वयाश्रयणं । अत एवाप्रामाण्येतरपदेन तदभाववद्विशेष्यकत्वादिरूपाप्रामाण्येऽपि व्यभिचारो निरस्तः । तस्यानुव्यवसायविषयत्वयोग्यतत्प्रकारकत्वघटितत्वेऽपि तदभाववत्त्वस्य व्यवसायानुपनीततयाऽनुव्यवसायविषयत्वायोग्यत्वेन तदयोग्योपाध्यघटितत्वाभावादिच्छात्वादौ व्यभिचारनिरासाय ज्ञानसमवेतपदं । ज्ञाननिष्ठत्वपदं । सिद्धांते समवायस्याभावात् । न च वाच्यं ज्ञाननिष्ठशक्तौ व्यभिचारः । तस्याः केनाप्यघटितत्वेनोक्तोपाध्यघटितत्वे सति ज्ञानधर्मत्वस्य तत्र सत्वादिति । शक्तिभिन्नत्वे सतीति हेतुविशेषणात् । यद्वा । अप्रामाण्येतरज्ञानसमवेतधर्मत्वादित्यनेनोक्तानुव्यवसायविषत्वयोग्योपाधिमात्रघटितत्वादित्यर्थो विवक्षितः। एवं च न शक्तौ व्यभिचारः । ज्ञाननिष्ठशक्तेः केनाप्यघटितत्वेनानुव्यवसायविषयत्वयोग्योपाधिमात्रघटितत्वरूपहेतोस्तत्राभावात् । अस्मिन्पक्षे ज्ञानत्ववदित्यस्य तत्तज्ज्ञानवदित्यर्थौ बोद्धव्यः ॥ व्यर्थेति । सांशयिकमात्रत्वस्य हेतुत्वसंभवेऽनभ्यासदशायामित्यस्य व्यर्थत्वेन व्यर्थविशेषणत्वमिति भावः ॥ असिद्धीति । सांशयिकत्वादित्येतावन्मात्रोक्तावभ्यासदशायां प्रामाण्यसंशयाभावेनासिद्धिः स्यादतस्तत्परिहारार्थमनभ्यासदशायामिति विशेषणं सार्थकमिति भावः ॥ तथेति । यन्निष्ठयन्निरूपिता व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते तत्तत्र सार्थकमिति व्याप्तिग्रहोपयुक्तविशेषणस्यैव त्वया सार्थकत्वस्याभ्युपगतत्वेनासिद्धिपरिहारार्थं विशेषणस्य सार्थकत्वानभ्युपगमादित्यर्थः

॥ एकामिति । एकां स्वरूपासिद्धिं परिहरतो व्यर्थविशेषणत्वप्रयुक्ता द्वितीया व्याप्यत्वासिद्धिरापन्नेत्यर्थः ॥ अन्यथेति । असिद्धिपरिहारार्थविशेषणस्यापि सार्थकत्वे क्षित्यादिकमकर्तृकं शरीराजन्यत्वाद्गगनवदिति मीमांसकोक्तशरीराजन्यत्वहेतोरपि शरीरविशेषणस्य स्वरूपासिद्धिवारकतया व्याप्तिग्रहानुपयुक्तत्वेन वैयर्थ्यमिति व्यर्थविशेषणत्वं त्वया नोद्भाव्येतेत्यर्थः ॥ अथेति । अनभ्यासदशापन्नं ज्ञानप्रामाण्यं परतो ज्ञेयमित्येवमनभ्यासदशायामित्येतत्प्रतिज्ञाविशेषणमतो नोक्तदोष इति भावः ॥ अनुमितिश्चेति । प्रामाण्यमनुमितिप्रामाण्यं स्वत एव ग्राह्यं नानुमित्यंतरेणेति नानवस्थेत्यर्थः । ननु स्वतः प्रामाण्यग्रह इति पक्षेऽपि व्यवसायनिष्ठप्रामाण्यमनुव्यवसायग्राह्यं । तत्प्रामाण्यं चानुव्यवसायांतरग्राह्यं । एवं तत्प्रामाण्यमपीत्यनवस्थासाम्यमित्याशयेन शंकते ॥ नन्विति ॥ सम एवेति । वृत्तिज्ञानग्राहकसाक्ष्येव वृत्तिज्ञानगतप्रामाण्यं गृह्णातीति वृत्तिज्ञानानां प्रामाण्यं स्वत इत्युच्यते । साक्षिप्रामाण्यं तु स्वप्रकाशः साक्ष्येव गृह्णातीति तत्प्रामाण्यं स्वत इत्युच्यतेऽतो नानवस्थेति भावः ॥ आहार्येति । केनचिदाहितसंशयविषयत्वमपि नेत्यर्थः । ननु स्वप्रामाण्यग्रहणरूपे साक्षिणि प्रामाण्यसंशये सति तदपनोदनाय प्रामाण्यग्रहणेऽपि प्रामाण्यग्रहणमेष्टव्यम् । तच्च यद्यनुमानेन तदा तत्प्रामाण्यस्यानुमानांतरवेद्यत्वादनवस्था । यदि च प्रामाण्यग्रहणरूपे साक्षिणि प्रामाण्यग्रहणं साक्षिणैवेत्यभ्युपेयते तदा तत्प्रामाण्यग्रहणांशेऽपि प्रामाण्यं साक्षिणैव विषयीकर्तव्यमित्यनंतप्रामाण्यविषयीकरणपरंपरारूपानवस्था वज्रलेपायिता स्यादित्यत आह ॥ तस्येति । साक्षिणो यथार्थत्वनियमात्प्रामाण्यग्रहणरूपे साक्षिणि प्रामाण्यसंशयस्यैवानुदयेन तदपनोदनार्थं प्रामाण्यग्रहणस्यानंगीकारान्नोक्तोभय-

विधानवस्थेति भावः ॥ दोषेति । दोषरूपापवादादित्यर्थः ॥ तर्हीति । दोषाणां यदि प्रकृतकार्यजननशक्तिप्रतिबंधेन विपरीतकार्यजनकत्वं तर्ह्यन्वयव्यतिरेकाभ्यां दोषाभावः प्रामाण्यस्य कारणमित्यागतं । तथा च प्रामाण्यस्य ज्ञानसामान्यकारणातिरिक्तकारणरूपदोषाभावप्रयोज्यत्वात्स्वतस्त्वं न संभवतीति भावः ॥ तथा सतीति । अपवादरूपदोषाभावस्यौत्सर्गिकप्रामाण्यं प्रति कारणत्वे इदमौत्सर्गिकमिदमेतस्यापवादकमिति व्यवस्था कुत्रापि न स्यात् । यस्य हि स्वसामग्रीवशेन प्रसक्तिस्तदौत्सर्गिकं सत्यामप्यौत्सर्गिकसामग्र्यां यद्वशात्तद्विपरीतकार्यं भवति तत्तस्यापवादकं । अपवादाभावस्यौत्सर्गिकं प्रति कारणत्वपक्षे चापवादस्थले तदभावघटितौत्सर्गिकसामग्र्यास्तत्प्रसक्तेश्चाभावादुत्सर्गापवादव्यवस्था क्वापि न स्यादेवेत्यर्थः । न च वाच्यमपवादकाभावस्यौत्सर्गिककार्ये प्रत्यन्वयव्यतिरेकाभ्यां कारणत्वसिद्धिरिति । अपवादकाभावे लोके कारणत्वव्यवहाराभावेनौत्सर्गिककार्यापवादकविरोधत्वरूपाया अन्यस्या अन्यथासिद्धेः कल्प्यत्वात् ॥ उत्सर्गापवादयोरिति । यस्य हि स्वभावबलादेव प्रसक्तिस्तदौत्सर्गिकं । सत्यामप्यौत्सर्गिकसामग्र्यां यद्वशात्तदभावो विपरीतकार्यं च भवति तत्तस्यापवादकं । दोषाभावस्यापि सामग्रीकोटिप्रवेशे सति दोषस्थले कार्याभावस्य विपरीतकार्यस्य च तत्सामग्र्यभावविपरीतसामग्रीसद्भावाभ्यामेवोपपत्त्या सत्यां तत्सामग्र्यामित्यादेरभावादुत्सर्गापवादौ क्वापि न स्यातामित्यर्थः ॥ तथा सत्युत्सर्गापवादयोरिति । सोपाधिकव्यभिचारः प्रमाणसिद्धनियम उत्सर्गः । तन्नियमे तादृशव्यभिचार एव चापवादः । यथा हिंसात्वावच्छेदेनाकर्तव्यतानियमो न हिंस्यात्सर्वभूता-

नीति प्रमाणसिद्धः । यागीयहिंसायां विहितत्वेन निमित्तेन व्यभिचारी च । एवं च प्रकृते यद्यपवादकतया प्रसिद्धदोषाभावमपि ज्ञानजनकसामग्र्यां निवेश्य तस्याः प्रामाण्यजनकत्वं नियतमित्युच्चेत तर्हि सर्वत्राविहितहिंसात्वाद्यवच्छेदेनाकर्तव्यतादीनां नियम एव स्यान्नोक्तरूपोत्सर्गः । केचित्तु । यदि दोषाभावोऽपि प्रामाण्यजनकतयेष्यते तर्हि सर्वत्र प्रतिबंधकाभावः कारणमित्यभिमतं स्यात् । दोषस्य प्रामाण्यप्रतिबंधकत्वात् । न च तत्संभवति । तथा सत्युत्सर्गापवादयोः क्वाप्यभावप्रसंगात् । तथाहि । उत्सर्गो हि बाधकैकापोह्यत्वनियमः । स च प्रतिबंधकाभावस्य कारणत्वाभ्युपगमेन युज्यते । प्रतिबंधकत्वाभिमतकालीनकार्याजननस्य कारणाभावप्रयुक्तत्वेन बाधकप्रयुक्तत्वाभावात् । अपवादो हि सति पुष्कलकारणे कार्यानुत्पादप्रयोजकः । सोऽपि प्रतिबंधकाभावस्य कारणत्वेन युज्यते । प्रतिबंधककालीनकार्याजननस्य कारणाभावप्रयुक्तत्वादित्यर्थमाहुः ॥ अपौरुषेयतेति । शश्वदेकप्रकारानुपूर्विकतेत्यर्थः ॥ नित्यताया इति । वर्णनित्यतायाः बौद्धागमेष्वपि सत्वादित्यर्थः । हिशब्दं वाचा विरूपनित्ययेत्यादिश्रुतिप्रसिद्धिद्योतकत्वेन व्याख्यायेदानीं हेतुपरत्वेन व्याख्याति ॥ यस्मादिति । तस्य क्रमविशेषस्य ॥ वस्तुत्वादिति । सत्त्वादित्यर्थः । तेन प्रामाणिकत्वमेव वस्तुत्वमतः साध्यवैशिष्ट्यमिति दूषणमलग्नकं बोद्धव्यम् ॥ तेषामिति । कथंचिदित्यनेन तेषामपि योगसिद्धेः प्रयोगानुष्ठानस्यादृष्टसाधनत्वानिश्चयेन तदनुष्ठानस्यैवानुपपत्तौ तत्साध्यादृष्टविशेषस्य सुतरामनुपपत्तेस्तज्जन्यमतींद्रियार्थगोचरप्रत्यक्षं न संभवतीति सूचयति ॥ सामान्यतो दृष्टेनेति । यज्ञादेः फलवत्त्वसाधकेन प्रेक्षावत्प्रवृत्तिविषयत्वरूपानुमानेनेत्यर्थः । कथंचिदित्यनेनालौकिकार्थस्य केवलानुमानेन सिद्धिर्न

संभवतीति सूचयति ॥ **ऐश्वर्यमिति।** धर्मादिदर्शनसामर्थ्यमित्यर्थः। ननु प्रत्यक्षसामग्रीसद्भावस्यापि पक्षनिष्ठतया साधनान्नोपाधित्वमित्यत आह ॥ **तस्यापीति।** प्रत्यक्षसामग्रीसत्त्वस्यापि पक्षे साधने प्रत्यक्षसामग्रीसद्भावस्योद्भूतरूपवत्त्वतद्वत्समवेतत्वादिरूपतया तस्यैव चास्मदादिप्रत्यक्षत्वप्रयोजकत्वात्। पक्षस्यास्यास्मदादिप्रत्यक्षत्वमपि स्यादित्यर्थः। ननूद्भूतत्वादिलक्षणप्रत्यक्षसामग्रीसद्भावेऽपि मया धर्मादेः प्रत्यक्षत्वस्यांगीकृतत्वेनोपाधिव्यतिरेकस्य साध्यव्यतिरेकेण सह व्याप्तेरभावान्न तस्योपाधित्वमित्यत आह ॥ **साध्येति।** साध्यव्यापकत्वसाधनाव्यापकत्वाभ्यामेवोपाधित्वे संभवति व्यतिरेकव्याप्त्यभावो न दोषायेत्यर्थः। यद्वा। अतींद्रियमात्रस्य पक्षत्वेन यत्र प्रत्यक्षसामग्रीसद्भावाभावस्तत्र प्रत्यक्षत्वाभाव इति व्यतिरेकव्याप्तिग्रहाभावान्न प्रत्यक्षसामग्रीसद्भावस्योपाधित्वमित्यत आह साध्यतीत्यवतारणीयं ग्रंथव्याख्यानं पूर्ववत्। ननु व्यतिरेकव्याप्त्यभावे प्रतिपक्षोत्थापकत्वायोगादुपाधेः कथं दोषत्वं। न च वाच्यं प्रतिपक्षोत्थापकत्वाभावेऽप्यव्याप्त्युन्नायकत्वेन तस्य दोषत्वमिति। अनुमानप्रवृत्तेः प्रागेवोपाधेरव्याप्त्युन्नायकत्वेन तत्प्रवृत्त्यनंतरं प्रतिपक्षोत्थापकत्वस्यैव वक्तव्यत्वादिति चेन्मैवम्। अनुमानप्रवृत्त्यनंतरमुपाधेः प्रतिपक्षोत्थापकत्वेनैव दूषकत्वमिति नियमस्य स्वमतत्वेऽपि परमते तन्नियमाभावेन पररीत्या च परस्य दूषणीयतया तं प्रत्यव्याप्त्युन्नायकत्वस्य वक्तुं शक्यत्वात्। तदुन्नायकत्वे च साध्यव्यापकत्वसाधनाव्यापकत्वयोरेव तंत्रत्वादिति ॥ **सामान्येति।** धर्मादिकं कस्यचित्प्रत्यक्षं वस्तुत्वाद्घटवदिति सामान्यानुमानमूलकपरिशेषानुमानस्य यद्दूषणं न बुद्धो धर्मदर्शी स्यात्पुंस्त्वादिति प्रतिपक्षरूपं तस्य बुद्धनिष्ठसार्वज्ञ्यबोधकागमबाध इत्यर्थः ॥ ईश्वरवादिनं

प्रति त्विति। न बुद्धो धर्मदर्शी स्यात्पुंस्त्वादित्येवं बुद्धादीन्पक्षीकृत्यासर्वज्ञत्वसाधनमिवेश्वरवादिनं प्रति नेश्वरः सर्वज्ञः पुंस्त्वादित्यसर्वज्ञत्वसाधनं न कथंचित्संभवतीत्यर्थः। कुत इत्यत आह ॥ ईश्वरो हीति। हि यस्मात्तनुभवनादीनां कार्यत्वेन हेतुना कर्तृत्वेन सिध्यन्नीश्वरः सर्वज्ञतयैव सिद्धोऽतो धर्मिग्राहकमानविरोधात्तस्यासर्वज्ञत्वानुमानं न संभवति। तदसिद्धौ त्वाश्रयासिद्धिस्तन्न संभवतीति भावः। परिहरति ॥ यथा चेति। ईश्वरपक्षीकारेणासार्वज्ञतासाधनेऽप्याश्रयासिद्धिधर्मिग्राहकमानविरोधौ यथा न भवतस्तथाऽऽचार्य एव शास्त्रयोनिसूत्रव्याख्यानावसरे वनकृत्त्वादिरूपेण पक्षभूतस्य चेशितुः। किंचिज्ज्ञत्वं हि पुंस्त्वेन शक्यं साधयितुं सुखमित्यत्र वक्ष्यतीत्यर्थः ॥ आयतामिति। तथा चैकस्माद्वेदाज्जायमानायाः सर्वपुरुषीयधर्मादिप्रतीतेरेकप्रकारत्वावश्यंभावाद्धर्मादिविषये वादिनां विप्रतिपत्तयो न स्युरिति भावः ॥ वादिनामिति। यद्यपि प्रतीयंत इति कर्मविहितलकारादेशतिङा कर्तुरनभिहितत्वादनभिहिते च कर्तरि कर्तृकरणयोस्तृतीयेति तृतीयाया अनुशिष्टत्वाद्वादिभिः प्रतीयंत इति निर्देष्टव्यम्। तथाऽपि वादिनां संबंधिन्यो विप्रतिपत्तयस्तच्छिष्यैः प्रतीयंत इति कर्त्रध्याहारेण वा पच्यते ओदनः स्वयमेवेत्यादिवद्वादिनां विप्रतिपत्तयः स्वयमेव प्रतीयंत इति कर्मकर्तृत्वाश्रयणेन वा वादिनामिति षष्ठीनिर्देशोपपत्तिरिति द्रष्टव्यम्। प्रतीयंते प्रतन्यन्ते तनोतेर्यकीति वैकल्पिकमात्वं ॥ वेदव्यतिरिक्तेति। वेदव्यतिरिक्तत्वे सति यदीदानींतनत्वं तद्रहितं यत्पौरुषेयं तद्वानित्यर्थः। अत्र दृष्टांतीकृतेऽन्यस्मिन्काले जातस्य पौरुषेयस्येदानींतनत्वरूपविशेष्याभावेन वेदव्यतिरिक्तत्वविशिष्टेदानीन्तनत्वरहितत्वात्तादृशपौरुषेयत्वमादाय तत्र साध्यपर्यवसानं। पक्षीकृते तु वर्तमानकाले विद्यमानस्य पौरुषेयस्येदानींतनत्वरूपविशेष्याभावायोगेन वेदव्यतिरिक्तत्वरूपविशेषणराहित्येनैव तद्विशिष्टेदानींतनत्वरहितत्वपर्यवसानाद्वेदव्यतिरिक्तत्वरहितपौरुषेयसिद्धौ वेदपौरुषेयत्वसिद्धिरिति भावः। एवमुत्तरानुमानसाध्ययोरपि वेदव्यतिरिक्तत्वस्याकाशनिष्ठत्वश्रोत्रग्राह्यत्वरूपप्रतियोगिविशेषणतया तद्विशिष्टप्रतियोगिराहित्यं पक्षदृष्टांतसंबंधिपौरुषेययोर्विशेषणविशेष्यभावावादाय पर्यवस्यतीति द्रष्टव्यम् ॥ उक्तत्वाच्चेति। तथा च वेदस्य पौरुषेयत्वे कर्तुराप्त्यनिश्चयेन ततो धर्मादिनिश्चयो न स्यादिति प्रतिकूलतर्कपराहतानि च पौरुषेयत्वानुमानानीति भावः। नन्वीश्वरस्य पुरुषत्वेनाप्रमाविप्रलिप्सासाधनमनुपपन्नं। ईश्वरासिद्धावाश्रयासिद्धेः। तत्सिद्धौ च तस्य प्रमाविप्रलिप्साराहित्येनैव सिद्धतया धर्मिग्राहकमानविरोधादित्यत आह ॥ आश्रयेति। आश्रयासिद्धेर्धर्मिग्राहकविरोधस्य च शास्त्रयोनिसूत्रे परिहरिष्यमाणत्वादित्यर्थः। ईश्वरो न विप्रलिप्सावानित्यत्र सर्वात्मना विप्रलिप्साराहित्यं साध्यम्। उत कदाचिद्विप्रलिप्साराहित्यमिति विकल्प्याद्ये दोषमाह ॥ ईश्वरत्वहेतुमिति। ईश्वरत्वहेतुश्च सर्वात्मना विप्रलिप्साराहित्यरहितत्वेन विपक्षादस्मादित इवोक्तसाध्यवत्तया सपक्षाद्घटादेरपि व्यावृत्तत्वादसाधारण इत्यर्थः। द्वितीये दोषमाह ॥ पूर्ववदिति। कदाचिद्विप्रलिप्साराहित्यमात्रेणाप्तत्वासिद्धेस्तन्मात्रसाधने ईश्वरत्वहेतुः सिद्धसाधन इत्यर्थः। व्यवस्थितदूषणसमुच्चयार्थश्चकारः। नन्वीश्वरो न विप्रलिप्सावानित्यनेनेश्वरो यथार्थचिख्यापयिषा नियतिमानिति साध्यं। अतो नासाधारण्यं। नापि सिद्धसाधनत्वमित्यत आह ॥ यथार्थेति ॥ सूत्रकार इति। अंतवत्त्वमसर्वज्ञता वेत्यत्राशरीरत्वेनेश्वरस्य ज्ञानेच्छाद्ययोग इति सूत्रकारेणैव वक्ष्यमाणत्वाद्यथार्थख्यापनेच्छानियतिसाधनं सत्प्रतिपक्षं चेति भावः। यद्वा।

संबंधानुपपत्तेश्चेत्यत्राशरीरत्वेन शिवस्येच्छाप्रयत्नरूपकर्तृत्वानुपपत्तिं वदन्सूत्रकार एव यथार्थख्यापनेच्छानियतिसाधनस्य सत्प्रतिपक्षतां वक्ष्यतीति भावः ॥ अनीश्वरेति । तथा चाभाससाम्यमिति भावः । यद्वा । तेनैव हेतुनेश्वरप्रणीतत्वाभावस्यापि साधयितुं शक्यत्वात्सत्प्रतिपक्षत्वमिति भावः ॥ तानीति । सर्वकार्याणामीश्वरकर्तृकतयेश्वरप्रणीतत्वमात्रस्य कार्यमात्रे सत्वाज्जिनादिवाक्यान्यपि पक्षतुल्यानीति भावः ॥ व्यर्थेति । प्रत्यक्षार्थविषयेऽस्मदादिवाक्येऽप्युक्तरीत्या व्यभिचाराभावेन वाक्यत्वमात्रस्य हेतुत्वसंभवेऽतींद्रियविषयत्वरूपविशेषणस्य व्यर्थत्वादित्यर्थः ॥ इश्वरेति । विसंवाद्यस्मदादिवाक्यवदाप्तिमूलत्वाभावेऽपीश्वरनिमित्तकतायाः संभवाद्वेदस्येश्वरनिमित्तकत्वमात्रसाधने प्रामाण्यासिद्धिरित्यर्थः । ननु तंत्वादेर्वेदव्यतिरिक्ताकाशसमवेतत्वरहितत्वेऽप्याकाशस्य तंत्वादिमस्वाभावान्न तेनार्थांतरतेत्यत आह ॥ संयोगेति ॥ समवाय एवेति । तथा च तंत्वादेर्वेदव्यतिरिक्ताकाशसमवेतत्वरहितत्वेऽप्याकाशस्य तंत्वादिना समवायाभावेन विवक्षितस्य समवायेन तद्वत्त्वस्याभावान्न तेनार्थांतरतेति भावः ॥ धर्म इतीति । तथा च न तत्समवाय आकाश इति बाधितविषयतेत्यर्थः ॥ श्रुतिरिति । तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायंतेति श्रुतिस्तु वाचा विरूपनित्ययेत्यादिश्रुत्या प्रतिरुद्धा वेदपौरुषेयत्वनिश्चयाय न प्रभवतीत्यर्थः । न केवलं नित्यत्वं प्रतिपादयंत्या श्रुत्या वेदपौरुषेयत्वश्रुतेः सत्प्रतिपक्षता किंनाम ऋग्वेद एवाग्नेरजायतेत्यादिकया वेदस्यानीश्वररचितत्वं प्रतिपादयंत्याऽपीत्याह ॥ किंचेति ॥ यस्त्विति । यस्तु चार्वाको धर्मादिकमेव नांगीकरोति तं प्रति निराश्रयतया धर्मादिकं प्रमाणोपेतं वस्तुत्वादिति सामान्यसिद्धेरेवायोगेन तन्मूलकपरिशेषस्य

सुतरामयोगात्सामान्यसिद्धिपरिशेषाभ्यामपौरुषेयवाक्यसमर्थनं न संभवतीत्यर्थः ॥ अयोग्यतयेति । अयोग्यतया चक्षुषा
रसस्याग्रहणवद्विद्यमानस्यापि धर्मादेरयोग्यतया प्रत्यक्षेणाग्रहणोपपत्तेः । यदि धर्मादिकं स्यात्तर्ह्युपलभ्येतेति तर्किततत्सत्त्वप्रसं-
जितप्रतियोगिकत्वरूपयोग्यताविशिष्टानुपलब्धेरभावान्न प्रत्यक्षं धर्माद्यभावनिश्चयायालमित्यर्थः । शंकते ॥ किमिति ।
यत्प्रत्यक्षेण सर्वथा नोपलभ्यते तन्नास्त्येवेति निश्चीयत इत्यनुपलब्धिमात्रस्याभावनिश्चायकत्वे संभवति तर्कितप्रतियोगिसत्त्वप्र-
संजितप्रतियोगिकत्वरूपयोग्यताविशेषणं व्यर्थमिति भावः । यद्वा । अयोग्यतयेत्यादिपरिहारवाक्यस्यायमर्थः । अयोग्यत्वेन
विद्यमानस्यापि रसस्य चक्षुषाऽनुपलंभवत्सतोऽपि धर्मादेरयोग्यत्वेन प्रत्यक्षेणानुपलंभोपपत्तेः । योग्यस्यानुपलब्धिर्नेति न
प्रत्यक्षेण धर्माद्यनिश्चयः संभवतीत्येतदनुसारेण किमित्यादिशंकाग्रंथस्यापि यत्प्रत्यक्षेण सर्वथाऽनुपलभ्यते तन्नास्त्येवेति
निश्चीयत इत्यनुपलब्धिमात्रस्याभावनिश्चयहेतुत्वसंभवे योग्यस्यानुपलब्धिरभावनिश्चायकेति । किं योग्यताविशेषणेनेत्यर्थो द्रष्टव्यः
॥ संस्कृत इति । सलक्षणमुच्चारित इत्यर्थः । ससंप्रदायं व्याख्यातो वा ॥ प्रत्यक्षेति । प्रत्यक्षेणानुपलब्धिः संशयमेव
संपादयत्येव । न तु निश्चयमित्यर्थः । योग्यानुपलब्ध्यभावेन प्रत्यक्षेण धर्माद्यनिश्चयो न संभवतीत्येतत्समाधानमनुपलब्धिर-
भावज्ञानकारणमिति परमतानुसारेणैव न स्वमतानुसारेण । षड्भूतावनुपलब्धिस्त्ववर्जनीयसन्निधिरेवेत्युक्तत्वेन स्वमतेऽ-
नुपलब्धेरभावकारणत्वाभावात् । अयोग्याच्च । तथा हि । अनुपलब्धेरुपलब्धिसामान्याभावरूपत्वे शंखे शंखत्वेन
लिंगेन श्वेतत्वेऽनुमिते श्वैत्याभावभ्रमानुदयप्रसंगः । न चोक्तरूपानुपलब्धिरभावप्रमाहेतुरिति वाच्यं । गुंजापुंजे

चक्षुषाऽऽरोपितेन वन्हित्वेनोष्णस्पर्शानुमितौ सत्यां त्वचोष्णस्पर्शाभावप्रमाऽनुदयप्रसंगात् । न च प्रमारूपोपलब्धि-
सामान्याभावोऽभावप्रमाहेतुरिति वाच्यं । शुक्तौ रूप्यभ्रमे सत्यपि रूप्यप्रमाभावस्य सत्त्वेन रूप्याभावप्रमाप्रसंगात् ।
न च वाच्यं प्रत्यक्षरूपोपलब्ध्यभावोऽनुपलब्धिशब्देन विवक्षितस्ततो नोक्तदोष इति । मंडूकवसांजनदोषेण वंशमुरगत्वेन
चक्षुषा पश्यतस्त्वचोरगत्वाभावाप्रमितिप्रसंगात् । न चाभावग्राहकेंद्रियकरणकज्ञानाभावोऽनुपलब्धिरिति वाच्यं । विन-
श्यदवस्थापन्नघटविषयकस्य कपाले घटोऽस्तीति चाक्षुषसाक्षात्कारस्योत्पत्त्यनंतरं घटध्वंसे सति तत्ध्वंसविषयकचाक्षुषसाक्षात्का-
रानुदयप्रसंगात् । ध्वंससाक्षात्कारोत्पत्त्यपेक्षया पूर्वक्षणरूपध्वंसोत्पत्तिक्षणेऽभावग्राहकेंद्रियकरणघटज्ञानस्य स्थित्या तदभावरू-
पानुपलब्ध्यभावात् । एतेनैव तदिंद्रियजन्यानाहार्यप्रत्यक्षे प्रतियोग्यधिकरणसंसर्गविषयकत्वाभावोऽनुपलब्धिरित्येतदपि निरस्तं।
स्वमतानुसारेण तु चक्षुर्योग्यस्य रूपादेश्चक्षुषाऽभावनिश्चयात्तदयोग्यस्य रसादेस्तेनाभावनिश्चयादन्वयव्यतिरेकाभ्यां ससंसर्गाभाव-
प्रत्यक्षतायां प्रतियोगियोग्यत्वस्यापि तंत्रतया तदभावान्न प्रत्यक्षेण धर्माद्यभावनिश्चयः संभवतीति समाधानं द्रष्टव्यम्
॥ संबंधज्ञानस्येति । यद्यपि संबंधिपदजन्यस्य संबंधज्ञानस्य संबंधिज्ञानपूर्वकत्वाभावात्संबंधज्ञानमात्रस्य न संबंधिज्ञानपूर्वक-
त्वनियमः । तथाऽपीदं पदमेतस्य वाचकमिदमेतस्य कारणमित्यादिरूपस्य संबंधिविशेषोपरक्तत्वेन संबंधज्ञानस्य संबंधिज्ञान-
पूर्वकत्वनियमोऽस्तीत्यत्र तात्पर्यमवगंतव्यम् ॥ दध्नेति । दध्ना जुहोतीत्यादिषु गुणविधायकेषु जुहोतीत्याद्याख्यातपदस्य
गुणविधानार्थमाश्रयसमर्पकतया परार्थत्वेन प्राधान्यानुपपत्तेरित्यर्थः । न च वाच्यमाख्यातपदत्वप्रयुक्तं प्राधान्यवादिनं प्रति

दध्ना जुहोतीत्यादिष्वाख्यातपदस्य प्राधान्यानुपपत्तिरसिद्धेति । उक्तरीत्या परार्थस्यापि जुहोतीत्याद्याख्यातपदस्य प्राधान्यांगी-
कारे दोषः पदार्थत्वादिति जैमिनीयन्यायविरोधापत्त्या तदनुपपत्तेः सिद्धत्वात् ॥ अध्याहार इति । आख्यातपदस्येति शेषः
॥ स चेति । व्यवहारश्चान्वित एवेत्यन्वितार्थविषयकव्यवहारेण तत्रैव पदानां संबंधिग्रहणादन्वितानामेव पदार्थानां पदेभ्यः
स्मरणं स्यादित्यर्थः ॥ पूर्वानुभूतेति । गामानयेति प्रयोजकवृद्धवाक्यप्रयोगसमनंतरभाव्यानयनान्वितगोपदार्थविषयकप्रयो-
ज्यवृद्धव्यवहारेण यदा व्युत्पद्यते तदा गोपदार्थस्यानयनान्वितत्वेन तेनानुभूतत्वात्तथैव स्मरणमावश्यकमिति भावः
॥ पट्वभ्यासादरप्रत्ययैरिति । क्वचित्सकृदनुभूतेऽर्थे स्मरणानुत्पत्तेः संस्काराभावस्य सिद्धत्वाद्बहुवारानुभवरूपपट्वभ्यासस्य
संस्काराधायकत्वं सकृदनुभूतेऽप्यर्थे सतोरादरविश्वासयोः स्मरणदर्शनात्तयोरपि संस्काराधायकत्वमिति भावः । अथवा ।
अनुभवावृत्तिरूपाभ्यासाभावे संस्कारानुदयेन स्मरणाभावदर्शनादनादरणीयेऽर्थे तदनुदयप्रयुक्तस्मृत्यभावदर्शनाच्च पट्वभ्यासा-
दरप्रयुक्तानुभवानां तदाधायकत्वमिति भावः ॥ अभ्यासातिशय इति । गामानय गां बधानेत्यादौ यत्र यत्र गोपदमनुभूतं
तत्र तत्र गोरूपार्थस्याप्यनुभूततया पदस्य स्वार्थे बहुवारानुभवलक्षणोऽभ्यासातिशयोऽस्तीति भावः ॥ पदांतरसमभिव्या-
हारो हीति । यद्यपि पद्धतौ प्रत्येकं सामान्यतो योग्येतरान्वितस्वार्थाभिधानशक्तीनि पदानि पदांतरसन्निधानाहितशक्त्यंत-
राणि विशेषतोऽप्यन्वितान्स्वार्थानभिदधतीति पदांतरसमभिव्याहारस्य शक्त्याधानहेतुत्वोक्तेः पदांतरसमभिव्याहारो हि
सामान्यस्य विशेषपर्यवसान एव हेतुर्न पुनरविद्यमानशक्त्याधान इत्येतद्विरुद्धमिवाभाति । तथाऽपि पदांतरसन्निधानाहित-

शक्त्यंतराणीत्यस्य पद्धातिवाक्यस्य पदांतरसन्निधानमेवाहितशक्त्यंतरं लब्धसहकार्यंतरं येषामित्यर्थः। न तु पदांतरसन्निधाने-नाहितं शक्त्यंतरमाधेया शक्तिर्येषामित्यर्थः। अतो न विरोध इति द्रष्टव्यम्। अथवा। न पुनरविद्यमानशक्त्याधान इत्ये-तद्वाक्यं पदांतरसमभिव्याहारात्पूर्वमन्वयसामान्येऽपि शक्तिर्नेत्येतन्निषेधपरं। अतो न विरोधः। अस्मिन्पक्षे एकैकशः पदैः सामान्यतोऽन्विततया ज्ञातो भवेदर्थः पुनः पदांतरसन्निधानाहितबलाद्विशेषतोऽन्विततत्वेन ज्ञातो भवेत्। पदानि सामान्यतोऽन्विताभिधायीनि विशेषतोऽन्वितार्थप्रतीतिस्तु परस्परसन्निधानाहितशक्तिभिः पदैर्भवतीत्याहिकुंडला-धिकरणस्थवाक्यद्वयस्याप्यर्थांतरं न कल्प्यमिति बोध्यम्। ननु वाक्यस्थानां सर्वेषां पदानामन्विताभिधायित्वे गामित्यादिपूर्वपदेनोक्तस्यैवान्वयस्यान्वयेत्याद्युत्तरपदेनाप्युक्तेः समभिव्याहृतपदानां पुनरुक्तिदोष आपततीत्याशयेन शंकते ॥ ननु तथाऽपीति। समभिव्याहृतपदानां भिन्नभिन्नाभिधायकत्वान्न पुनरुक्तिरिति परिहरति ॥ नेति। ननु गोपदे-नानयनान्वितगोप्रतीतावानयनान्वितत्वमानयनस्य गवान्वितत्वं विना नोपपद्यत इत्यर्थात्तदपि प्रतीतमित्यार्थिकी पुनरुक्तिरि-त्यत आह ॥ आर्थिकीति। चोदनार्थो वाक्यार्थः ॥ विशेषेति। सामान्यान्वितेतरान्वितस्वार्थाभिधायिना गोपदेनेतरा-न्वितगोप्रतीतौ गोरितरान्वितत्वमितरस्य गवान्वितत्वं विना नोपपद्यत इत्यार्थादितरसामान्यस्य गवान्वितत्वप्रतीतावप्या-नयनादिरूपसंबंधिविशेषस्य तदप्रतीतेस्तत्प्रतिपत्त्यंगतयाऽऽनयेत्यादिपदांतरस्योपयोगात्। पुनरुक्तेश्च वैय्यर्थ्यापादकत्वेनैव दोषत्वात्। प्रकृते च तदभावान्न पुनरुक्तिर्दूषणमित्यर्थः ॥ प्रत्यस्तमितेति। प्रत्यस्तमितोऽपगतो वर्णपदविभागो यस्य

तत्प्रत्यस्तमितवर्णपदविभागमखंडितमिति फलितोऽर्थः ॥ वाक्यमेवेति । उपलक्षणं चैतत् । स्फोटाख्यमखंडं पदमेव पदार्थप्रतिपादकमित्याहुरित्यपि द्रष्टव्यम् । एवमुत्तत्रापि वाक्यपदमुपलक्षकमिति ज्ञातव्यम् ॥ यस्त्वत्रेति । वर्णाः किं प्रत्येकं स्फोटस्य व्यंजकाः किंवा समुदिताः । नाद्यः । प्रत्येकविशेषणवैयर्थ्यप्रसंगात् । न समुदितास्तेषां समुदायासंभवादित्यत्र दोषे समूहालंबनस्मृत्युपारूढत्वेन बौद्धसमुदायवतां वर्णानां तदभिव्यंजकत्वमिति यः प्रतीकारः सोऽर्थप्रत्यायकत्व एव कल्प्यतामिति गौरवमेवेत्यर्थः ॥ एकरस इति । निरवयव इत्यर्थः ॥ ऐक्येति । एकं पदमित्याद्यैक्यप्रतीतिबलादित्यर्थः ॥ भेदेति । अनेकेषु वृक्षादिष्वेकं वनमित्याद्यैक्यप्रत्ययस्यैकदेशस्थत्वाद्युपाधिनिबंधनत्ववद्वर्णभेदप्रत्ययबलादनेकेषु वर्णेष्वेकं पदमित्यैक्यप्रत्ययस्योपाधिनिबंधनत्वोपपत्तेरित्यर्थः । तमेवोपाधिमाह ॥ उपाधिश्चेति । नन्वेकया समूहालंबनस्मृत्या विषयीक्रियमाणेषु वर्णेषु तज्ज्ञानानंतरभाविज्ञानविषयत्वरूपक्रमाभावेन क्रमविशिष्टत्वेन वर्णानां तयाऽनवगाहनात्कथं तेषामर्थप्रत्यायकत्वम् । क्रमस्य चानंगत्वेनवंवनं राजाजारेत्यादावर्थविशेषप्रत्ययानुपपत्तिरित्यत आह ॥ अनुभवेति । पूर्वं वर्णानां क्रमेणानुभवात्तत्क्रमोपहितानामेव तेषां स्मृत्यावगाहनेन क्रमस्यांगत्वांगीकाराद्राजाजारेत्यादौ क्रमव्युत्क्रमयोरविशेषोपपत्तिर्नेत्यर्थः । किमयं स्फोटः स्वयं प्रतीतो वाक्यार्थपदार्थप्रत्यायक उताप्रतीत इति प्राग्विकल्पितमप्रतीतस्य स्फोटस्य प्रत्यायकत्वमिति द्वितीयपक्षं दूषयति ॥ अप्रतीतस्य त्विति । अप्रतीतस्य स्फोटस्यार्थप्रत्यायकत्वे तस्य सदा सत्वात्सर्वदाऽर्थप्रतीतिप्रसंग इत्यर्थः । मीमांसकैकदेशिनां मतमनूद्य दूषयति ॥ अन्ये त्वाहुरिति । जरन्नैय्यायिकमतमनूद्य निराकरोति ॥ अपरे

त्वित्यादिना ॥ पूर्वेति । पूर्ववर्णानां संबंधस्य च स्मरणेनेत्यर्थः ॥ अनुभवस्येति । अंत्यवर्णानुभवस्य तदनंतरभाविपूर्ववर्णस्मरणोत्तरकालीनसंबद्धस्मृतिव्यवहितत्वेन वाक्यार्थपूर्वप्रतीतिकालेऽनवस्थानान्नानुभूयमानस्यांत्यवर्णस्य तत्प्रतिपादकत्वं संभवतीति भावः । ननु पूर्ववर्णविषयकसंस्कार एवोपयोगी न तु तत्स्मृतिः । तथा चांत्यवर्णानुभवानंतरभाविसंबंधस्मरणक्षणे वाक्यार्थप्रतीतिपूर्वक्षणरूपेऽन्त्यवर्णानुभवस्यावस्थानादनुभूयमानस्यांत्यवर्णस्य वाक्यार्थप्रतिपादकत्वं संभवतीत्याशयेन शंकते ॥ पूर्ववर्णेति ॥ उतेति । उताकांक्षादिमत्पदसमुदायप्रयोगादित्यर्थः ॥ बकबंधरीतिरिति । बको नाम पक्षी मया कथं ग्राह्य इति पृष्टेऽन्यो वदति । क्वचिदुपविष्टस्य बकस्य शिरसि नवनीते स्थापिते सत्यातपेन द्रवीभूतेन तेन तच्चक्षुषो निमीलने सति बको बंधनीय इति बकबंधरीतिः । विमतो वक्ता एतत्पदार्थसंसर्गप्रतिपादनाभिप्रायवान् एतत्समुदायप्रयोक्तृत्वादित्यनुमानमत्र विवक्षितमिति ध्येयम् ॥ व्यभिचारादिति । उक्तसाध्यरहिते गौरश्वः पुरुषो हस्तीत्यादिनिराकांक्षवाक्यप्रयोक्तरि पदसमुदायमात्रप्रयोगरूपहेतोः सत्वेन व्यभिचारादित्यर्थः ॥ पश्यतः श्वेतमारूपमिति । आ ईषच्छ्वेतं रूपं पश्यत इत्यर्थ इत्येके । अपश्यत इति व्यवहितोपसर्गसंबंध इत्यन्ये । आरूपशब्दोऽस्पष्टार्थक इत्यप्याहुः ॥ अनुमानत्वमिति । अयं श्वेतो धावदश्वो भवितुमर्हति हेषाखुरनिष्पेषवत्त्वादित्यनुमानत्वमित्यर्थः । खुरनिष्पेषशब्दवत्त्वमात्रं गवादावनैकांतिकमिति तन्निरासाय हेषापदं । तावन्मात्रं चाधावत्यश्वे व्यभिचरितमिति तन्निरासाय खुरनिष्पेषशब्दपदं ॥ तेष्विति । पदार्थेषु यदन्वयबोधकत्वाधानं तच्छक्तिः श्वेतपदानां कल्पनीयेत्यर्थः ॥ शक्तिद्वयमिति । पदार्थानामन्वय-

बोधशक्तिः पदानां तदाधानशक्तिश्चेति शक्तिद्वयमित्यर्थः ॥ पदांतरेति । पदांतरसन्निधानाच्चाधेया विशेषान्वयशक्तिरित्यर्थः ॥ अशाब्दत्वमिति । न च वाच्यं शब्दोपस्थापितपदार्थाबोध्यत्वाद्वाक्यार्थस्याशाब्दत्वमुपपन्नमिति । शब्दोपस्थापितलिंगबोध्यस्यानुमेयस्यापि शाब्दत्वापत्तेः । शब्दोपस्थापितपदार्थमात्रस्यान्वयबोधकत्वे कारणत्वादिसंबंधेन शब्दोपस्थापितस्याकाशादेरप्यन्वयबोधकत्वप्रसंगाच्च । न च वृत्त्या पदोपस्थापितपदार्थस्यान्वयबोधकत्वांगीकारान्नातिप्रसंग इति वाच्यं । घटः कर्मत्वमानयनं कृतिरित्यादिशब्दोपस्थापितपदार्थस्याप्यन्वयबोधकत्वापातात् । न च वाच्यं वृत्त्या पदविशेषोपस्थापितपदार्थस्यान्वयबोधकत्वमतो नातिप्रसंग इति । आवश्यकपदविशेषस्यैव संगतिस्मरणसहितस्यान्वयबोधकत्वसंभवे तदुपस्थापितपदार्थस्यान्वयबोधकत्वकल्पनाया अयोगादिति ॥ पदार्थाख्येति । यद्यपि शाब्दस्थले शब्दोपस्थितपदार्थस्यैव वाक्यार्थप्रमितिकरणतया भाट्टैरंगीकृतत्वान्न पदार्थाख्यसप्तप्रमाणांगीकारोऽस्ति । तथाऽपि व्युत्पत्तिकाले शब्दस्यैवान्वयप्रमितिकरणत्वग्रहणेन शब्देनायमर्थो ज्ञात इत्यनुभवेन च सिद्धं शब्दस्यान्वयप्रमितिकरणत्वं त्यक्त्वाऽप्रसिद्धस्य पदार्थनिष्ठान्वयप्रमितिकरणत्वस्यांगीकारे गौरवं स्यादित्यत्र तात्पर्यमिति ध्येयम् । ननु पदार्थप्रतिपादनावांतरव्यापाराणां पदानामेवान्वयप्रतिपत्तिकरणत्वमंगीक्रियते । अतो नान्वयस्याशाब्दत्वं नाप्यप्रसिद्धपदार्थाख्यप्रमाणांगीकारे गौरवमित्याशयेन शंकते ॥ नायमिति । ननु पदार्थप्रतिपादनव्यवहितानां पदानां कथमन्वयप्रतिपत्तिजनकत्वमित्यत आह ॥ न हीति ॥ अर्थवदिति । पदार्थ इवेत्यर्थः । न चाशक्त्याभिधायित्वमिति मूलस्याशक्त्यान्वये शक्त्यभावेन

पदानां तदभिधायित्वं न संभवतीत्यक्षरार्थं मनसि निधाय तत्र शक्त्यभावेन तदभिधायित्वं न संभवतीत्येतदुपपादयति ॥ न च तत्रेति । असति वृत्त्यंतरे तत्राशक्तं पदं तत्प्रतिपादयतीति न हि संभवति । वृत्त्यंतररहितत्वे सति तत्राशक्तस्य पदस्य तत्प्रतिपादकत्वाभावस्यैव दर्शनेन व्याघातादित्यर्थः । न चाशक्त्याऽभिधायित्वमिति पाठे त्वशक्यो योऽन्वयस्तदभिधायित्वं शब्दानां न संभवतीत्यक्षरार्थं मनसि निधायान्वयस्याशक्यत्वोक्त्या पदानां तत्र शक्त्यलाभात्तत्राशक्तस्य तदभिधायित्वं नास्तीत्यर्थलब्धं प्रमेयमुपपादयति न चेतीत्यवतारिका द्रष्टव्या । यथा चान्वये वृत्त्यंतराभावस्तथाऽग्रे वक्ष्यते । यद्वा । तत्राशक्तं तत्प्रतीतिजननासमर्थं तदभिधत्ते । तत्प्रतीतिं जनयतीति न च संभवति व्याघातादित्यर्थः । न च वाच्यं पदानामन्वये शक्तिर्नास्तीति वदता तत्र तेषामभिधारूपवृत्त्यभावपक्षे ज्ञानकरणस्य पदस्य ज्ञेयेनान्वयेन सह शक्तिरूपसन्निकर्षाभावेन तत्प्रतिपत्तिजननासामर्थ्यस्यैव प्राप्तत्वात् । न ह्यसन्निकृष्टं करणं कुत्रापि ज्ञानजनकमुपलब्धं । न चान्वयस्तस्य पदशक्यत्वेन शक्तिरूपसाक्षात्सन्निकर्षाभावेऽपि शक्यपदार्थसंबंधित्वरूपपरंपरासंबंधः पदेन सहास्तीति तस्य तत्प्रतिपत्तिजनकत्वं युक्तमिति वाच्यं । प्राथमिकव्युत्पत्तिहेतुनाऽन्वितविषयकेण व्यवहारेण पदानां योग्येतरान्वितस्वार्थे शक्तेर्गृहीततयाऽन्वयांशेऽपि शक्तिसाक्षात्सन्निकर्षसंभवे परंपरासंबंधाश्रयणस्य गौरवकरत्वात् ॥ अतिप्रसंगादिति । तत्राशक्तस्यापि तदभिधायित्वे घटादिशब्दस्य पटाद्यभिधायित्वप्रसंगादित्यर्थः ॥ तथा चेति । पदस्यान्वये शक्त्यभावेन तदनभिधायित्वे सत्यन्वयस्याशाब्दत्वं तदवस्थमप्रसिद्धपदार्थाख्यप्रमाणापत्तिश्चेति भाव इत्यर्थः ॥ प्रतिपादयंतीति । पदानीति शेषः । प्रवृत्तिश्च द्विधाऽन्यथेति ॥८१॥

मूलेऽन्यथा पदानामन्वयेऽपि शक्त्यंगीकारे तत्रापि क्रमेण पदार्थतदन्वयाभिधायित्वे इत्येवमन्यथाशब्दस्यार्थः स्पष्ट इति मनसि निधाय द्विधा प्रवृत्तिरित्यस्यार्थमाह ॥ द्विधेति ॥ तदभाव इति । कुत्राप्यभिधारूपवृत्त्यभावे पदानामन्वये लक्षणाऽपि न संभवतीति शक्यार्थसंबंधिन्येव लक्षणाया दृष्टत्वेन तस्या अभिधाद्वारकत्वादित्यर्थः । इदं चोपलक्षणं । अन्वयस्य प्रागनुपस्थितत्वेन लक्ष्यत्वासंभव इत्यपि द्रष्टव्यम् । न चाशक्त्याभिधायित्वमिति मूलस्याशक्त्या शक्तिभिन्नया लक्षणया शब्दानामन्वयाभिधायित्वमन्वयप्रतिपादकत्वं न संभवतीत्युक्तरीत्या लक्षणाया अयोगादित्यर्थांतरं मनसि निधायोक्तं प्रमेयं मूलारूढं करोति ॥ एतदप्युक्तमिति । यदुक्तं तर्हि पदार्थेषु साहचर्यात्स्मारकत्वमात्रं पदानामन्वये तु लक्षणैवेति न कुत्राप्यभिधानवृत्तिरिति स्यादिति । तदप्युक्तं । स्मारकत्वस्यैवाभिधायित्वरूपत्वेन यथाकथंचित्पदार्थस्मारकाणां पदानामभिधानवृत्तेः प्राप्तत्वादित्याशयेन शंकते ॥ स्मारकत्वमिति ॥ अतिप्रसंगादिति । लक्षणीयार्थस्मारकस्य लक्षकपदस्याप्यभिधायित्वप्रसंगादित्यर्थः । यद्वा । कारणत्वादिसंबंधेनाकाशस्मारकस्य घटादिशब्दस्याप्याकाशाभिधायित्वप्रसंगादित्यर्थः ॥ तस्मादिति । पदानामन्विताभिधायित्वादित्यर्थः ॥ ब्रह्मजिज्ञासाकर्तव्यत्वोपयुक्तमिति । न च वाच्यमधिकारादेरपि जिज्ञासाकर्तव्यत्वोपयुक्तत्वेनातःशब्देनैव ग्रहणसंभवादथशब्दादिवैय्यर्थ्यमिति । शमादिरूपस्याधिकारस्य प्राक् सिद्धस्यैव जिज्ञासाप्रवृत्त्यंगत्वंप्रयोजनादेस्त्वसिद्धस्यापि बुद्धिस्थत्वमात्रेण तदंगत्वं तत्रापि विषयस्य नासिद्धत्वनियमः प्रयोजनस्य तु तन्नियम इत्यादिविशेषज्ञापनार्थं पृथग्ग्रहणस्यावश्यकत्वात् ॥ अथशब्दार्थमेवेति । अथ पूर्ववृत्तात्कर्माधिगमादनंतरमतः कर्मस्वरूप-

स्याधिगमाद्धेतोर्ब्रह्म ज्ञातव्यमित्यानंतर्यप्रतियोगितयाऽथशब्दनिर्दिष्टं कर्माधिगममेव हेतुत्वाकारेणातःशब्दार्थतया व्याख्यातवतामित्यर्थः । तदुक्तं वृत्तिकारैः । वृत्तात्कर्माधिगमानंतरं ब्रह्म विविदिषेति । नन्वानंतर्यप्रतियोगितयाऽथशब्देनोक्तस्य पूर्ववृत्तस्य पूर्वाधिगमस्यातःशब्देन हेतुत्वाभिधानात्तस्य चाथशब्देनासिद्धेः कथं वृत्तिकारमते पुनरुक्तिरित्याशंक्य तामुपपादयति ॥ तथा हीत्यादिना ॥ तस्येति । तात्पर्यविषयस्येत्यर्थः ॥ पूर्वमीमांसेति । अथातो धर्मजिज्ञासेत्यत्राथाध्ययनानंतरं यतः पूर्ववृत्तमध्ययनमतस्तद्धेतुको धर्मविचारः कर्तव्य इत्येवमानंतर्यप्रतियोगितयाऽथशब्दनिर्दिष्टस्याध्ययनस्य हेतुपरत्वेनातःशब्दस्य व्याख्यानं पूर्वमीमांसाव्याख्यातृभिः कृतं । तथा चानंतर्याभिधानमुखेनाथशब्देनैव पूर्ववृत्तस्य हेतुत्वलाभादतःशब्दवैय्यर्थ्यमिति दोषस्तेषामप्यस्तीति भावः ॥ अप्रसिद्धेति । अप्रसिद्धस्याथात इत्यत्रैकपदत्वस्य कल्पनानुपपत्तेरित्यर्थः ॥ अप्रतिज्ञातत्वादिति । अथशब्देनाप्रतिपादनादित्यर्थः । यथा रामानुजादिभिरथशब्दाभिधेयानंतर्यावधिभूतकर्मज्ञानस्य पूर्वमीमांसासाध्यत्वेनैतन्मीमांसायास्तदुपजीव्यत्वं न तथाऽस्माभिरुक्तं । अस्मदभिमताधिकारिविशेषणशमादेः पूर्वमीमांसाऽनपेक्षत्वात् ॥ न विलक्षणत्वादित्यादिनेति । न विलक्षणत्वादस्य तथात्वं च शब्दादित्यनेन तथा श्रुतीनां परस्परविरोधपरिहारकेण न वियदश्रुतेरित्यादिना द्वितीयाध्यायगतपादद्वयेन च वेदप्रामाण्यादेः समर्थयिष्यमणात्वात्तद्वेदप्रामाण्यादिकं नातःशब्दार्थः । अन्यथा प्रथमसूत्रेऽतःशब्देनोक्तस्य वेदप्रामाण्यादेरुत्तरत्रापि वचनेन पुनरुक्तिप्रसंगादिति भावः ॥ एतदिति । न विलक्षणत्वादस्य

तथात्वं च शब्दादित्यस्य प्रथमसूत्रस्थातःशब्दोक्तवेदप्रामाण्यादिकप्रपंचकत्वात् । क्वचिद्द्वितीयाध्यायगतपादद्वये श्रुतीनां परस्परविरोधपरिहारद्वाराऽऽध्यात्मतादीतरस्वरूपनिर्णयमात्रपरत्वेन वेदप्रामाण्यनिर्णयपरत्वाभावाच्च न पुनरुक्तिदोष इति भावः । पादद्वयस्यार्थस्वरूपनिर्णयमात्रपरत्वं चाचार्यवचनादेव ज्ञायत इत्यभिप्रेत्याचार्यवचनमुदाहरति ॥ तथा च वक्ष्यतीति । अथाशेषसमाम्नायविरोधापाकृतिं प्रभुः । करिष्यन्नधिदैवादिभूतजीवपरात्मनां । स्वरूपनिर्णयायैव वचनानां परस्परं । पादेनानेनाविरोधं दर्शयत्यमितद्युतिरिति तृतीयपादे श्रुत्यर्थः श्रुतियुक्तिभ्यां विरुद्ध इव दृश्यते । यत्र तन्निर्णयं देवः विशिष्टोपपत्तिभिः करोत्यनेन पादेनेति चतुर्थपादे चाचार्यस्तथैव वक्ष्यतीत्यर्थः ॥ तस्येति । तत्तु समन्वयादित्युपदमेवोपक्रमादिर्लिंगैः कृत्स्नस्यापि शास्त्रस्य ब्रह्मपरतायाः समर्थनेन कार्यपरस्य निराकरिष्यमाणत्वादित्यर्थः ॥ जगदिति । तत्तुसमन्वयादित्यत्र जगज्जन्मादिकारणत्वाकारेण शास्त्रप्रतिपाद्यत्वस्य हरहिरण्यगर्भादिनिष्ठत्वे तत्रत्यपूर्वपक्षन्यायेन प्राप्ते तन्निरासेन तस्य ब्रह्मनिष्ठत्वसमर्थनादित्यर्थः ॥ न हीति । कार्यवादिनः कार्यं जगज्जन्मादिकारणत्वेन शास्त्रप्रतिपाद्यं न ह्यभ्युपयंति । येन समन्वयसूत्रे तन्निराकरणं संगतं स्यात् । तथा च तत्र कार्यपरत्वनिराकरणभावात्तन्निराकरणस्यातःशब्दार्थत्वं युक्तमिति भावः ॥ न चेति । वेदस्य कार्यपरत्वनिराकरणं तत्प्रकृतं पूर्वमीमांसायां प्रकृतं नैव तथा च पूर्वमीमांसाप्रकृतोपजीवनेऽपि कार्यपरत्वनिराकरणस्यातःशब्दार्थत्वं न युक्तमिति भावः ॥ ब्रह्मतर्कोक्तत्वेनेति । ब्रह्मतर्कोक्तत्वेन प्रकृतत्वादतःशब्देन परामर्शो युज्यत इति पाठे न काचिदनुपपत्तिः । इदंशब्देन परामर्श इति पाठे त्वयं चासौ शब्दश्चेदंशब्द इदं-

पदार्थस्य वाचकशब्द इदंशब्द इति वाऽर्थः । तेनैतदोनित्यनादेशे निष्पन्नस्यातःशब्दस्येदंशब्दरूपत्वाभावादिदंशब्देनेत्ये-
तदयुक्तं । इदंशब्दात्तसिल्प्रत्यये हीदम इशीतीशादेशे इत इतिरूपेण भाव्यमिति दूषणमलग्नकं बोद्धव्यम् ॥ तर्कशास्त्रमिति ।
मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशोधनमित्यत्र तत्सिद्धैस्तर्कशास्त्रव्युत्पादितमानन्यायैः प्रमेयशोधनरूपा मीमांसा क्रियत
इति तर्कशास्त्रं मीमांसांगमित्याचार्य एव वक्ष्यति हीत्यर्थः ॥ आयतनमिति । आयतनमिति विद्योत्पत्तिकारणमित्यर्थः
॥ षडिति । शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षडंगानीत्यर्थः । यद्यप्यंगत्वेन शिक्षादीनामेव प्रसिद्धत्वा-
त्सर्वांगानीत्यनेन तेषामेव ग्रहणं कर्तुमुचितं । न पुराणस्मृतितर्कशास्त्रसहितानां तथाऽप्यधिकस्य सर्वशब्दस्य प्रयोगात्पुराण-
स्मृतितर्कशास्त्राणामपि वेदोपकारकत्वेनांगत्वाच्चतुर्दशविद्यास्थानानां ग्राह्यत्वाच्च सर्वांगानीत्यनेन पुराणस्मृतितर्कशास्त्रसहितानां
शिक्षादीनां ग्रहणं कृतमिति द्रष्टव्यम् ॥ सत्यमितीति । न च वाच्यं सत्यशब्दस्य मीमांसायां योगरूढयोरभावात्कथं सत्यशब्देन
मीमांसा गृह्यत इत्युक्तिरिति । सदेव सोम्येदमग्र आसीत् । सता सोम्य तदा संपन्नो भवति सति संपद्य न विदुरित्यादिषु ब्रह्मवाचक-
त्वेन प्रसिद्धे सच्छब्देऽबाध्यवाचके वा तस्मिन्नुपपदे यातेरन्तर्णीतण्यर्थादातोऽनुपसर्गे क इति कप्रत्ययेऽयस्मयादीनि
छंदसीत्युपपदस्य भसंज्ञाश्रयणेन जश्त्वाभावे आतो लोप इति चेत्यकारलोपे च सति निष्पन्नस्य सत्यशब्दस्य सद्ब्रह्माबाध्यं वा
यापयति ज्ञापयतीति योगस्य मीमांसायां संभवेन सत्यशब्देन मीमांसागृह्यत इत्युक्तेरुपपत्तेः । वस्तुतस्तु निर्णीयते यतः
सम्यगिदं सत्यमिति स्फुटं । श्रुतिस्मृत्युदितं सर्वं व्यक्तं मीमांसयैतया । सत्यमित्युच्यते तस्मान्मीमांसा ब्रह्मनिश्चय इति

प्रमाणानुसारेण सत्यशब्दस्य मीमांसावाचित्वात् । तेन तद्ग्रहणमिति ध्येयं ॥ तथा चेति । एवं व्याख्याने वेदाः सर्वांगानि सत्यमायतनमित्यनेनांगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दशेति वचनांतरसिद्धानि चतुर्दशविद्यास्थानान्युक्तानि भवंतीत्यर्थः ॥ तदर्थमिति । तर्कमीमांसाविद्यायाः पृथक्त्वार्थमित्यर्थः ॥ प्रायिकत्वादिति । तत्प्रतिपाद्यबाहुल्यप्रयुक्तत्वात्तत्तद्विद्याभेदस्येत्यर्थः । ननु तर्कशास्त्रव्युत्पादितवेदप्रामाण्यादेः मीमांसायां सर्वात्मनाऽनुक्तिरेव किं न स्यात्तयोर्भेदार्थमित्यत आह ॥ सर्वथेति ॥ अनेनेति । विद्यापृथक्त्वात्तु संक्षेपेणात्र सूचितमिति तर्कमीमांसाविद्ययोर्भेदार्थं मीमांसायां प्रमाणादिनिरूपणे संक्षेपकरणस्यावश्यकत्वकथनेन जैमिनीयानां मीमांसायामतीवविस्तरेणौत्पत्तिकस्तुशब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रामाण्यं बादरायणस्यानपेक्षत्वादित्यादिना यत्प्रमाणलक्षणादिनिरूपणं तन्न संगतमिति सूचितमित्यर्थः ॥ तदेवेति । मीमांसाशास्त्रे वेदप्रामाण्यादिव्युत्पादनस्य संक्षेपकरणमेवोचितमित्येतदेव प्रपंचयतीत्यर्थः । प्रमाणन्यायसच्छिक्षेत्यत्र प्रमाणशब्देनैव न्यायशब्दितानुमानस्यापि गृहीतत्वान्न्यायेति पृथगुक्तिर्व्यर्थेत्यतो व्याचष्टे ॥ न्याय इति । अध्यायन्यायोद्यावसंहारश्चेत्यत्र नीयतेऽनेनेति न्याय इति करणार्थे निपातितेन न्यायशब्देन कथं व्याप्तिग्रहणमित्याशंकायां न्यायशब्दितानुमानसंबंधात्तद्ग्रहणमित्यभिप्रेत्य संबंधं दर्शयति ॥ अनुमानांगभूतेति । केचित्तु मत्वर्थीयाच्प्रत्ययांतत्वं संबंधार्थाण्प्रत्ययांतत्वं वा न्यायशब्दस्याभिप्रेत्य प्रत्ययार्थभूतं संबंधं दर्शयत्यनुमानांगभूतेतीत्याहुः । तन्न । व्याप्तिवाचकस्याजंतस्य न्यायशब्दस्य टाबंतत्वावश्यंभावेनाणंतस्य च तस्य ङीबंतत्वावश्यंभावेन मूले प्रमाणन्यायसाच्छिक्षेति सुधायां

च न्याय इति निर्देशस्य चानुपपत्तेः । न च न्यायोऽनुमानांगभूतानौपाधिकसंबंध इति निर्देशोऽस्ति । येन सामंजस्यं स्यादिति ॥ प्रथन इति । प्रथने विस्तीर्णत्वे गम्यमाने विपूर्वात्स्तृणातेर्धातोर्घञ्प्रत्ययो भवति न चेत्प्रथनं शब्दविषयं भवतीति शब्दप्रथने घञा निषेधादित्यर्थः ॥ अन्यथेति । पंचाशद्भिः कोटिभिः श्लोकैर्विस्तारः प्रपंचो यस्यार्थस्येति पंचाशत्कोटि-विस्तारशब्दस्यार्थपरत्वेन नारायणतनौ कृतादित्यत्र कृतपदं कृतग्रंथप्रतिपाद्यपरतयौपचारिकं व्याख्येयमित्यर्थः ॥ अयमिति। वेदप्रामाण्यादिरूपोऽर्थ इत्यर्थः । ननु नातिविस्तृतिं चकारेति पुनः साध्याभिधानं व्यर्थं । यतो भगवान्व्यासो देवैर्निमित्तै-स्तत्प्रार्थनया दुर्गमार्थेषु वेदेषु तदर्थमीमांसायां व्यापृतोऽतश्चानवसरतया वेदप्रामाण्यादिरूपार्थे संक्षेपादभ्यसूचयदिति प्रकृतेनानुवृत्तेन साध्येनान्वयसंभवादित्याशंक्य पुनः साध्याभिधानस्य प्रयोजनमाह ॥ संक्षेपादसूचयदिति ॥ प्रकृतेऽपीति ॥ प्रकृतत्वेति । देवैश्च दुर्गमार्थेषु व्यापृत इत्यनेन वेदप्रामाण्यादेः प्रकृतत्वमुपपाद्यत इति प्रतीतिनिरासार्थमित्यर्थः ॥ अन्यथेति । पुनः साध्याभिधानाभावे वेदप्रामाण्यादेः प्रकृतत्वं संक्षेपकरणं चेति साध्यद्वयस्य प्रस्तुतत्वात्प्रकृतत्वोपपा-दनपरतयाऽप्येतद्वाक्ययोजनायां शिष्याणां मनसि खेदः स्यादित्यर्थः ॥ नञिति । असुरा अविद्या अधर्म इत्यादौ नञो विरुद्धार्थवाचित्वस्य दृष्टत्वादिति भावः ॥ न भ्राडिति । न भ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्येत्यत्र न भ्राडित्यादिशब्देषु नारायणशब्दस्य पठितत्वादित्यर्थः। इदं चोपलक्षणं। स्त्रैणार्थ इत्यादौ नलोपाभावार्थं नलोपो नञ इत्यत्र रात्रेः कृतिविभाषेत्यस्मादनुवृत्ताया विभाषाया व्यवस्थितविभाषात्वस्य न्यासे स्थितत्वादत्रापि नलोपाभाव इत्यपि द्रष्ट-

व्यम् । ननु काशिकायामलुगुत्तरपद इति सूत्रव्याख्यानावसरे उत्तरपदाधिकारः प्रागानङोऽधिकारादित्युक्तेः । नलोपो नञ् इत्यत्र उत्तरपद इत्यनुवर्तते। अतः पूर्वपदस्येति लभ्यते। एवंच स्त्रैणार्थ इत्यत्र नञ्प्रत्ययस्य पूर्वपदत्वाभावेन नलोपाप्रसक्तेः नलोपो नञ इत्यत्र विभाषानुवृत्तिर्नांगीकार्येति चेत् । मैवम् । उत्तरपदे इत्यत्रोत्तरत्वमात्रस्य ससंबंधिकत्वेन पूर्वस्येत्यर्थस्यैव लाभात् । अन्यथोत्तरपद इत्यनुवृत्तिबलात्पूर्वपदस्येत्यर्थलाभांगीकारे महाभाष्योक्तसानुबंधकग्रहणप्रयोजनानुपपत्तेः । महाभाष्ये हि नलोपो नञ इत्यत्र चादिष्वननुबंधक एव नकारः पठ्यतां । स एव चानुक्रियतामित्याशयेन किमर्थं नञः सानुबंधकस्य ग्रहणं क्रियत इत्याशंकायां नस्येतीत्युच्यमाने पामनपुत्रो वेमनपुत्र इत्यत्रापि नलोपः प्रसज्येत सा मा भूदित्येतदर्थं सानुबंधकस्य ग्रहणमिति नञ इति सानुबंधकग्रहणस्य प्रयोजनमुक्तं तदनुपपन्नं स्यात् । लोमादिपामादिपिच्छादिभ्यः शनेलच इति विहितस्य नप्रत्ययस्य पूर्वपदत्वाभावादेव नप्रत्ययनकारस्य लोपाप्रसक्तेः । न च वाच्यं नञ्प्रत्ययञित्वस्य वृद्धिस्वरयो-श्चरितार्थत्वान्निपातञित्वस्य त्वनन्यार्थत्वान्नलोपो नञ इत्यत्र निपातस्यैव ग्रहणं भविष्यति । अतः किं विभाषानुवृत्त्येति । अनन्यार्थानुबंधकग्रहणे नान्यार्थानुबंधकस्य ग्रहणमिति परिभाषायाः कुत्राप्यनुपलब्धेर्विभाषानुवृत्त्यवश्यंभावात् । यद्यपि स्त्रैणार्थ इत्यादौ नलोपाभावार्थं विभाषानुवृत्तिरित्येतद्भाष्यकाराभिमतं न भवति । अन्यथा विभाषाबलादेव पामनपुत्र इत्यादौ नलोपा-भावोपपत्तौ तत्र नलोपाभावार्थं सानुबंधकग्रहमित्यस्यायुक्तत्वप्रसंगात् । तथाऽपि विभाषानुवृत्तेर्न्यासकृदभिमतत्वात्तन्मतानुसा-रेण नञ्समास इत्युक्तिः । विभाषाग्रहणानुवृत्तिं वदन्न्यासकारो हि नभ्राडित्यादिसूत्रस्यानारंभणीयत्वं मन्यते । भाष्यकारमते

नलोपो नञ इत्यत्रानन्यार्थञित्वस्य निषेधार्थकनञ एव ग्रहणात् स्त्रैणपुत्र इत्यादौ नलोपाभाव इति ध्येयम् ॥ गणपाठितेति । चादिगणपाठितेत्यर्थः । ननु ल्युडंतस्यायनशब्दस्य नपुंसकत्वनियमात्कथं पुलिंगप्रयोग इत्यत आह ॥ ल्युट इति । भावार्थल्युडंतस्य नपुंसकत्वनियमेऽप्यधिकरणाद्यर्थल्युडंतस्य तन्नियमाभावः । अन्यथा ल्युटस्टित्करणमनर्थकं स्यात् । टित्करणस्य टिड्ढाणञित्यादिना टित्वान्नित्यनपुंसकत्वे च तदयोगात् । अत एव महाभाष्ये कोसावनुमानो नामेति प्रयुक्तं । तद्व्याख्यानावसरे कैय्यटेयो भावे ल्युट् स नपुंसकः अन्यत्र त्वभिधेयवशादनियतलिंग इति समर्थितं च । अतोऽयनशब्दस्य पुंल्लिंगत्वोपपत्तिरिति भावः ॥ सर्वेति । सर्ववस्त्वात्मकत्वलक्षणपूर्णतां ब्रह्मशब्दो वक्तीति या ब्रह्मशब्दस्य परकीयव्याख्या तामित्यर्थः । सर्वप्रमाणविरुद्धमित्युपलक्षणं । अप्रामाणिकीमित्यपि ग्राह्यम् । ब्रह्मणः सर्वात्मकत्वस्य सर्वप्रमाणविरुद्धत्वमप्रामाणिकत्वं चोक्तवक्ष्यमाणन्यायेनेदं द्रष्टव्यम् ॥ यस्त्विति । आपो नारा इति वचनांतरदर्शनान्नारायणशब्दसमानार्थतां ब्रह्मशब्दस्य यस्तु नानुमन्यते तं प्रत्युपपत्त्यंतरमाहेत्यर्थः ॥ मुख्यवृत्तिरिति । परममुख्यवृत्तिरित्यर्थः ॥ मुख्यार्थस्येति । परममुख्यार्थस्येत्यर्थः ॥ नरसूनव इति । नरो तावविनाशित्वादिति ऋग्भाष्योक्तरीत्या चतुर्विधनाशाभावेन निमित्तेन नरशब्दवाच्यस्य परमात्मनः सूनवः । अतो जाता इति यावत् । वा इत्यनेनापां नरसूनत्वमप एव ससर्जादावित्यादिप्रमाणप्रसिद्धमिति सूचितम् । अनेनापां नाराशब्दवाच्यत्वे निमित्तमुक्तं भवति । यद्यपि नरशब्दादणिकृतेऽप्सु विवक्षितासु टिड्ढाणञित्यादिना ङीपा भवितव्यत्वेन नारा इति निर्देशानुपपत्तिः । तथाऽपि छांदसत्वेन

टित्रूभाव इति वा प्रज्ञाश्रद्धा चावृत्तिभ्योण इत्यत्र ण इति योगविभागाश्रयणेन मत्वर्थीयणप्रत्ययांतो नारशब्द इति वा नरशब्दात्प्रज्ञादिभ्यश्चेति स्वार्थेणिकृते तदंतादर्शआदित्वेन मत्वर्थीयाच्प्रत्यये नारशब्दो निष्पन्न इति वा समाधानमत्र द्रष्टव्यम् । वस्तुतस्तु कीलालं भुवनं कबंधकमले स्याज्जीवनं शंबरं नादः पुंसि कमव्यय इति शब्दरत्नाकरोक्तेः । अब्वाचिनो नारशब्दस्य नित्यपुलिंगत्वादणंतत्वेऽपि टिवभावो नरसूनव इत्येतत्तु नारशब्दस्याप्सु योगोऽप्यस्तीति प्रदर्शनार्थमिति ध्येयम् । ता नारशब्दिता आपः पूर्वं प्रलयकाले तस्य परमात्मनोऽयनमित्यनेन नारा अयनं यस्येति बहुव्रीहिरुक्तो भवति । यद्यप्यय-नशब्दस्याधिकरणार्थे नियतलिंगत्वाभावादयनमिति निर्देशानुपपत्तिस्तथाऽपि छांदसत्वेन तदुपपत्तिरिति वा पूर्वं तस्यायनमिति सामान्यतोऽयनमुद्दिश्य ता आप इत्यस्वविधानात्तदुपपत्तिरिति वा नायमधिकरणशब्दोऽधिकरणसाधनः किं तु भावसाधन एव । सामानाधिकरण्यं तु पिपीलिकालिपिश्चापि प्रमाणमित्यत्रेव भाक्तमतो नानुपपत्तिरिति वा समाधानमवधेयम् ॥ अन्यत्रापीति । शच्यादिष्वपीत्यर्थः ॥ ताश्चेति । शची शामलोषसोऽपि श्रिय इतीरितेति संबंधः । कस्मान्निमित्तादित्या-कांक्षायामुक्तम् ॥ इंद्रधर्मनासत्यसंश्रयादिति । तत्र च द्वंद्वांते श्रूयमाणस्य संश्रयशब्दस्य प्रत्येकं संबंधादिंद्रसंश्रयणं शच्यां श्रीशब्दप्रयोगनिमित्तं धर्मसंश्रयणं श्यामलायां नासत्यसंश्रयणमाश्विभार्यायामुषसीति द्रष्टव्यम् । न च वाच्यं ताश्चेति तात्पर्यनिर्णयगतवाक्ये श्रीशब्दप्रवृत्तिनिमित्तपूर्वकं शच्यादीनां श्रीशब्दवाच्यत्वोक्तेः कथं श्रीशब्दोऽन्यत्राप्युपचाराद्वर्तत इत्युपचारोक्तिर्युक्तेति । श्रीयते आश्रयते सर्वैरिति कर्मव्युत्पत्त्या लब्धस्य मुख्यस्य श्रीशब्दप्रवृत्तिनिमित्तस्य सर्वसेव्यत्वेऽस्य

श्रूयते विष्णुमेवेति व्युत्पत्त्या लब्धस्य विष्णुमात्राश्रितत्वस्य महालक्ष्म्या अन्यत्रासत्त्वेनोपचारोक्तेर्युक्तत्वादिंद्रधर्मनासत्यसंश्रयादिति वाक्यं तु यथा महालक्ष्म्या विष्णुसंश्रयणमस्ति । तथा शच्यादीनामिंद्रादिसंश्रयणमस्तीत्युपचारबीजकथनपरमिति न कश्चिद्विरोधः । न च कर्मव्युत्पत्तिपक्षे इंद्रधर्मनासत्यसंश्रयादित्यस्योपचारबीजकथनपरत्वं न संभवतीति वाच्यं । इंद्रधर्मनासत्यसंश्रयणाद्धेतोः स्वनीचसेव्यत्वेन ता श्रिय ईरिता इति योजनया तत्कथनपरत्वोपपत्तेः । अस्तु वेंद्रधर्मनासत्यसंश्रयादित्येतद्वाक्यं श्रीशब्दप्रवृत्तिनिमित्ताभिधानपरं तथाऽपींद्रादिशब्दानां भगवतोऽन्यत्र परममुख्यत्वाभिप्रायेणामुख्योक्तिरिव श्रीशब्दोऽप्यन्यत्राप्युपचाराद्वर्तत इत्युपचारोक्तिस्तदभिप्रायेण युक्तैवेति ॥ अंभृणीति । यद्यप्यनुक्रमणिकायामहमष्टौ वात्मानं द्वितीया जगतीति पाठो दृश्यते । तथाऽपि तट्टिकायामहं रुद्रेभिरित्यष्टर्चस्य सूक्तस्यांभृणीनाम ऋषिरित्युक्तत्वात्तुष्टावात्मानमित्यत्रात्मानं तुष्टावेत्यन्वयस्य प्रदर्शनीयत्वाच्च । अंभ्रणीवागात्मानं तुष्टावेत्यर्थतो ग्रहणं कृतमिति द्रष्टव्यम् ॥ ब्रह्मेति । चतुर्मुखस्रष्टृत्वादित्यर्थः ॥ आज्ञेति । आज्ञया धृतो महदादिदेवतासमूहो यस्य स आज्ञाधृतमहदादिसमूहस्तस्य भावस्तत्त्वं तेनेत्यर्थः ॥ यस्मिन्निति । सम्यग्विधं चेदं सर्वं यस्मिन् एधि अवर्धतेत्यर्थः । एवं वृद्धावित्यस्माच्छंदसि विकरणव्यत्ययेन शपो लुकिपुरुषव्यत्ययेनोत्तमपुरुषैकवचने इटि बहुलं छंदस्यमाङ्योगेऽपीति अडागमाभावे चैतद्रूपम् । एधीति वा पदच्छेदमाश्रित्य पुरुषविकरणव्यत्ययमात्रं कल्पनीयम् । यद्वा । एधीत्यस्य लकारपुरुषव्यत्ययेनास्तीत्यर्थः । अस्तेर्लोटि मध्यमपुरुषैकवचने खलु सेर्ह्यपिच्चेति सेर्ह्यादेशे तस्यापित्वेन ङिद्वद्भावात् श्नसोरल्लोप इत्यकारलोपे घसोरेद्धावभ्यासलोपश्चेति साकारस्य

एत्वे तस्यासिद्धवदत्राभादित्यसिद्धत्वात् । हुझल्भ्योहेर्धिरिति हेर्धित्वे च रूपमेतत् । ननु मूले तदेव ब्रह्म चाब्रवीदिति शब्द एव श्रूयते । न त्वितिशब्दस्तत्कथं तदेव ब्रह्मेत्यब्रवीदिति व्याख्यानं घटत इत्यत आह ॥ ब्रह्म चेति ॥ चशब्द इति । ब्रह्म चेत्यत्र चशब्द इतिशब्दार्थे वर्तत इत्यर्थः ॥ प्रसिद्धं चेति । ब्रह्म प्रसिद्धं चेन्न जिज्ञास्यं विप्रतिपत्त्यभावादिति भावः ॥ अप्रसिद्धत्व इति । ब्रह्मणोऽप्रसिद्धत्वेन तज्जिज्ञासितुं शक्यं । जिज्ञास्यत्वप्रयोजकसामान्यप्रतिपत्तिविरहादिति भावः ॥ सर्वस्येति । ब्रह्म सर्वस्य जीवस्य स्वरूपत्वाच्चाहमिति प्रत्यक्त्वरूपेण सामान्येन प्रसिद्धमेवेत्यर्थः ॥ देहेति । देहेंद्रियमनःशून्यब्रह्मत्वादिविशेषविप्रतिपत्तिसद्भावादित्यर्थः ॥ ब्रह्मेति । यदि ब्रह्मजिज्ञासापदेन जीवजिज्ञासा विधीयते तदा जीवात्मनि सामान्यप्रसिद्धिविशेषविप्रतिपत्तिव्युत्पादनं संगतं स्यात् । न चैवं । किं नाम तेन सकलजगज्जन्मादिकारणस्य भगवतो नारायणस्य जिज्ञासा विधीयत इत्युपपादितं तस्यां च विधीयमानायां जीवात्मनि सामान्यप्रसिद्धिविशेषविप्रतिपत्तिव्युत्पादनस्य का संगतिः । न काऽपि किं तु भगवतो नारायणस्य जिज्ञास्यत्वार्थं तत्रैव तद्व्युत्पादनं संगतमिति भावः । ननु ब्रह्मजिज्ञासापदेन जीवात्मनो ब्रह्मत्वेन प्रकारेण जिज्ञासा विधीयतेऽतो जीवात्मनो जिज्ञासाधर्मित्वात्तत्र सामान्यप्रतिपत्तिविप्रतिपत्तिव्युत्पादनं संगतमेवेत्याशयेन शंकते ॥ जीवात्मन इति ॥ नैवमिति । जीवात्मनो ब्रह्मत्वेन जिज्ञासां सूत्रकारो नाह किं तु ब्रह्मजिज्ञासेति प्रयुंजानो ब्रह्मधर्मिकजिज्ञासामेवाह । किं च विशिष्टयोर्बिंबप्रतिबिंबयोरभेदाभावेन जीवशब्दितप्रतिबिंबस्य ब्रह्माभिन्नत्वेन जिज्ञास्यत्वायोगः । उत्तरसूत्रे जीवासंभावितजगज्जन्मादिकारणत्वरूपलक्षणोक्त्ययोगश्च ।

जीवब्रह्मपदाभ्यां चिन्मात्रविवक्षायां तु चिन्मात्रे देहात्मकत्वादिविप्रतिपत्त्यभावेन तद्व्युत्पादनायोग इत्यादिदूषणजातं ग्रंथविस्तरभयान्न लिख्यत इत्याशयेनाह ॥ अलमिति । अन्यथाऽश्रुतजीवात्मपदकल्पनं कस्य कथं विचार इति प्रथमाकांक्षितप्रधानधर्मिसमर्पकत्वेन श्रुतस्य ब्रह्मशब्दस्य त्यागश्च स्यादिति भावः ॥ १—१—१ ❁ ॥ ❁ ॥

॥ इति जिज्ञासाधिकरणं समाप्तम् ॥

॥ अयंग्रंथः खंडो रामचंद्र भिसे इत्यनेन " कर्नाटक प्रिंटिंग वर्क्स, धारवाड " मुद्रणालये मुद्रितः ।
सवणूरकुलोत्पन्नराघवेंद्रसूनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ॥

॥ इति श्रीमन्न्यायसुधाटिप्पणी कंभाल्लूररामचंद्रभिक्षुकृता समाप्ता ॥

॥ जिज्ञासाधिकरणम् ॥

॥ अथ श्रीमन्न्यायसुधाटिप्पणी कंभाल्लूररामचंद्रभिक्षुकृता प्रारभ्यते ॥

॥ प्रथमे द्वितीयः पादः ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ॐ ॥ द्वितीयेति । द्वितीयपादस्य प्रतिपाद्यमर्थं दर्शयतीति संबंधः । किमर्थमित्यतः पूर्वोत्तरपादभेदस्य सिद्धये स्वस्मिन्द्वितीयपादे एकवाक्यत्वसिद्धये चेत्युक्तं ॥ निमित्तेति । प्रवृत्तिनिमित्तस्य लिंगस्य निमित्तवतः शब्दस्य चाभेदोपचारादात्मशब्दस्य स्वरूपार्थत्वपक्षे लिंगात्मकानामिति व्यपदेशः संभवतीति भावः ॥ न चेति । यस्य शब्दस्य हरौ समन्वयः समर्थ्यते । तस्य यौगिकत्वाभावेन तच्छब्दप्रवृत्तिनिमित्तगुणालाभात्तल्लाभेन तत्समन्वयसमर्थनस्य सार्थक्यायोगेऽपि तच्छब्दप्रकरणगतगुणांतरलाभेन तस्य सार्थक्यं युज्यत इति न चेत्यर्थः ॥ वचनेति । लक्षणया ब्रह्मणि समन्वयांगीकारेऽपि लाक्षणिकशब्दप्रकरणगतगुणांतरतत्समन्वयसमर्थनस्य सार्थक्योपपत्तेः । वचनवृत्त्यंगीकारस्य वैफल्यप्रसंगादित्यर्थः । रूढ्यंगीकारवैफल्यादित्यर्थः ॥ उक्तं चेति । गुणपूर्त्यलाभप्रसंगेन शब्दानां हरौ यौगिकत्वं न केवलमस्माभिरेवानुमीयते । किंतु शब्दैरतोऽनंतगुणे यच्छब्दा योगवृत्तय इत्यनुभाष्ये सर्वेषां शब्दानां हरौ यौगिकत्वमाचार्यैरुक्तं चेत्यर्थः ॥ सत्यमिति । सर्वेऽपि शब्दा हरौ यौगिका इत्येतत्सत्यं । तथाऽपि यथा सर्वेषां शब्दानां सिद्धांतन्यायेन हरौ प्रसिद्धत्वेऽप्यापातप्रतीत्यनुरोधेनान्यत्र प्रसिद्धत्वादेरुक्तिः । तथाऽप्यापातप्रतीत्यनुरोधेन केषांचिच्छब्दानां यौगित्वमाश्रित्य लिंगात्मकत्वोक्तिरित्यदोष इत्यर्थः (आपातप्रतीत्यनुरोधेनेति यौगिकत्वलिंगत्वमित्युक्तिरापातप्रतीत्यनुरोधेनेत्यर्थः । आपाततो यौगिकत्वं लिंगत्वमिति यावत् । तदपि चापाततो रूढिरहितत्वमेव मंतव्यं । ततो नानेकपदसमभिव्याहारात्मकेषु सर्वेषु भूतेष्वेतमित्यादिरूपलिंगात्मकशब्दे नाव्याप्तिरिति भावः । तथा च पूर्वपादे समन्वितानां शब्दानां विद्वद्रूढ्या यौगिका-

नाममपि अज्ञप्रतीत्यनुरोधेन रूढ्या साक्षाद्धर्म्युपस्थापकत्वं विवक्षितं । अतो युक्तेयं पादभेदोक्तिरिति भावः)। ॥ ॐ सर्वत्र प्रसिद्धोपदेशात् ॐ ॥ सत्यकामत्वादीति । मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प इति वाक्ये सत्यकामत्वादिब्रह्मधर्माणां स्फुटप्रतिभासत्वेन तत्र मनोमयत्वादिनोपास्यो जीवो वा ब्रह्म वेति संदेहस्य जीव एवेति पूर्वपक्षस्यानुपपत्तेरित्यर्थः । ननु मनोमयः प्राणशरीर इति वाक्ये मनःसंबंधित्वादयो जीवधर्मा अपि प्रतीयंते । अप्राणो ह्यमना शुभ्र इत्यादिश्रुत्या ब्रह्मणो मनःप्राणसंबंधादिरहितत्वात् । अतः संदेहपूर्वपक्षयोरुपपत्तिरित्याशयेन शंकते ॥ न त्विति ॥ चरमेति । चरमप्रतीतेनापि निरवकाशेन सत्यकामत्वादिना प्रथमप्रतीतस्य सावकाशस्य मनोमयत्वादेर्बाधोपपत्तेः पूर्वपक्षानुदय एवेति भावः ॥ ननु कथमिति । मनोमयः प्राणशरीर इत्यत्र मनोमयत्वादेरानंदमयाधिकरणन्यायेन (चष्ट इत्येव तच्चक्षुः श्रवणाच्छ्रोत्रमुच्यत इत्यानंदमयाधिकरणन्यायेनेत्यर्थः) ब्रह्मणि सावकाशत्वेन परपक्षे पूर्वपक्षप्रापकत्वायोगेऽस्मत्पक्षेऽपि चक्षुर्मयश्रोत्रमयछंदोमयोमनोमय इत्यादिनोक्तानि चक्षुर्मयत्वादीनि एतमस्यामेतं दिव्ये तं वायवे तमाकाश एतमप्स्वेतमोषधीष्वेतं वनस्पतीष्वेतं चंद्रमस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षत इति वाक्योक्तं सर्वगतत्वं सर्वजीवानां भवेदिति पूर्वपक्षस्य प्रापकाणि कथं स्युर्न कथंचित् । चक्षुर्मयत्वादीनामप्यानंदमयाधिकरणन्यायेन ब्रह्मणि सावकाशत्वादित्यर्थः ॥ हेत्वंतरेणेति । सर्वेषु भूतेष्वित्युक्तेनाल्पौकस्त्वेनापरिच्छिन्ने ब्रह्मणि निरवकाशेन पूर्वपक्षे सत्यभ्युच्चयमात्रत्वेन चक्षुर्मयत्वादीनामुपन्यासोऽस्माभिः कृतः । न तु तेषामेवासाधारण्येन पूर्वपक्षप्रापकत्वमित्याशयेन येनास्मत्प-

क्षेऽपि पूर्वपक्षानुदयः स्यादिति भावः ॥ यथेति । यथा परस्य मते ईक्षत्यधिकरणे तदैक्षत बहु स्यां प्रजायेयेति । अत्रेक्षतिर्गौणो व्याख्येयः । तत्तेज ऐक्षत त आप ऐक्षंतेति गौणप्राये पठितत्वादिति पूर्वपक्ष्याशंकितप्रायपाठे गौणश्चेन्नात्मशब्दादिति निरस्तेऽपि प्राणाधिकरणपूर्वपक्षे उद्गीथप्रतीहारदेवतयोरादित्यान्नयोरब्रह्मत्वात्तत्प्रायपाठितप्रस्ताव-देवतारूपप्राणस्याप्यब्रह्मत्वमेव स्वीकर्तुमित्यभ्युच्चयमात्रत्वेन प्रायपाठस्योपन्यासः । तथाऽस्मत्पक्षेऽपि चक्षुर्मयत्वा-दीनामभ्युच्चयमात्रत्वेनोपन्यास इति पूर्वेण संबंधः । ॥ प्रागुक्तामिति । अत्रगस्य हि विष्णोरेव तु लिंगानि प्राणस्थानि तु सर्वशः । प्राणसंवादपूर्वाणीत्यादिना मुख्यप्राणशक्तीनां तदंतर्गतभगवदायतत्वं प्रागुक्तमिति भावः ॥ तदिति । भगवत्सर्व-गतत्वमित्यर्थः ॥ उक्तार्थेति । मुख्यप्राणशक्तयस्तदंतर्गतभगवदायत्ता इत्युक्तार्थसमर्थनायेत्यर्थः ॥तत्तदिति । तत्तच्छक्तिप्रेर-कत्वेन सर्वसंयोगित्वं सर्वगतत्वं विवक्षितं । तस्य च गुणत्वात्तदुपपादनमुपपद्यत इत्येतत् तत्र तत्र स्थितो विष्णुस्तत्तच्छक्तिप्रबोधक इत्यनेनोच्यत इत्यर्थः ॥ अदृश्यत्वादीति । अदृश्यत्वादिगुणको धर्मोक्तेरित्यधिकरणे यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्ममिति विषयवाक्योक्तादृश्यत्वादिगुणमध्यपतितत्वेन सर्वगतत्वस्य हरिनिष्ठतया प्रति-पादयिष्यमाणत्वादित्यर्थः । ननु तत्तच्छक्तिप्रबोधक इत्यत्र तत्तच्छक्तीनां प्रबोधक इति षष्ठीसमासोऽभिमतः । स च न संभ-वति । कर्तरि च कर्तरि यौ तृजकौ ताभ्यां षष्ठी न समसस्यत इति षष्ठीसमासप्रतिबाधादिति शंकते ॥ तत्तदिति । याजका-दिभ्यश्च याजकादिभ्यश्च षष्ठी समस्यत इति षष्ठीसमासस्य प्रतिप्रसवात् प्रबोधकशब्दस्यापि याजकादित्वेन षष्ठीसमास उपपन्न इत्या-

शयेन परिहरति ॥ नेति । प्रबोधकशब्दस्य याजकादिष्वपठितत्वाद्याजकादिभ्यश्चेत्यनेन षष्ठीसमासो नोपपद्यत इत्यरुच्या पक्षांतरमाह ॥ यद्वेति ॥ पचाद्यजंतत्वेन वेति । प्रपूर्वाद्बुद्ध्यतेर्नंदिग्रहिपचादिभ्यो ल्युणिन्यच इति पचादित्वेनाच्प्रत्यये पुगंतलघूपदस्य चेति गुणे च कृते निष्पन्नः प्रबोधशब्दः प्रबोद्धृवाचकाच्प्रत्ययस्य कर्तरि कृदिति कर्तरि विहितत्वादिति भावः ॥ ॐ कर्मकर्तृव्यपदेशाच्च ॐ ॥ नियामकाभावेनेति । विपक्षे बाधकाभावेनेत्यर्थः ॥ क्रियाश्रय इति । क्रियानुकूलव्यापाराश्रय इत्यर्थः । मीमांसकाद्यभिमतं कर्मलक्षणमाह ॥ परेति । अत्र फलशालित्वं कर्मत्वमित्युक्ते पुण्यफले सुखादिशालिन्यतिप्रसक्तेस्तन्निरासाय क्रियेति ॥ लक्षणेति । क्रियाश्रयत्वपरसमवेतक्रियाफलशालित्वरूपकर्तृकर्मलक्षणयोर्विरुद्धत्वात्तदाश्रययोः कर्मकर्त्रोर्भेदो नियत इत्यर्थः ॥ तथा चेति । देवदत्तसमवेतगतिरूपक्रियाजन्यविभागशालिनोऽपि कर्मत्वे देवदत्तः कौशांबीं पाटलीपुत्रं गच्छतीति प्रयोग इति भावः । अनागतादेरिच्छादिकर्मत्वं मास्त्वितीष्टापत्तिं शंकते ॥ मा भूदिति ॥ सकर्मकत्वेति । इच्छादीनां सकर्मकत्वं चेदमिच्छामीत्याद्यनुभवसिद्धमिति भावः ॥ द्वितीयानुपपत्तीति । अनागतादेरिच्छादिक्रियां प्रति अकर्मत्वेऽनागतादिवाचिपदद्वितीया न स्यात् । कर्मणि द्वितीयेति कर्मण्येव तदनुशासनादिति भावः ॥ निराकरिष्यमाणत्वादिति । न परिच्छेदकार्येव प्रमाणमिति च प्रमेत्यत्रेति शेषः । अस्तु वा ज्ञातता तथाऽप्यव्याप्तिरित्याह ॥ इच्छादिनेति । आदिपदेन कृत्यादिसंग्रहः । ज्ञानस्य ज्ञातताजनकत्वात्परसमवेतज्ञानक्रियाजन्यज्ञाततारूपफलशालित्वेन ज्ञानकर्मणि वर्तमानघटादावुक्तरूपकर्मत्वस्य सत्वेऽपीच्छादिक्रियाणां ज्ञाततोत्पादकत्वाभावेनेच्छादिक्रियाजन्यज्ञाततारूपफलशालित्वाभावेनेच्छाकर्मणि वर्तमानघटादावुक्तलक्षणाभावादव्याप्तिः । न द्वितीय इत्याह ॥ नापीति ॥ व्यवहारेति । अभिलपनाभिज्ञारूपस्य व्यवहारस्य कर्तृनिष्ठत्वादित्यर्थः ॥ अन्यथेति । अत्तृत्वकर्मत्वयोर्विरोधे कर्मकर्ता दुर्लभः स्यात् । तथा च पच्यते ओदनः स्वयमेव मुच्यते वत्सः स्वयमेवेत्यादौ कर्मकर्तरि प्रयोगो न स्यादिति भावः ॥ किं चास्तीति । कांस्यपात्र्या भुंक्ते कांस्यपात्र्यां भुंक्ते इत्यादिप्रयोगदर्शनात् करणत्वाधिकरणत्वयोः समावेशस्तावदस्ति । तथा कर्मत्वकर्तृत्वयोरपि समावेशे को विरोधः । न कोऽपीत्यर्थः । अव्यभिचरितसहचारदर्शनात् कर्मकर्त्रोर्भेदेन व्याप्तिनिश्चय इत्याशंकते ॥ ननु चेति ॥ दर्शनादर्शनमात्रस्येति । सहचारदर्शनव्यभिचारदर्शनमात्रस्येत्यर्थः । व्यभिचाराभावे प्रमाणप्रवृत्तिसहकृतस्य तस्य व्याप्त्यनिश्चायकत्वात्तन्निरासाय मात्रपदं । न व्यभिचारादर्शनमप्यस्तीत्याह ॥ न चेति । नापीत्यर्थः । नन्वात्मनोऽहमिति मानसप्रत्यक्षावसेयत्वेऽहमिति प्रत्ययं प्रत्यात्मन एव कर्तृत्वात्कर्मत्वाच्चैकस्य कर्तृकर्मभावः प्राप्त एवेत्यत आह ॥ तथाऽपीति । अहंप्रत्ययं प्रत्यात्मनः कर्तृतैव न कर्मता । कर्मत्वाभावेऽप्यात्मकर्तृकेऽहंप्रत्यये प्रतिभासमात्रेण तस्यापरोक्षसिद्धेरित्यर्थः ॥ तदिति । अहंप्रत्यये कर्मत्वातिरिक्तस्याहंप्रत्यये प्रतिभासस्य निर्वक्तुमशक्यत्वात्तत्कर्मत्वरहितस्याप्यात्मनस्तत्र प्रतिभासमात्रेणापरोक्ष्यमित्येतद्वचनं रिक्तमेवेत्यर्थः ॥ अहं सुखमिति । अहंप्रत्यये सुखादिमात्रस्य कर्मत्वं सुखादेरहमर्थस्य चैक्यं विना न संभवतीति तदैक्यस्यापतितत्वेनाहं सुखमित्यादिव्यवहारप्रसंगादित्यर्थः । नन्वहंप्रत्ययं प्रति न सुखादिमात्रं कर्म । येनोक्तदोषः स्यात् । किंतु सुखादिविशिष्टः कर्म । ज्ञानाश्रयस्तु कर्ता । अतो नोक्तदोष इति शंकते ॥ अथेति ॥ आगतामिति । कर्मणि

सुखादिविशिष्टे कर्तरि ज्ञानाश्रये प्रविष्टस्य विशेष्यांशस्यात्मत्वेनांशतः कर्मकर्त्रोरैक्यमागतमित्यर्थः । युंजानस्य ध्याननिष्ठस्य । निरुपाधिं केवलं ॥ यदिति । परसमवेतक्रियाफलशालित्वक्रियाश्रयत्वरूपकर्मकर्तृलक्षणमात्राधीनो विरोधो यस्य तथाविधं कर्मकर्तृभावं परिहर्तुं सर्वलोकावसितो विरोधो यस्य तं क्रियाकर्मभावमुपैतीति यत्तद्वृश्चिकभयात्पलायमानस्याशीविषमुखे निपात इत्यन्वयः । क्रियात्वकर्मत्वयोर्विरोधमेव दर्शयति ॥ क्रिया हीति ॥ न हीति । घटादयः स्वसिद्धौ प्रकाशांतरं प्रकाशादन्यन्न ह्यपेक्षंते । किं नाम प्रकाशमेवापेक्षंत इत्यर्थः ॥ स्वातिरिक्तेति । एवंच घटादेः स्वातिरिक्तप्रकाशापेक्षासिद्धिकत्वेनोक्तलक्षणविरहान्न स्वप्रकाशत्वमिति भावः ॥ स्वापेक्षेति । स्वस्य स्वापेक्षाविरहेण ज्ञानस्वरूपप्रकाशापेक्षसिद्धित्वादसंभव इत्यस्याप्रसक्त्या स्वातिरिक्तविशेषणस्य वैयर्थ्यादित्यर्थः ॥ व्यवहारेति । स्वविषयकव्यवहारहेतुप्रकाशत्वमित्यर्थः । तथा चास्मिन्पक्षे स्वकर्मकप्रकाशत्वपक्ष इव क्रियाकर्मभावविरोधो नेति भावः ॥ स्वविषय इति । ज्ञानस्य स्वविषय एव व्यवहारहेतुत्वस्य दृष्टत्वेनास्वविषयकस्य ज्ञानस्य स्वविषयकव्यवहारहेतुताया अनुपपत्तेरित्यर्थः । ननु गाङ्कुटादिभ्य इति सूत्रे कुटादीति बहुव्रीहिरन्यपदार्थविषयकस्य स्वाविषये कुटेऽपि यथा कार्यकारित्वं तथा ज्ञानस्यापि स्वाविषये स्वस्मिन् व्यवहाररूपकार्यकारित्वं किं न स्यादित्यत आह ॥ तद्गुणेति । स्वाविषयेऽपि स्वकार्यकारित्वमित्यत्र कुटादीत्यादितद्गुणसंविज्ञानबहुव्रीह्यादिकं नोदाहरणं । गुणस्यापि कुटधातोरन्यपदार्थभूतधातुसमुदायांतर्गतत्वेन समासविषयत्वांगीकारात् । एवमन्यत्रापि द्रष्टव्यमिति भावः । यदुक्तं । घटादिसन्निकृष्टेन चक्षुरादिनोपजनितं ज्ञानमाश्रयतयाऽऽ

त्मानं व्यवस्थापयतीत्यात्मनश्चाक्षुषज्ञाने भानं तद्दूषयति ॥ किंचात्मेति । ननु चाक्षुषज्ञाने कर्मतया प्रकाश एव रूपस्योपयुक्ततयाऽऽत्मनश्चाश्रयतयैव चाक्षुषज्ञाने प्रकाशांगीकारात् । अरूपित्वेनात्मनश्चाक्षुषज्ञाने भानसामान्याभावसाधनमयुक्तं । तस्य तं प्रत्यप्रयोजकत्वात् । कर्मतया प्रकाशाभावं प्रत्येव प्रयोजकत्वाच्चेत्याशयेन शंकते ॥ कर्मतयेति । प्रकाशमानामिति । प्रकाशमानं वस्तु कर्मतयैव प्रकाशत इति वदंतं प्रति चाक्षुषज्ञाने कर्मतया प्रकाशे रूपोपयोग इत्यत्र कर्मतयेति विशेषणं व्यर्थं । तद्व्यावर्त्यस्य प्रकारांतरेण प्रकाशस्याभावादिति भावः ॥ एतेनेति । प्रकाशमानं कर्मतयैव प्रकाशते न प्रकारांतरमस्तीत्युक्तत्वेनात्मा न चाक्षुषज्ञाने भासते अरूपिद्रव्यत्वात् आकाशवदित्यत्राकाशस्य चाक्षुषज्ञानेऽनवभासे ज्ञानानाश्रयत्वं प्रयोजकं । तथाच तदेव तत्रोपाधिरिति शंकाऽपि निरस्तेत्यर्थः ॥ चक्षुरादाविति । ज्ञानकरणत्वेन चक्षुरादेरपि ज्ञानसंबंधित्वाच्चाक्षुषज्ञाने तस्य प्रकाशप्रसंग इत्यर्थः ॥ तदेवमिति । एवमुक्तरीत्या कर्मकर्तृभावस्य भेदव्याप्तौ नियामकाभावात्कर्मकर्तृभावो भेदव्याप्तौ नेति द्वितीयपक्ष एवावशिष्यत इति भावः । तत्र दूषणमाह ॥ तथाचेति । कर्मकर्तृभावस्य भेदव्याप्तत्वाभावेऽयं सर्वगतो न शारीर आत्मानं परस्मै शंसतीति शंसनक्रियायां सर्वगतस्य कर्मत्वेन शारीरस्य कर्तृत्वेन व्यपदेशादिति सर्वगतशारीरयोर्भेदसाधने कर्तृभावस्य हेतुत्वेनोपपादनं कथमित्यर्थः ॥ तत इति । कर्मकर्तृभावस्य भेदेन सहौत्सर्गिकव्याप्त्यंगीकारात्किं लब्धमिति चेत् । कर्मकर्तृभावस्य भेदव्याप्तत्वांगीकारे मामहं जानामीत्याद्यनुपपत्तिः । तदनंगीकारे कर्मकर्तृभावस्य हेतुत्वेनोपादानमयुक्तमिति दोषद्वयं परिहृतमिति क्रमेणाहेत्यर्थः ॥ ब्रह्महिंसेति । ब्रह्महिंसादेरकर्तव्यत्व इत्यर्थः

॥ तदिति । अपवादविषयमित्यर्थः ॥ न चेति । सर्वभूतहिंसानिषेधस्य यथा प्रमागेन प्राप्तिरस्ति । तथा प्रमेयत्वानित्यत्वव्याप्तेः केनापि प्रमाणेन प्राप्तिर्न चास्तीत्यर्थः । ननु सिद्धांतेऽनुगतसामान्याभावात्कथं सामान्यविषयस्योत्सर्गस्य विशेषविषयेणापवाद इत्युत्सर्गापवादन्याय इत्यत आह ॥ यथा चेति । अनुगतसामान्याभावेऽप्युत्सर्गापवादन्यायो यथा संभवति तथेति व्युत्पत्तिरपि हि सादृश्येनैव गम्यत इत्येतद्व्याख्यानावसरे वक्ष्याम इत्यर्थः । नन्वौत्सर्गिकव्याप्तिमतोऽपवादप्रयुक्तव्यभिचारेण दुष्टत्वात्कथं साधकत्वमित्यत आह ॥ सोपाधिकेति । सोपाधिकसाध्यसंबंधस्य साधनांगत्वाभाववत्कारणविशेषप्रयुक्तव्यभिचारस्य दूषणांगत्वाभाव इति किमत्रालौकिकं । न किंचिदलौकिकमित्यर्थः । ननु कारणविशेषप्रयुक्तव्यभिचारस्य दूषणानंगत्वं कथमित्यत आह ॥ वक्ष्यत इति । उत्सर्गतोऽपि यत्प्राप्तमपवादविवर्जितं । व्यभिचार्यपवादेन मानमेव भविष्यति । अतोऽतिभोजनादीनामिष्टसाधनतानुमानं व्यवहृतौ नित्यं व्यभिचारो हि तत्र चेत्येतद्व्याख्यानावसरे कारणविशेषप्रयुक्तव्यभिचारस्य दूषणानंगत्वमुपपादयिष्यत इत्यर्थः ॥ उपाधिरिति । एतदधिकरणनिर्णेतव्यार्थावच्छेदकोऽधिकरणांतरनिर्णेतव्यार्थव्यावृत्त उपाधिर्वक्तव्य इत्यर्थः ॥ अन्यथेति । एतदधिकरणनिर्णेतव्यार्थावच्छेदकस्याधिकरणांतरनिर्णेतव्यार्थव्यावृत्तस्याभावेऽधिकरणांतरनिर्णेतव्यार्थस्याप्यत्रोपलक्षणीयत्वापातेनाधिकरणांतराभावप्रसंगादित्यर्थः ॥ क्वचिदिति । क्वचिदधिष्ठाने स्थितिवाचिन इत्यर्थः ॥ अत्रेति । अत्ता चराचरग्रहणादित्याधिकरणेन संहाररूपक्रियात्मकं लिंगं चिंत्यते । गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्याधिकरणेन तु कर्मफलभोगरूपाक्रियात्मकं लिंगं

चिंत्यत इति भावः । क्रियारूपलिंगसमन्वयपरयोरत्त्रधिकरणगुहाधिकरणयोर्मध्ये गुहाधिकरणं व्यर्थं । क्रियारूपलिंगसमन्वयस्यात्त्रधिकरणन्यायेनैव सिद्धेरिति शंकते ॥ नन्विति । अत्त्रधिकरणोक्तमत्तृत्वं ब्रह्मणि युक्तं । प्रकृत्यर्थस्य संहर्तृत्वस्य प्रत्ययार्थकत्वस्य च संभवात् । ऋतं पिबंतावित्युक्तं कर्मफलभोक्तृत्वं तु न युक्तं । ब्रह्मणः कर्मबंधरहितत्वेन निर्भेदत्वेन च पिबत्प्रातिपदिकार्थकर्मफलभोगस्य प्रत्ययार्थद्वित्वस्य च तस्मिन्नसंभवादित्यधिकाशंकायाः पूर्वपक्षोत्थानाद्गुहाधिकरणं न व्यर्थमित्याशयेन परिहरति ॥ नेति ॥ अंतर इति । अंतर उपपत्तेरित्यत्रांतःस्थितिरूपभावसहितं रमणरूपं क्रियात्मकं लिंगं प्रतिपाद्यते । अंतर्यामीत्यत्र त्वंतःस्थितिसहितं नियमनरूपक्रियात्मकं लिंगं प्रतिपाद्यत इति भावः । नन्वधिकरणद्वयेऽपि भावसहिताक्रियालिंगसमन्वयस्य प्रतिपाद्यत्वे तस्यैकेनैव सिद्धेरन्यतराधिकरणवैयर्थ्यमित्यत आह ॥ अत्रापीति । अंतराधिकरणांतर्याम्यधिकरणद्वयेऽन्यतराधिकरणस्य वैयर्थ्यं नास्ति । गुहाधिकरणस्येवांतर्याम्यधिकरणस्याधिकाशंकायाः पूर्वपक्षे तन्निरासार्थत्वादिति भावः ॥ अत एवेति । भावसहितक्रियारूपलिंगस्यांतराधिकरणांतर्याम्यधिकरणद्वये प्रतिपाद्यत्वादेव क्रियाप्रतिपादकेनात्राद्याधिकरणद्वयेनांतराद्यधिकरणद्वयप्रतिपादनीयक्रिया प्रतिपादिता । भावप्रतिपादकेन सर्वत्रेत्यधिकरणेनांतराद्यधिकरणद्वयप्रतिपाद्यभावश्च प्रतिपादित इत्यंतराद्यधिकरणद्वयस्य वैयर्थ्यमिति चोद्यं निरस्तं । अत्तृत्वाद्यधिकरणद्वयेन केवलक्रियायाः सर्वत्रेत्यधिकरणेन केवलभावस्य च प्रतिपादितत्वेऽपि भावसहितक्रियारूपलिंगस्य तत्राप्रतिपादितत्वादिति भावः । ननु वैश्वानरश्रुतेरदृश्यत्वाद्यधिकरणापेक्षया परत्वाभावात्कथं श्रुतिलिंगाधिका परेति वैश्वानरश्रुतेः परत्वोक्तिरित्यत आह ॥ परेति । पर-

मधिकरणं प्रतिपादकमस्यास्तीति मत्वर्थीयाच्प्रत्ययांतात्परशब्दादपिकृते निष्पन्नेन परशब्देन परस्मिन्वैश्वानरः साधारणशब्दविशेषादित्यधिकरणे प्रतिपाद्ये इत्यर्थो लभ्यत इति भावः । नाम वैश्वानरनाम । लिंगानि पाचकत्वादीनि ॥ बव्हिति । इंद्रादिबहुनामसमन्वयलाभार्थं इत्यर्थः । ननु वैश्वानरनामसमन्वयलाभार्थं लिंगसमन्वय एव प्रतिपाद्यतां । किं लिंगसमन्वयलाभार्थं नामसमन्वयप्रतिपादनेनेत्यत आह ॥ साक्षादिति । यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते इत्यत्राभिविमानपदेन पूर्वाधिकरणप्रकृतसर्वगतत्वगुणकस्योक्ततया वैश्वानरश्रुतेः साक्षात्प्रकृतसर्वगतनिष्ठत्वात्तदाक्षेपेण संगत्युपपत्तेर्वैश्वानरश्रुतेः समन्वयोपपादनं युज्यत इत्यर्थः ॥ सा चेति । वैश्वानरश्रुतिश्चेत्यर्थः ॥ १—२—१ ॥

॥ ॐ अत्ता चराचरग्रहणात् ॐ ॥ ॥ व्यचीचरदिति । विचारितवानित्यर्थः ॥ अत्रेति । अस्मदाचार्योदाहृतवाक्येऽत्तुमध्रियतेत्यनेन सर्वं वा अत्तीत्यनेनात्ता मुखतः प्रतीयते परोदाहृते यस्य च ब्रह्म क्षत्रं चोभे भवत ओदनो मृत्युर्यस्योपसेचनपदेन चात्तोपलक्षणीयः । अत्ता चराचरग्रहणादिति सूत्रगृहीताद्धात्वनुगतिश्चास्मदाचार्योदाहृतवाक्येऽस्ति । न परोदाहृत इति विशेष इत्यर्थः ॥ न चेति । उपलक्षितेऽनियमो नास्ति । किं त्वंतरंगमेवोपलक्षणीयमिति नियमोऽस्ति । तथा चौदनस्य भोज्यतया तत्पदेन भोज्यत्वप्रतियोगिकभोक्तैवोपलक्षणीयः । न तु संहार्यप्रतियोगिकसंहर्तृरूपोऽत्तेति भावः । यद्वोपलक्षिते न च नियमोऽस्ति । नियामकभावात् । तथा चौदनस्य कार्यतया कार्यप्रतियोगिककर्तैव किं नोपलक्ष्यते । न ह्योदने कार्यत्वसंहार्यत्वयोः सत्त्वेऽपि कार्यत्वप्रतियोगिकसंहर्तृत्वाश्रय एवौदनपदेनोपलक्षणीय इत्यत्र नियामकमस्तीति भावः

॥ श्रुतीति । श्रुतौ सर्वशब्दस्य सत्त्वात्तदनुगमाय सर्वग्रहणादिति कुतो न कृतमित्यर्थः ॥ सतयेति । सतया वाचा तेनात्मनेदं सर्वमसृजत यदिदं किंच ऋग्यजूंषि सामानि छंदांसि यज्ञान् प्रजां पशूनिति पूर्ववाक्यपर्यालोचनयेत्यर्थः । अनेन चराचरग्रहणेन ॥ सोऽपीति । सर्वगतत्वादिव्यवच्छेदोऽप्यनित्यानां क्रियाणां कथं परमेश्वरस्वरूपत्वमिति चोद्यस्य क्रियाविषयेऽवकाशसंभावनार्थं इत्यर्थः ॥ परमेश्वरस्येति । परमेश्वरस्य हि जन्मविनाशराहित्यं जन्मादिसूत्रेऽर्थालब्धं । स्वयमुत्पत्तिविनाशित्वे सकलजगज्जन्मविनाशकारणत्वानुपपत्तेः । ईश्वरस्य जन्मविनाशवत्त्वे हि जनकं विनाशकं च जगदेवेति वाच्यं । एवं च तस्य जगज्जन्मविनाशकारणत्वानुपपत्तिः । यः खलु यस्य जनको न तस्यासौ जनकः । यच्च यस्य विनाशकं न तस्यासौ विनाशक इति व्याप्तेरिति भावः ॥ अनित्यत्वमिति । जन्मविनाशवत्त्वमित्यर्थः ॥ भेदेनेति । पदार्थभेदनियतत्वादित्यर्थः ॥ अन्यथेति । विरुद्धधर्माध्यासस्य (अधिकरणस्य) पदार्थभेदव्याप्तत्वाभावे वियदादिप्रपंचे परस्परं भेदाभावप्रसंगादित्यर्थः ॥ प्रमाणेनेति । अनित्यसाधकप्रमाणबलादित्यर्थः ॥ तदिति । नित्यसाधकप्रमाणादित्यर्थः ॥ क्रियात्वमिति । ईश्वरक्रियाया अनित्यत्वे क्रियात्वमेव लिंगमिति भावः ॥ ज्ञानेनेति । ईश्वरीयज्ञानेच्छाप्रयत्नैर्नित्यपदार्थसत्तया च व्यभिचारात् ज्ञानादीनां जानातीच्छति यतते अस्ति धात्वर्थत्वेन धात्वर्थरूपक्रियात्वस्य तत्र सत्त्वेऽप्यनित्यत्वरूपसाध्यस्यासत्त्वादिति भावः । यद्वा अनुगतसत्ताजातिपक्षे सत्तया व्यभिचार उक्त इति बोध्यं ॥ क्वचिदिति । शक्तिसद्भाव एव तु । क्रियादिनित्यता ज्ञेयेत्येतद्व्याख्यानावसरे शक्तिनित्यत्वे क्रियादिनित्यतेत्यनीश्वरपरिस्पंदानामपि नित्यत्वस्य वक्ष्यमा-

णत्वादित्यर्थः । नन्वीश्वरक्रियायाः कार्यत्वमपि साध्यते तत्पक्षवृत्तित्वात्कथं तस्योपाधित्वमित्यत आह ॥ तस्यापीति । कार्यत्वस्यापि पक्षे साधने बाधः । ईश्वरक्रियाया अकार्यत्वे स्वाभाविकी ज्ञानबलक्रिया चेत्यादिप्रमाणस्य वक्ष्यमाणत्वादित्यर्थः ॥ लिंगमिति । ईश्वरक्रियाया अनित्यत्व इति शेषः ॥ असिद्धेरिति । ईश्वरक्रियाया अयोग्यत्वेन योग्यानुपलंभस्याभावादिति भावः ॥ वर्णेति । वर्णनित्यत्वपक्षे वर्णेषु आवरणाद्यभावे सति कदाचिदेवोपलब्धेः सत्त्वेऽप्यनित्यत्वरूपसाध्याभावादनैकांति-कत्वमिति भावः ॥ आदिग्रहणेति । आवरणाद्यभावे सतीत्यत्रादिशब्देन व्यक्तिरपि गृह्यत इत्यर्थः । तथा चाभिव्यक्त्यभावस्य हेतुविशेषणत्वान्नित्योऽपीश्वरपरिस्पन्दः कदाचिदभिव्यक्तेः कदाचिदेवोपलभ्यत इत्यन्यथासिद्धिशंकानवकाश इति भावः ॥ संदिग्धेति । अभिव्यक्त्यभावस्येदानीं संदिग्धत्वेन संदिग्धविशेषणासिद्धिरिति भावः ॥ नित्यमिति । नित्यफलानुप-लब्धिलिंगं संयोगविभागग्रहणं तु प्रकृते तयोः फलत्वाभिप्रायेणेति द्रष्टव्यं ॥ नित्येति । नित्ये गुणे द्रव्ये च नित्यं फलानु-पलब्धिरूपहेतोः सत्त्वेऽप्यनित्यत्वरूपसाध्याभावाद्व्यभिचार इति भावः ॥ कदाचिदिति । कदाचिदेव संयोगादिजनकत्वं क्रियाया अनित्यत्वे लिंगत्वेन विवक्षितं । अतो न नित्यगुणे व्यभिचार इति भावः ॥ संयोगादीति । तथा च संयोगा-द्यसमवायिकारणत्वस्य गगनादावसत्त्वान्न व्यभिचार इति भावः ॥ विशेषणेति । संयोगाद्यसमवायिकारणत्वमात्रस्यानि-त्यत्वाव्यभिचारात्कदाचिदिति विशेषणस्य वैयर्थ्यमिति भावः ॥ तदिति ॥ कदाचिदिति । विशेषणस्य परित्यागेऽपि समवाये प्रमाणाभावेन समवायस्यैवाभावात्तद्घटितस्य समवायिकारणप्रत्यासन्नत्वादिरूपस्यासमवायिकारणत्वस्य दुर्निरूप्यत्वेनासिद्धिरि-

त्यर्थः ॥ द्वितंतुकेति । द्वौ तंतू अवयवौ यस्यावयविनः स द्वितंतुकस्तस्यावयव इत्यर्थः ॥ कार्येति । द्वितंतुकावयविसंयुक्तौ यः प्रवेशस्ततो विभाग इत्यर्थः ॥ नित्यापीति । क्रियेत्यनुवर्तते । तथाच कदाचित्संयोगाद्यारंभकत्वं नानित्यत्वापादकमिति भावः ॥ सामान्यवत्त्वे सतीति । ईश्वरक्रियाया अनित्यत्वे सामान्यवत्त्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वं हेतुरस्त्वित्यर्थः ॥ विशिष्येति । ईश्वरक्रियाया अतींद्रियत्वेन तत्रास्मदादिबाह्येंद्रियग्राह्यत्वरूपविशेषस्यासिद्धेरित्यर्थः । नन्वस्मदादिबाह्येंद्रि-यग्राह्यशब्देनास्मदादिबाह्येंद्रियग्राह्यजातीयत्वं विवक्षितं । तच्चेश्वरक्रियायामप्यस्तीति नासिद्धिरित्यत आह ॥ बाह्येति ॥ वर्णेति । वर्णनित्यत्वपक्षे वर्णेषु सामान्यवत्त्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वस्य व्यभिचारः स्फुट इत्यर्थः ॥ स इमानिति । स इमान् लोकानसृजतेत्यत्रानद्यतने लङित्यनद्यतनभूतकालार्थविहितलङ् सृष्टिक्रियाया अनित्यत्वं प्रतीयत इति भावः ॥ द्वितीय इति । स इमान् लोकानसृजतेत्यागमस्तु स ऐक्षत सोऽकामयतेत्यादिना तुल्यः । लङुपेतः स ऐक्षत सोऽकामय-तेत्यादिरागमो यद्येवमीश्वरज्ञानादेरनित्यत्वसाधकस्तदा स इमान् लोकानसृजतेत्यागमोऽपि सृष्टिक्रियाया अनित्यत्वसाधक इति भावः ॥ तत्रेति । स इमान् लोकानसृजतेत्यत्र लङ्प्रयोगमहिम्ना सृष्टिक्रियाया यद्यनित्यत्वं तर्हि ज्ञानादेरप्यनित्यत्वं कुतो न भवेत् । भवेदेव । स ऐक्षतेत्यादौ लङ्प्रयोगस्य सत्त्वादिति भावः ॥ नेति पक्ष इति । संयोगविभागसमवायि-कारणत्वस्य क्रियालक्षणत्वेन तदभावे क्रियात्वव्याघात इति भावः ॥ अवशिष्टस्येति । कर्मण इति शेषः ॥ कर्मविना-शकत्वेनेति । कर्मणः फलविनाश्यत्वादिति भावः ॥ न कश्चिदिति । यदि सृष्टिसमयेऽपि संहारक्रिया विद्येत तर्हि तथैव

श्रुत्यादावुपलभ्येत । घटस्य जननविनाशौ च युगपत्प्रसज्येयातामित्यादिरूपः कश्चिदपि दोषो नेत्यर्थः ॥ प्रतीतिरिति । अपरोक्षप्रतीतिरित्यर्थः । अपरोक्षप्रतीतिः शक्तेर्व्यक्तिरिति पक्षेऽपि किमीश्वरापेक्षयाऽपरोक्षप्रतीतिर्विवक्षिता । उतान्यापेक्षयेति विकल्पं मनसि निधायाद्यं निराचष्टे ॥ ईश्वरेति ॥ नित्यसिद्धत्वेनेति । प्रतीतेरिति शेषः । द्वितीयं निराह ॥ परेति । ईश्वरशक्तिगोचरापरोक्षप्रतीतेरन्यापेक्षया कदाऽप्यभावादित्यर्थः । ननु रमादेरीश्वरशक्तिगोचरापरोक्षप्रतीतिसद्भावात्कथं तदभाव इत्यत आह ॥ भावेऽपीति । रमादेरीश्वरशक्तिगोचरापरोक्षप्रतीतिभावेऽपि कार्योत्पादस्य तादृशप्रतीत्यनपेक्षत्वात्तद्रूपा व्यक्तिरप्रयोजिकेति भावः ॥ अत एवेति । ईश्वरापरोक्षयेश्वरशक्तेर्नित्यानावृतत्वेनावरणाभावरूपव्याप्तेर्नित्यासिद्धतयोक्तदोषानुषंगादन्यापेक्षया कदाऽप्यभावात् । भावेऽपि कार्योत्पादस्य तदनपेक्षत्वादित्युक्तदूषणादेवावरणनिवृत्तिर्व्यक्तिरिति पक्षोऽप्ययुक्त इत्यर्थः ॥ व्यक्तिरूपेणेति । संहारशक्तिव्यक्तेश्च सृष्टिसमयेऽसत्वान्न तथा व्यवहारप्रसंग इति भावः ॥ तदपीति । व्याक्तिरूपेणैव क्रियायाः संयोगविभागोत्पत्तिहेतुत्वाद्व्यक्तेश्च सदाऽभावात्संयोगविभागोत्पत्तिसातत्यप्रसक्तिर्नेति भावः (सततमेव सातत्यं निरंतरमेव गमनागमने स्वार्थे ष्यङ्) ॥ सममिति । ईश्वरक्रियाया नित्यत्वे संयोगविभागोत्पत्तिसातत्यं प्रसंजयता किं तयोरेव संयोगविभागयोः पुनरुत्पत्तिरापाद्यते । उतान्ययोः । नाद्यः । तत्संयोगविभागोत्पत्त्या तत्सामग्रीनिविष्टस्य तत्प्रागभावस्य नष्टत्वेन सामग्र्या विकलत्वात् । न द्वितीयः । पूर्वसंयोगविभागाभ्यां प्रतिबद्धत्वादिति समाधानं प्रकृतेऽपि सममित्यर्थः ॥ विरम्य वेति । संयोगविभागौ कुर्वतां नेश्वरक्रियाविरम्यवंतौ करोतीत्यर्थः ॥ न चेति । पूर्वोत्तरावस्थयोरवशिष्टस्येश्वर- ॥७॥

कर्मणो विरम्य व्यापारानुपपत्तिरिति न चेत्यर्थः ॥ व्यक्तयेति । तथाच पूर्वोत्तरावस्थयोरविशिष्टत्वमसिद्धमिति भावः ॥ अन्यथेति । कर्मणो विरम्य व्यापारानुपपत्तौ द्वितंतुकावयवे तंतावुत्पन्ना क्रियाऽपि स्वोत्पत्त्युत्तरक्षण एवोत्तरदेशसंयोगं कुर्यान्न तु तंत्वंतरविभागं द्वितंतुकावयव्यारंभकसंयोगनाशद्वितंतुकावयविनाशतत्संयुक्तप्रवेशविभागानंतरमित्यर्थः ॥ न चेदिति । संहारकाले सृष्टिक्रियाशब्दवाच्या सृष्ट्यनुकूला शक्तिर्व्यक्ता चेत्सृष्ट्यनुकूलसंहारानुकूलशक्त्योरेकत्वात्संहारशक्तेरव्यक्तत्वमागतमिति कथं संहारादिव्यवहारः संहारशक्तिसाध्यार्थक्रिया वा न कथंचिदित्यर्थः ॥ आद्य इति । संहारकाले सृष्टिक्रियाशब्दितसृष्ट्यनुकूलशक्तिर्व्यक्तेत्याद्यपक्षे संहारकाले सृष्टिव्यवहाराद्यभावः कथं संहारकालेऽपि सृष्टिव्यवहारः सृष्ट्यनुकूलशक्तिसाध्यार्थक्रिया च स्यादित्यर्थः ॥ व्यक्तिरपीति । तथाच यादृशव्यक्तिविशेषे सति सृष्टिव्यवहारादिकं भवति तादृशव्यक्तिविशेषस्य संहारकालेऽभावान्न तत्काले सृष्टिव्यवहारादिप्रसक्तिः । नापि संहाराद्यभावप्रसंगस्तदनुकूलव्यक्तिविशेषस्य सत्त्वादिति भावः । यद्वा संहारकाले सृष्टिक्रियाशब्दितसृष्ट्यनुकूलशक्तिर्व्यक्ता न चेत्तदा कालोत्पत्त्यभावात्संहारकाल इति व्यवहारः सृष्टिक्रियाशब्दितशक्तिव्यक्तिसाध्यकालोत्पत्तिरूपार्थक्रिया वा कथं स्यात् । न कथंचित् । संहारकाले सृष्टिक्रियाशब्दितसृष्ट्यनुकूलशक्तिर्व्यक्तेत्याद्यपक्षे संहारकाले महदादिसृष्टिव्यवहाराद्यभावः कथं । तदा सृष्टिक्रियाया व्यक्तत्वेन महदादिसृष्टिव्यवहारादिकं स्यादिति शंकाग्रंथाभिप्रायः । परिहाराभिप्रायस्तु संहारकाले कालोत्पत्त्यनुकूलसृष्टिक्रियाया व्यक्तिविशेषस्य सत्त्वेऽपि महादाद्युत्पत्त्यनुकूलसृष्टिक्रियाव्यक्तिविशेषस्यासत्त्वादिति तदिदमिति व्यक्तिरूपविशेषेऽपि सविशेषः । अवांत-

रानंतविशेषसहित इत्यर्थप्रतिपादकेन सविशेषोऽपीत्यनेन तदिदं व्यक्तेरप्यवांतरानंतविशेषवत्त्वमुक्तमित्यर्थः ॥ सहकारिणा-मिति । कालादीनां केषांचित्सहकारिणां नित्यत्वादनित्यानां च परमाणुकर्मादीनामीश्वरेच्छाद्यायत्तत्वादीश्वरेच्छादौ सति तद्भावस्यावश्यकत्वात्सदा सहकारिसद्भावादीश्वरेच्छादिकं सदा संहारकार्यकारि स्यादित्यर्थः ॥ तदेवेति । नित्येच्छादिकमे-वेत्यर्थः ॥ तत एवेति । नित्येच्छादिव्यतिरिक्तसंजिहीर्षादित एव संहारादिसिद्धौ नित्येच्छादिकल्पनावैयर्थ्यादित्यर्थः ॥ नित्यानित्येति । ईश्वरसंजिहीर्षादेर्नित्यत्वे नित्यसंहारादिप्रसंगः । अनित्यत्वे तु तस्य कारणांतरायोगान्नित्येच्छादिकमेव कारणं वाच्यं । तथा च तस्य सदा सत्त्वेन संजिहीर्षादिसातत्यापत्त्या संहारादिसातत्यप्रसंग इत्यनुपपत्तिरिति भावः ॥ सति संहारादाविति । संहारादौ सति संहारादिरूपविशेषणविशिष्टनित्येच्छाद्यात्मकसंजिहीर्षादिकं सति च तस्मिन्संहारादिकमिति परस्पराश्रयप्रसंगादित्यर्थः । ननु स्वरूपसत्संहारादिविशिष्टमिच्छादिकं संजिहीर्षादिरूपमिति न वच्मः । येन परस्पराश्रयः स्यात् । किंतु संहारादिविषयकमतो न परस्पराश्रयप्रसंग इति शंकते ॥ नेति ॥ अयमिति । क्रियानित्यत्वप्रतिपादनप्रयत्न इत्यर्थः ॥ परममहदिति । यद्यप्यान्महतः समानाधिकरणजातीययोरित्यात्वे परममहापरिमाणमिति निर्देष्टव्यं । तथाऽपि सतः कारिणः कार्येण भाव्यमिति न्यायेन महत आदिति प्रयोक्तव्ये आन्महत इति यत् स्थान्यादेशोक्तिव्यत्ययं करोति पाणिनिस्तेन ज्ञाप्यते आत्वविधिरनित्य इत्यतः परममहत्परिमाणमिति निर्देश उपपन्न इति वा परममहच्छब्दो भावप्रधानः परिमाणनिष्ठपरममहत्त्वरूपधर्मवाची । तथा च परममहत्त्वयुक्तं परिमाणं परममहत्परिमाणमिति शाकपार्थिवादित्वेनोत्त-

रपदलोपीसमासाश्रयेण त्वप्रसक्तेरभावादयं निर्देश उपपन्न इति वा समाधानमत्र द्रष्टव्यं ॥ अण्विति । अणुमध्यमपरि-माणाभ्यामीश्वरे परिस्पंदवत्त्वस्य सुसाधकत्वेन परममहत्परिमाणेनेश्वरस्य परिस्पंदाभावसाधनं सत्प्रतिपक्षमिति भावः ॥ न चेति । तेऽणुमध्यमपरिमाणे ईश्वरस्य न स्तः । तथा चासिद्धत्वान्न ताभ्यां सत्प्रतिपक्षत्वमिति न चेत्यर्थः ॥ परममहत्त्व इति । ईश्वरस्य परममहत्त्वमिति नेति वक्तुं शक्यत्वात् । तेन परिस्पंदाभावसाधनं युक्तमिति भावः । ॥अणोरणीयानिति । तथाऽणुपरिमाणेनासिद्धिशंका संभवतीति भावः ॥ अप्रत्यक्षत्वोपलक्षणीयमिति । तथा चाणोरणीयानिति श्रुत्या नेश्वर-स्याणुपरिमाणसिद्धिरिति भावः ॥ परमपूज्यत्वमिति । तथा चेश्वरस्य परिस्पंदाभावसाधकपरममहत्परिमाणस्याप्यासिद्धि-रिति भावः ॥ तर्हीति । विरोधादणुत्वमहत्त्वयोरंगीकारस्यानुचितत्वेऽणोरणीयान्महतो महीयानिति श्रुतावणुत्वस्य प्रथमप्राप्तत्वात्तदेव ग्राह्यमित्यर्थः ॥ परिहरिष्यत इति । अणुत्वमहत्त्वविरोधस्य परिहरिष्यमाणत्वादीश्वरे उभयांगीकार एवोचित इति भावः ॥ अन्यत्रापीति । घटादिक्रियायामित्यर्थः ॥ सतीति । क्रियानित्यत्वग्राहिके निर्बाधे प्रमाणे सति नित्यत्वविपरीतव्यवहारेषु च सत्सु तदन्यथाऽनुपपत्त्या एषा कल्पना शक्तिव्यक्तिकल्पना प्रभवति । न च घटादिक्रियाया नित्यत्वे निर्बाधं प्रमाणमस्तीत्याहेत्यर्थः ॥ एतेनेति । क्रियादिश्च स्वभाव इति ॥ श्रुतिरिति । ईश्वरक्रियानित्यत्वसाधक-श्रुत्युपन्यासेन तत्साधकप्रमाणाभावादीश्वरक्रियाणामनित्यत्वमिति तृतीपक्षोऽपि परास्त इत्यर्थः । ननु क्रियादिश्च स्वभाव इति श्रुत्याकारस्याभावात्कथं क्रियादिश्च स्वभाव इति हि श्रुतिरित्याचार्यैरुक्तमित्याशंकायामाह ॥ पराऽस्येति । नन्वस्यां

श्रुतावीश्वरक्रियायाः स्वाभाविकत्वमेवोच्यते न तु नित्यत्वमतः कथमीश्वरक्रियानित्यत्वे इयं श्रुतिः प्रमाणीक्रियते इत्यत आह ॥ स्वाभाविकीति । स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतौ स्वाभाविकीत्यनेनेश्वरक्रियाया यावद्द्रव्यभावित्वोक्त्या नित्यत्वप्रतीतेरियं श्रुतिरीश्वरक्रियानित्यत्वे प्रमाणं भवतीति भावः ॥ अत्रेति । ज्ञानं नित्यं क्रिया नित्येति श्रुतौ क्रियानित्यत्वस्य कंठरवेणोक्तत्वादियं श्रुतिरीश्वरक्रियानित्यत्वे स्पष्टप्रमाणमिति भावः ॥ पूर्वेति । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति पूर्वश्रुत्येश्वरशक्तेर्विविधत्वमुक्त्वा कथं विविधत्वमित्याकांक्षायां ज्ञानबलक्रिया चेति ज्ञानबलक्रियारूपत्वस्य प्रतिपादितत्वाच्छक्तिरेव क्रियेत्यत्र पूर्वश्रुतिः प्रमाणमिति भावः ॥ यद्वेति ॥ पराऽस्य शक्तिरिति । पूर्वश्रुतिक्रियाया ईश्वरस्वरूपत्वे प्रमाणत्वेन पठिताक्रियाया ईश्वरस्वरूपत्वस्य विवादास्पदत्वाज्ज्ञानं नित्यं क्रिया नित्येति द्वितीयश्रुतिस्तु क्रियाया ईश्वरस्वरूपत्वहेतौ नित्यत्वे पठितेत्यर्थः । अस्मिन्पक्षे स्वाभाविकीत्यत्र परमिति न चास्य शक्तिरिति स्वरूपसंबंधितया प्रतीतेः स्वरूपस्य च स्वरूपसंबंधित्वायोगादित्यर्थः । ॥ मतुप इति । स्फोटादिकार्यं प्रति शक्तिमानिति मतुपो वैयर्थ्यप्रसंगादित्यर्थः ॥ तदभावस्येति । स्फोटादिकार्यं प्रति शक्तिमानपि दहनो देहसंयोगादिसहकारिविरहान्न तदजीजनदितीत्थं व्यवहारोऽस्तीति सहकारिसमवधानाभावस्योक्तत्वादित्यर्थः ॥ आद्य इति । दहनत्वसामान्यस्य प्रत्यक्षत्वे शक्तिरूपस्य तस्य व्यक्तियोग्यतांतर्भूतयोग्यताकत्वेन दहनदर्शनेनैव निश्चितत्वाद्दहनदर्शनानंतरं दहने स्फोटजननशक्तिजिज्ञासा न स्यात् । निश्चिते जिज्ञासाया अदर्शनादित्यर्थः ॥ अपसिद्धांतेति । सामान्यस्य प्रत्यक्षत्वांगीकारादिति भावः ॥ तथेति । सामान्यस्य प्रत्यक्षत्वाभ्युपगमे वेत्यर्थः ।

॥ कारणस्येति । कारणत्वं सहकारिसमवधानरूपं नेत्यत्रायं हेतुः प्रत्यक्षेणेति । गच्छति द्रव्ये पूर्वदेशविभागोत्तरदेशसंयोगातिरिक्तस्य विशेषस्य प्रत्यक्षेणानुपलब्धेरित्यर्थः ॥ परमाणुकर्मण इति । तथाच दृष्टांतस्य साध्यवैकल्यमिति भावः । ॥ तदर्थमिति । दृष्टांतसाध्यवैकल्यपरिहारार्थं विवादपदं कर्म । अस्मदाद्यप्रत्यक्षमिति विशेषणोपादानेऽस्मदादीतिविशेषणस्य वैयर्थ्यं । तद्व्यावर्त्यस्य योग्यादेः परेणानंगीकृतत्वादित्यर्थः ॥ विवादपदमिति । विवादपदं घटादिरूपं अप्रत्यक्षं रूपत्वात् परमाणुरूपवदिति किं न स्यादित्यर्थः ॥ प्रतीतीति । घटादिरूपस्य प्रत्यक्षत्वप्रतीतिविरोधान्नेदमनुमानं संभवतीत्यर्थः ॥ सममिति । प्रत्यक्षद्रव्यवर्ति कर्मणः प्रत्यक्षत्वानुभवविरोधाद्विवादपदं कर्माप्रत्यक्षं कर्मत्वादित्यनुमानमपि न संभवतीति सममित्यर्थः ॥ आश्रयेति । तथा चाप्रत्यक्षत्वप्रयोजकस्याश्रयामहत्त्वस्य घटादिरूपेऽभावादप्रत्यक्षत्वं ततो व्यावर्तत इति भावः ॥ परमाणोरिति । परमाणोरपि स्वांशापेक्षया महत्त्वस्य वक्ष्यमाणत्वेनाश्रयामहत्त्वस्य परमाणुरूपेऽभावान्न तदप्रत्यक्षत्वप्रयोजकमिति भावः ॥ किंचेति । परमाणुकर्माप्रत्यक्षत्वेऽप्याश्रयमहत्त्वमेव प्रयोजकं किं न कल्प्यं । तदेव प्रयोजकं कल्पनीयं । तथा चाश्रयामहत्त्वस्य प्रत्यक्षद्रव्यवर्ति कर्मण्यभावात्प्रयोज्यमप्रत्यक्षत्वं ततो व्यावर्तत इति भावः ॥ संयोगविभागयोरिति । यदि संयोगविभागौ प्रत्यक्षं तर्ह्येकस्यासंयोगव्यक्तौ विभागव्यक्तौ चोत्पन्नायां संयोगविभागप्रत्ययः स्यात् । न तथा प्रत्ययोऽस्तीति तयोरप्रत्यक्षत्वं स्यात् । ताभ्यां कर्मानुमानमपि न स्यादित्यर्थः ॥ सेनेति । अनेकेषु करितुरगादिषु यथा सेनेति प्रत्यक्षं यथा वाऽनेकेषु वृक्षेषु वनमिति प्रत्यक्षं । न त्वेकस्मिंस्तथाऽनेकेषु संयोगेषु विभागेषु चेदं युक्तमिदं विभक्तमिति

संयोगविभागप्रत्यक्षमुपपद्यत इत्यर्थः ॥ न द्वितीय इति । क्रियाया अप्रत्यक्षत्वस्य प्रमाणसिद्धत्वाभावेऽपि क्रियाप्रतीतेरनु-
मितत्वमिंद्रियव्यापारस्यान्यत्रोपक्षीणत्वं च कल्प्यत इति द्वितीयपक्षो न संभवति । तथात्वे तंतवो न प्रत्यक्षाः किंतु पटलक्षणका-
र्यानुमेयाः । पटग्रहण एव चेंद्रियव्यापारोपयोग इति कल्पनाप्रसंगादित्यर्थः ॥ संयोगविभागद्वयमिति । श्येनप्रतियोगि-
कःसंयोगः स्थाणौ स्थाणुप्रतियोगिकःसंयोगः श्येने तथा श्येनप्रतियोगिकविभागःस्थाणौ स्थाणुप्रतियोगिकविभागः श्येन इत्येवं
संयोगविभागद्वयमस्मन्मते द्व्याश्रयमित्यर्थः ॥ अकार्येति । अकार्येण रसादिनाऽकारणस्य रूपादेर्यदनुमानं तदुच्छेदप्रसंगादित्यर्थः
॥ प्रमाणेति । संयोगविभागलक्षणकार्यरूपप्रमाणासिद्धे स्थाणुकर्मणि कल्पनागौरवदोषादित्यर्थः ॥ एवं सतीति । प्रमाण-
सिद्धेऽर्थे कल्पनागौरवदोषाभाव इत्यर्थः ॥ तत इति । कार्यत्वरूपप्रमाणस्य कर्त्रनेकत्वे उदासीनत्वेन तस्याप्रामाणिकतया
कर्त्रनेकत्वशंकायां कल्पनागौरवपराहतायां कार्यत्वरूपप्रमाणं कर्त्रैकत्वे पर्यवस्यतीत्यर्थः ॥ अन्यथाऽपीति । श्येनकर्मणापि
श्येनस्थाणुसंयोगादेरुपपत्तेर्न स्थाणौ कर्मानुमानमित्यर्थः ॥ न चेन्नि । अन्यथाऽप्युपपत्तिरूपोऽयं दोषोऽर्थापत्तेरेव नानुमान-
स्येति न वाच्यं । अन्यथाऽप्युपपत्तिशंकायां व्याप्तिसंदेहापत्त्याऽनुमानेऽप्यन्यथोपपत्तेर्दोषत्वादित्यर्थः । ननु पटोत्पत्तावपि
तंतुसंयोगविनाशाभावेन कार्यमात्रजननस्य कारणविनाशव्याप्तत्वाभावेऽपि संयोगरूपकार्यजननस्य कर्मरूपकारणविनाशव्याप्त-
त्वात्तेन तदनुमानं संभवतीत्यत आह ॥ नापीति । तंतुसंयोगजननानंतरमपि कर्मावस्थाने संयोगादिकारणस्य कर्मणः
सत्त्वेन तदा संयोगाद्युदयापत्त्या संयोगजनने सति कर्मविनाशावश्यंभावस्य निश्चिततया संयोगजननं कर्मविनाशाविनाभूतत्वेन

निश्चितमेवेत्याशयेन शंकते ॥ कर्मावस्थान इति । ननु यावत्कारणं वर्तते तावत्कार्यांतरजननमिति सामान्यनियमस्य
यावत्तंतुसद्भावं पटपरंपरोत्पादाभावेनाभावेऽपि यावत्कर्मसद्भावं संयोगोत्पाद इति विशेषनियमस्य सत्वात्संयोगजननानंतरमपि
कर्मावस्थानं सदा संयोगाद्युदयापादनं संभवतीत्यत आह ॥ यावत्कर्मसद्भावमिति ॥ वियतीति । आकाशे वितते
योऽयमालोकावयवी तन्निष्ठौ यौ विहगविभागसंयोगौ तयोः प्रत्यक्षत्वात्तद्रूपलिंगनिबंधनः पतति पतत्रीति प्रत्यय इत्यर्थः
॥ दीपिकेति । आकाशे दीपिकालोके गच्छति सति दीपिकालोके गच्छतीति या प्रतीतिस्तस्या गत्यनुमापकयोर्व्योमसंयोग-
विभागयोरप्रत्यक्षत्वात्तत्प्रत्यक्षयोश्च द्रव्यांतरसंयोगविभागेनाशक्यसमाधानत्वादित्यर्थः ॥ शरीरेति । शरीरस्य प्रयत्नवदा-
त्मनश्च संयोग इत्यर्थः । ननु तंतूनां परस्परं संयोगस्य क्रियाजनकत्वाभावेन संयोगमात्रस्य क्रियाहेतुत्वाभावेऽपि संयोगविशेषस्य
क्रियाहेतुत्वं स्यादेवेत्याशंकते ॥ संयोगमात्रस्येति ॥ तथैवेति । संयोगमात्रस्य क्रियाहेतुत्वाभावेऽपि संयोगविशेषस्य
क्रियाहेतुत्वमिव संयोगमात्रस्य स्वाश्रयतत्समवेताभ्यामन्यत्र कार्यारंभकत्वाभावेऽपि संयोगविशेषस्य स्वाश्रयतत्समवेताभ्यामन्यत्र
कार्यारंभकत्वमपि कुतो न स्यादित्यर्थः ॥ तस्येति । तथाविधकार्यगम्यस्य स्वाश्रयतत्समवेतान्यगतसंयोगादिलक्षणकार्य-
गम्यस्य तस्य कर्मणस्तथैव स्वाश्रयतत्समवेतान्यनिष्ठसंयोगादिजनकत्वेनैव प्रमितत्वात्कर्मणः स्वाश्रयतत्समवेतान्यगतसंयो-
गादिजनकत्वमुपपद्यत इत्यर्थः ॥ कर्मेति । कर्मकारणस्य संयोगविशेषादेरवांतरभेदमाश्रित्यायं स्वाश्रयतत्समवेताभ्यामन्यत्र
कार्यारंभकत्वस्वभावः कल्प्यतां । संयोगविशेषादेः प्रमितत्वेन तत्र स्वभावभूतधर्ममात्रकल्पनस्य लघुत्वात्कर्म कल्पयित्वा
तत्र तादृशस्वभावकल्पने धर्मिकल्पनाया गौरवापत्तेरिति भावः ॥ १—२—२ ॥

॥ ॐ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॐ ॥ परमात्मानामिति । ऋतं पिबंताविति वाक्यमेकं परमात्मानमेव प्रतिपादयति । गुहां प्रविष्टाविति गुहानिहितत्वलिंगाद्यः सेतुरीजानानामक्षरं ब्रह्म तत्पदमिति ब्रह्मशब्देन विशेषणाच्चेति सिद्धांतितमित्यर्थः ॥ द्विवचनस्येति । द्व्येकयोर्द्विवचनैकवचनमिति द्विवचनस्य द्वित्वसंख्याभिधायित्वस्यैवानुशिष्टत्वेन भेदाभिधायित्वेऽनुशासनाभाव इति भावः ॥ अभेदेति । स्वाभेदवत्येकत्ववति च घटे द्रव्यांतरसहिते द्वित्वस्य दर्शनान्ना-भेदैकत्वाभ्यां द्वित्वस्य विरोध इति भावः ॥ प्रकारांतरेणेति । ब्रह्मशब्देन विशेषणाच्चेत्येतदपेक्षया प्रकारांतरेणेत्यर्थः ॥ भावाभावलक्षण इति । परस्परविरहात्मकत्वलक्षण इत्यर्थः ॥ सहावस्थानेति । एकाधिकरणयोरेव तमःप्रकाशयोर्वध्यघातकभावस्य दृष्टत्वेन द्वित्वस्याभेदैकत्वाभ्यां वध्यघातकभावलक्षणविरोधांगीकारे सहावस्थानप्रसंगादित्यर्थः ॥ तादात्म्याभाव इति । द्वित्वस्याभेदैकत्वाभ्यां तादात्म्याभावलक्षणविरोधस्त्वभिन्नस्यैकस्य ब्रह्मणो द्वित्वं न युज्यत इति प्रकृतप्रमेये नोपयुज्यत इत्यर्थः ॥ अत इति । द्वित्वस्यैकत्वाभेदाभ्यां प्रकारांतरेण विरोधस्यानुप-पन्नत्वात्सहानवस्थानलक्षणविरोध एव वक्तव्यः । तस्य च विरोधस्य नियमेन परस्परपरिहारेणोपलंभो बीजं । न चासौ नियमेन परस्परपरिहारेणोपलंभः प्रकृतेऽस्तीत्यर्थः । प्रकृते परस्परपरिहारेणोपलंभाभावमेवोपपादयति ॥ ऋतमिति । एकवचनेन विशेषणादित्यस्य पर्यवसितमर्थमाह ॥ अभेदेति । यः सेतुरित्येकवचनेनैकत्वं मुखतोऽवगम्यते । अभेदस्त्वर्थादिति द्रष्टव्यं ॥ न चेति । यः सेतुरित्यत्र ऋतं पिबंताविति द्विवचनविषयतया प्रकृतयोर्द्वित्वाधारयोर्मध्ये एकस्यैव ग्रहणं । तथा च

ऋतं पिबंताविति द्विवचनविषयतया प्रकृतयोर्द्वित्वाधारयोर्यः सेतुरित्येकवचनेन विशेषणमसिद्धमिति । न च ऋतं पिबंताविति द्वयोः प्रकृतयोरेकस्यैव ग्रहणमिति विनिगमकाभावादित्यर्थः ॥ व्यावर्तकाभावादिति । द्वितीयव्यावर्तकस्यैकमात्रनिष्ठस्यासाधारणधर्मस्यात्राश्रवणादिति भावः ॥ जह्यादिति । सूत्रकार इति शेषः ॥ अयमिति । प्रक्रमत्याग इत्यर्थः ॥ तदिति । प्रक्रमत्यागनिमित्तस्य बाधकस्यानिरूपणादित्यर्थः । ननु परमात्मन एव समन्वयप्रतिज्ञारूपो यः प्रक्रमस्तत्त्यागे ऋतं पिबंताविति द्विवचनमेव निमित्तरूपं बाधकमिति शंकते ॥ द्विवचनमिति ॥ तर्हीति । द्विवचनस्य बाधकत्वे ऋतं पिबंताविति वाक्यप्रतिपाद्यौ जीवेश्वरावित्यंगीकारोऽपि न स्यात् । तयोरैक्यांगीकारेण द्विवचनप्रतिपाद्यद्वित्वस्य तत्रायोगादिति भावः ॥ काल्पनिक इति । तथा च काल्पनिकभेदाधीनस्य कल्पितद्वित्वस्य जीवेश्वरयोः सत्त्वात् ऋतं पिबंताविति वाक्यप्रतिपाद्यत्वं तयोः संभवतीति भावः । नन्वीशस्यैवाचिंत्याद्भुतशक्त्यैश्वर्यवशेन द्विरूपतया द्वित्वस्यैवांगीकारे को विशेष इत्यत आह ॥ तथा चेति । उक्तरीत्या द्विरूपत्वेनेश्वरस्य द्वित्वांगीकारेण ऋतं पिबंताविति वाक्यस्य तत्रैव समन्वयाभ्युपगमे गुहां प्रविष्टाविति सूत्रं प्रक्रमानुगुणं स्यात् । द्विरूपप्रयुक्तद्वित्वस्य वास्तवत्वेन तत्प्रतिपादकं शास्त्रं तत्त्वावेदकं स्यात् । परपक्षे तु काल्पनिकभेदाधीनजीवेश्वरद्वित्वस्यावास्तवत्वात्तत्प्रतिपादकं शास्त्रमतत्त्वावेदकं स्यादिति भावः ॥ अन्यथेति । द्व्येकयोर्द्विवचनैकवचन इत्यत्र द्व्येकशब्दयोर्धर्मिप्रधानत्वे द्वयोरेकस्य च त्रित्वेन बहुत्वाद्बहुषु बहुवचनमिति द्व्येकेष्विति स्यादित्यर्थः । नन्वेकत्वादिसंख्याया एव प्रत्ययार्थत्वे कथमेकवचनमित्यादिव्यवहार इत्यत आह ॥ अन्यत्रापीति ॥ १—२—३ ॥

॥ ॐ अंतर उपपत्तेः ॐ ॥ अत्रेति । अंतर्याम्यंतरश्चेति क्रियाभावाख्यमुच्यत इति क्रियाभावरूपलिंगसमन्वयोऽतर इत्यधिकरणे चिंत्यत इत्युक्तं । तदयुक्तं । अंतर इति सूत्रे चक्षुरवस्थितिरूपभावस्यैव प्रतिज्ञानात् क्रियाया अनुक्तेरित्यतोंऽतरशब्दं क्रियाभावार्थतया व्याख्यातीत्यर्थः ॥ अमंताडिति । काशिकायां अमठगणनमिति सूत्रव्याख्यानावसरे अमंताड्ड इति डकारेणापि ग्रहणमस्य दृश्यत इत्युक्तेः । पदमंजर्यां च यद्येवं तर्हि तस्य ग्रहणं भवति त्रिभिरिति पूर्वोक्तं कथमित्याशंकाशयः । अष्टाध्यायीगतग्रहणाभिप्रायं तदिति परिहृतत्वाच्च । मकारानुबंधस्य अकारेणापि ग्रहणमस्तीति द्रष्टव्यं । नन्वंतःशब्दोपपदाद्रमतेः अमंताड्ड इति डप्रत्यये टिलोपे अंतर इति स्थिते रोरीति रेफलोपे ढ्रलोपे पूर्वस्य दीर्घोण इति दीर्घे चांतार इति भाव्यं । तत्कथमंतर इत्येतदित्यत आह ॥ उणादय इति । अत्र उणादयो बहुलमिति बहुलग्रहणादत्रोपपदलोपे सूचिते स चालोंत्यस्येति अंतस्य रेफस्यैव भवतीति भावः ॥ अन्यथेति । अंतःस्थितिरूपभावस्यैव सूत्रकृदभिप्रेतत्वे अंतस्तद्धर्मोपदेशादितिवदंत उपपत्तेरित्येवावक्ष्यत् । न त्वंतर उपपत्तेरिति भावः । नन्वस्मिन्नधिकरणे य एषोंऽतरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचेत्युदाहरणवाक्यमत्र चाक्षिस्थ एव प्रतीयते न तु तस्य रमणकर्तृत्वं । अतः कथं श्रुत्यनुक्तं सूत्रे प्रतिज्ञातुं शक्यमित्याशंकामुत्थापयति ॥ नन्विति ॥ एष इति । एष आत्मेत्यत्रत्यात्मशब्देनेत्यर्थः ॥ आङ् पूर्वकादिति । आङ् पूर्वकाद्दधातोरुणादयो बहुलमिति बहुलग्रहणात्कृत्यार्थे क्विपि अल्लोपे दकारस्य तत्वे च आत इति शब्दो निष्पन्नः । तस्मिंश्चोपपदे मन्यतेः कर्तरि

क्विपि आत्मशब्दो निष्पन्न इति भावः । एवं चादेयं मातीति भाष्यकारीयं निर्वचनं मन्यते इत्यस्य मातीत्यनेनैकार्थ्यमभिप्रेत्येति द्रष्टव्यं ॥ ॐ सुखविशिष्टाभिधानादेव च ॐ ॥ ननु सुखेन विशिष्टः सुखविशिष्ट इति विशिष्टपदस्य सुखसंबंधाभिधानार्थत्वान्न वैयर्थ्यमिति शंकते ॥ सुखसंबंधेति । सुखित्वाभिधानादित्यल्पाक्षरप्रयोगेऽपि सुखसंबंधलाभाद्व्यर्थं विशिष्टपदमित्याशयेन परिहरति ॥ नेति ॥ कथमिति । सुखेन विशिष्ट इति तृतीयासमासे तृतीयातत्कृतार्थेन गुणवचनेनेत्यत्र तृतीयांतस्य प्रथमानिर्दिष्टत्वेन प्रथमानिर्दिष्टं समास उपसर्जनमित्युपसर्जनसंज्ञायामुपसर्जनं पूर्वमिति पूर्वनिपातावश्यंभावेन सुखविशिष्टेति वक्तव्ये कथं सुखेत्युक्तमित्यर्थः । सुखविशिष्टाभिधानादित्यत्र विशिष्टं च तत्सुखं चेति कर्मधारय एव विवक्षितः । न चैवं विशेषणं विशेष्येण बहुलमिति समासविधायकशास्त्रे विशेषणस्य प्रथमानिर्दिष्टत्वे प्रथमानिर्दिष्टं समास उपसर्जनमित्युपसर्जनत्वात् उपसर्जनं पूर्वमिति तस्य पूर्वनिपातेन भाव्यमिति वाच्यं । कडाराः कर्मधारय इति कडारादिशब्दानां कर्मधारये वैकल्पिकपरनिपातस्य विहितत्वेन विशिष्टशब्दस्यापि कडारादितया सुखविशिष्टेत्युक्तिसंभवादित्याशयेन पक्षांतरमाह ॥ अथवेति ॥ कथमिति । कं ब्रह्मेति श्रुतौ विशिष्टसुखरूपत्वस्यैवोक्तेस्तद्वत्त्वस्य चानुक्तेर्विशिष्टसुखवत्त्वादिति भाष्ये मतुपः प्रयोगः कथमित्यर्थः । स्वरूपभूतेनापि सुखेन भेदप्रतिनिधिविशेषबलात्परमात्मा तद्वानिति ज्ञापयितुं श्रुतावनुक्तस्यापि मतुपः प्रयोग इत्याशयेन परिहरति ॥ स्वरूपेणेति ॥ हेतुरिति । विशिष्टसुखाभिधानलक्षणहेतुरित्यर्थः ॥ मुख्येति । मुख्यामुख्ययोर्मुख्यस्यैव ग्राह्यतया कं ब्रह्मेति श्रुतौ कशब्देन मुख्यस्य पूर्णसुखस्योक्तेः सुखविशेषणस्य पूर्णत्वापरपर्यायविशिष्टत्वस्यानुक्तिर-

सिद्धेति भावः ॥ सन्निहितेति। कशब्दसन्निहितसुखपरित्यागे कारणाभावादित्यर्थः ॥ ॐ अनवस्थितेरसंभवाच्च नेतरः ॐ ॥ ईशनियमे सत्यनवस्थित्यभावमुपपादयति ॥ प्रेरकपरंपरेति। ईशनियमे सत्यन्योन्यनियम्यनियामकसंभवाभावमुपपादयति ॥ तं नियत्येति। मानुषादीनां ब्रह्मादीनां च जीवत्वाविशेषेऽपीशनियत्याऽन्योन्यनियम्यनियामकभावो भविष्यतीति न तस्यासंभव इति भावः ॥ यद्वक्ष्यतीति। न चाधिकारिकमपि पतनानुमानात्तदयोगादित्यत्र ब्रह्मादीनामैश्वर्यमयोग्यत्वादितरैर्नाकांक्ष्यमिति यद्वक्ष्यति तस्माद्ब्रह्मादीनां नियामकत्वं मानुषादीनां नियम्यत्वमित्येष विशेषः स्वभाव एवेत्यर्थः ॥ मोक्षेऽपीति। मानुषादीनां ब्रह्मादीनां चान्योन्यनियम्यनियामकस्येति शेषः ॥ आधिकारिकेति। प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेरित्यत्र ता यो वेद स वेद ब्रह्म सर्वेऽस्मै देवा बलिमावहंतीत्यनेनाधिकारिकमंडलाधिपतेर्मुक्तस्य ब्रह्मणो देवपूज्यत्वमुच्यते इत्युक्तेर्मोक्षेऽप्यन्योन्यनियम्यनियामकभावस्यानुवृत्तिर्ज्ञायत इति भावः ॥ अन्यथेति। ब्रह्मादीनां मानुषादीनां च नियम्यनियामकभावरूपस्वभावस्येश्वराधीनत्व इत्यर्थः। अनादेः स्वभावस्य कथमन्याधीनत्वमित्यत आह ॥ अंगीकृतं चेति। ननु मानुषादीनां ब्रह्मादीनां च नियम्यनियामकत्वस्येश्वराधीनत्वे कथं तत्स्वभावत्वमित्यत आह ॥ यो हीति। यस्य वस्तुनो यो धर्म ईश्वरेण सर्वदा नियम्यते स तत्स्वभाव इत्युच्यत इत्यर्थः ॥ अमृतत्वादीति। अमृतत्वाभयत्वब्रह्मशब्दादिप्रमाणैरित्यर्थः ॥ श्रुतेति। श्रुतस्य ब्रह्मणस्त्यागोऽश्रुतस्याग्नेः कल्पना चेत्यर्थः ॥ मध्य इति। जीवेश्वरयोर्मध्येऽग्नेरवस्थितिकल्पकाभावात्प्रथमावगतेश्वरस्य परित्यागासंभवाच्च नेतर इति सूत्रस्यार्थांतरमुक्तं वेदितव्यमिति

पूर्वेण संबंधः ॥ तदिति । प्रतिवादिनो निरीश्वरत्वमित्यर्थः । नन्वत्रत्यपूर्वपक्षिणेश्वरस्याभ्युपगतत्वेऽपि निर्निमित्तं प्रथमावगतस्येश्वरस्य परित्यागोऽन्येरवस्थितिकल्पनाच्च तस्याप्रेक्षावत्त्वात्संभवतीत्यत आह ॥ न हीति ॥ १—२—४ ॥

॥ ॐ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॐ ॥ बन्हिति । बहुर्व्यापारो यस्येति स बहुव्यापारः । तस्य भावस्तत्ता तस्या इत्यर्थः । तथाच बहुव्यापारवत्त्वादधिकतरक्लेशो भवेदिति फलितोऽर्थः ॥ उक्तेति । उक्तस्य चित्तविक्षेपरूपहेतोर्व्याप्तिपक्षधर्मताऽवधारणायेत्यर्थः ॥ एतदिति । उक्तशंकापरिहारत्वेनेत्यर्थः ॥ १—२—५ ॥

॥ ॐ अदृश्यत्वादिगुणको धर्मोक्तेः ॐ ॥ उक्तेति । यदस्मिन्नध्याये समन्वीयते तत्सर्वं ब्रह्मणो लक्षणत्वेन प्रकृतलक्षणं च लक्ष्येण ब्रह्मणाऽभिन्नमिति पूर्वोक्तन्यायेनेत्यर्थः ॥ न पुनरिति । अदृश्यत्वादिशब्दैर्दृश्यादिप्रागभावादिर्नाभिधीय इत्यर्थः ॥ असामर्थ्येनेति । अदृश्यमित्यादौ नञः प्रागभावाद्यर्थत्वेन न विद्यते दृश्यं यस्येति प्रसज्यप्रतिषेधार्थकतया क्रियान्वितत्वेन दृश्यपदेन सामर्थ्याभावाददृश्यमिति समासासंभव इति भावः ॥ सहानवस्थेति । सर्वगतस्य ब्रह्मणो दृश्येन घटादिना सहावस्थितत्वेन ब्रह्मणि सत्यपि दृश्यस्य घटादेरनिवृत्त्या ब्रह्मणो भावरूपत्वेन च सहानवस्थानवध्यघातकभावभावाभावत्वरूपविरोधानाभसंभव इति भावः ॥ तदभावो हीति । तदभावो हि तद्भावविरोधीत्यत्र तदभावस्य तद्भावविरोधित्वोक्त्या ततो भेदस्य वक्ष्यमाणत्वान्नाभावो भाव इति च विशेष इत्येतदयुक्तमित्याशंकानिरासाय प्रायश इत्युक्तमित्यर्थः ॥ अथवेति। नाभावो भाव इति चेत्यत्राभाव इत्यनेन प्रागभावध्वंसात्यंताभावान्योन्याभावभेदेन चतुर्विधस्याप्यभावस्य ग्रहणप्रसक्तेरन्यो-

न्याभावस्यैव परिग्रहार्थं प्रायश इत्युक्तं । अन्योन्याभावस्यैव धर्मिस्वरूपत्वेन ग्रहीतुमुचितत्वादिति भावः । अस्मिन्पक्षे प्रायशो भावः प्रायिको भावोऽन्योन्याभावः । भाव इति चेतयोर्विशेषो न भवेदिति योजना । न तु पूर्वत्रेव भावोऽभाव इति चैतयोः प्रायशो विशेषो न भवेदितीति द्रष्टव्यं । ननु प्रायशो भाव इत्युक्त्याऽन्योन्याभावः कथं लभ्यत इत्यत आह ॥ अन्योन्याभाव इति ॥ नित्येति । नित्यसंबंधिनो ध्वंसस्यानादिसंबंधिनः प्रागभावस्य चासंभवादित्यर्थः । एतच्चोपलक्षणं । प्रामाणिकसंबंधिनोऽत्यंताभावस्यासंभवादित्यपि द्रष्टव्यं ॥ अशेषेति । अगोत्रमवर्णमित्याद्यशेषश्रुतिव्याख्यानमित्यर्थः ॥ अत एवेति । यतोऽन्योन्याभावस्यैव धर्मिस्वरूपत्वं न प्रागभावादेरत एव भावाभावौ द्विधेतरदिति भाववदभावस्यापि तत्त्वांतरत्वमभिधाय भावाभावस्वरूपत्वान्नान्योन्याभावता पृथगित्यन्योन्याभावस्य धर्मिस्वरूपत्वमाह आचार्य इत्यर्थः ॥ ब्रह्मणीति । ब्रह्मण्यपि संसर्गाभावस्य धर्म्यतिरिक्तस्तथा एवंधर्मानित्यादिश्रुतिविरोध इति भावः ॥ श्रुतीति । एवंधर्मान् पृथक् पश्यन्निति श्रुतिविरोध इत्यर्थः ॥ एवमिति । आनंदादिमत्त्वस्य धर्मत्वकल्पनेत्यर्थः ॥ विधेते चेति । विधेते च नञः प्रयोगाप्रयोगावित्यतो घटत्वघटान्यत्वयोर्निषेधविधिरूपत्वाद्व्यभिचार इत्यर्थः ॥ अविशिष्टयोरिति । यस्य कस्यचिदभावस्य येन केनचिद्भावेन विरोधमंगीकृत्येत्यर्थः ॥ उतेति । उत तदभावस्य तद्भावेन विरोधमंगीकृत्य तयोर्विरोधाभाव आपाद्यत इत्यर्थः ॥ आपादकेति । तदभावतद्भावयोरैक्यस्य मयाऽनंगीकृतत्वादैक्यापादकस्यासिद्धिरिति भावेन विरोधिभावाभावस्वरूपमाहेत्यर्थः ॥ उभयत्रेति । तदभावस्तद्भावविरोधी

ततोऽपरो नेत्युभयत्रापीत्यर्थः । ननु तृतीयाध्याये उभयव्यपदेशात्त्वहिकुंडलवदित्यत्रानंदादीनां धर्माणां धर्मिब्रह्मस्वरूपत्वस्य वक्ष्यमाणत्वादन्योन्याभावस्यापि तत्स्वरूपत्वं तत्प्रसक्तशंकापरिहारादिकं च तत्रैव वक्तुमुचितं । अतः कथमेतत्सर्वमत्रोच्यत इत्याशयेन शंकते ॥ नन्विति ॥ ॥ उल्बणतयेति । अन्योन्याभावस्य भावरूपब्रह्मस्वरूपत्वं कथमिति चोद्यस्योल्बणतया तत्पृथग्दूषितमित्यर्थः । अथवाऽन्योन्याभावस्य धर्मिस्वरूपत्वं न संभवति । विधिनिषेधरूपत्वेन सत्प्रतियोगिकनिष्प्रतियोगिकत्वेन च विरोधात् । भावाभावयोरैक्ये भावाभावलक्षणो विरोधः क्वापि न स्यादित्येतत्सर्वं बाधकसद्भावादिति तृतीयपक्षेऽतर्भवति । अतःपृथग्दूषणमयुक्तमिति शंकाभिप्रायः । अन्योन्याभावस्य धर्मिस्वरूपत्वे धर्मधर्मिभावो न स्यादित्यादिबाधकाद्विरोधादित्यस्योल्बणत्वेन तत्पृथग्दूषितमिति परिहाराभिप्रायः ॥ अन्यथेति । भेदस्य वस्तुस्वरूपातिरिक्तत्वे भेदे भेदांतरं तत्रापि भेदांतरमेवं तत्र तत्रापीत्यभ्युपगमेऽनवस्थाप्रसंगः । भेदे भेदांतरं तत्र चाभेद इत्यंगीकारेऽन्योन्याश्रयप्रसंगः । भेदे भेदांतरं तत्र चाद्यभेद इत्यंगीकारे चक्रकप्रसंगः । आद्यभेदे न भेदांतरं किंतु स्वयमेव वर्तत इत्यंगीकारे आत्माश्रयप्रसंग इति भावः ॥ घटत्वादीति । घटत्वकलशत्वकुंभत्वरूपानेकानिमित्तकल्पन इत्यर्थः ॥ घटादीति । घटकलशकुंभशब्दप्रयोगानित्यर्थः ॥ तदिति । घटादिशब्दप्रयोगनिमित्तमित्यर्थः ॥ अविनाभावित्वादिति । पृथक्त्वान्यत्वस्वरूपभेदानां परस्परव्याप्तत्वेनैकोक्त्यैवान्यस्यार्थाल्लभ्यमानत्वान्न तच्छब्दानां सहप्रयोगस्तथा चासहप्रयोगस्यान्यथासिद्धत्वान्न तेन पृथगादिशब्दानामेकप्रवृत्तिनिमित्तकत्वासिद्धिरिति भावः । घटात्पृथगित्युक्त्यनंतरं घटो न भवतीति प्रयोगो मा भूदित्यत्र हेतुमाह ॥ पृथक्त्व

सु०टि०

॥१५॥

इति। पृथक्त्वे सत्यन्योन्याभावादिकं नियमेन वर्तते । तथा चान्योन्याभावाविनाभूतपृथक्त्वोक्त्यैवार्थादन्योन्याभावस्य लभ्यमान-त्वाद्धटात्पृथगित्युक्त्यनंतरं घटो न भवतीति प्रयोगो न भवेदिति भावः। घटो न भवतीत्युक्त्यनंतरं घटात्पृथगिति प्रयोगः कस्मान्न भवेत्। भवेदेवेत्यत्र हेतुमाह ॥ न त्विति। अन्योन्याभावे सति तु पृथक्त्वं नियमेन नास्ति। गुणादावन्योन्याभावे सत्यपि पृथक्त्वाभावादिति परेणैव व्युत्पादितत्वात्। तथा चान्योन्याभावस्य पृथक्त्वाविनाभूतत्वाभावेनान्योन्याभावोक्त्यैवार्थात्पृथक्त्व-लाभाभावेन न भवतीत्युक्त्यनंतरं घटात्पृथगिति प्रयोगो भवेदेवेति तत्र सहप्रयोगाभावस्यान्यनिबंधनत्वा-योगादेकप्रवृत्तिनिमित्तकत्वमेवांगीकार्यमिति भावः ॥ क्रियावत्त्वेति । क्रियावत्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानां परस्परव्यभिचाराभावेनाविनाभूतत्वमस्तीति भावः ॥ अन्यतमेति। पृथगादिशब्दानां मध्येऽन्यतमव्यवहारेणैव लौकिकपु-रुषोद्दिष्टप्रयोजनसिद्धेस्तांश्छब्दान्सहव्यवहरंति। तथा च पृथगादिशब्दानां सहप्रयोगाभावस्यान्यनिबंधनत्वान्न तेन तेषामेक-प्रवृत्तिनिमित्तकत्वसिद्धिरिति भावः ॥ यदिति। यद्यस्मात्पटो घटात्पृथगिति पृथक्त्वमवधिनिरूप्यमन्योन्याभावस्तु घटो न भवति पट इति प्रतियोगिनिरूप्यस्तस्मात्पृथक्त्वान्योन्याभावयोः स्फुटो विवेक इति पूर्वेण संबंधः ॥ अन्येति। अन्यारादितरर्ते दिक्शब्दांचूत्तरपदाज्जाहियुक्त इत्यनेनेत्यर्थः। नन्वत्रान्यशब्दयोगे पंचम्यनुशिष्यते न तु पृथक्त्ववाचिपदयोग इत्यत आह ॥ अन्य इतीति। अन्यारादिति सूत्रेऽन्यशब्देनार्थग्रहणाभावे शब्दस्वरूपग्रहणमित्यर्थः। नन्वत्र सूत्रेऽन्यशब्देनार्थग्रहणा-भावेऽपि भिन्नो घटात्पट इत्यादावनुशासनांतरबलात्पंचमी भविष्यतीत्यत आह ॥ अनुशासनांतरेति ॥ तेनेति।

कं०रा०
प्र०द्वि
अ० ६

॥१५॥

पृथक्त्ववाचिपदप्रयोगे पंचम्याः सत्त्वेन घटो न भवति पट इत्यन्योन्याभाववाचिपदयोगे पंचम्यभावेन चेत्यर्थः ॥ आभ्यामिति । पृथक्त्वान्योन्याभावाभ्यामित्यर्थः ॥ विधिरूपत्वाच्चेति । यद्यप्यभावगतस्वरूपभेदस्य न परनिरूप्यत्वविरहो नापि विधिरूपत्वं । तथाऽपि द्रव्यादिगतस्वरूपभेदापेक्षयैतदुक्तिरिति ध्येयं । अत्र च विधिरूपत्वमन्योन्याभावापेक्षया विवेचकमिति द्रष्टव्यं ॥ इतरेतरेति । पृथक्त्वान्योन्याभावयोर्भेदसिद्धौ पृथक्त्वनिरूपकरूपावध्यभावनिरूपकरूपाप्रतियोगिनोर्भेदासिद्धिः । तत्सिद्धौ च पृथक्त्वान्योन्याभावभेदसिद्धिरितीतरेतराश्रयत्वमिति भावः । नन्वन्यारादिति सूत्रेऽन्य इत्यर्थग्रहणमिति पक्षे पृथक्त्ववाचिपदयोगे पंचम्या अनुशिष्टत्वाद्वैलक्षण्यस्य च पृथक्त्वरूपतया विलक्षणो देवदत्तो यज्ञदत्तादित्यत्र पंचम्युपपद्यत इत्यत आह ॥ न हीति । वैलक्षण्यं पृथक्त्वं न हि । वैलक्षण्यस्य गुणादिष्वपि सद्भावात्पृथक्त्वरूपगुणस्य तु गुणादिष्वभावादित्यर्थः ॥ अथेति । विलक्षणो देवदत्तो यज्ञदत्तादित्यत्र ततो वैलक्षण्यं विश्लेषत्वेन विवक्षित्वा विश्लेषावधित्वरूपमपादानत्वं कथंचिद्व्युत्पादयिष्यतेऽतस्तत्र पंचम्युपपत्तिरिति भावः ॥ भिन्न इत्यादावितिति । भिन्नो घटात्पट इत्यादावप्युक्तप्रकारेणापादानत्वस्य व्युत्पादयितुमशक्यत्वात् । अन्य इत्यर्थग्रहणमिति व्याख्यानं न कार्यमित्यर्थः ॥ तथा सतीति । भिन्नो घटात्पट इत्यादौ कथंचिदपादानत्वव्युत्पादनत्वेनापादाने पंचमीति पंचम्युपपत्तिरिति स्वीकारे घटादन्यः पट इत्यादावपि कथंचिदपादानत्वव्युत्पादनस्य साम्यात् । अपादाने पंचमीत्यनेनैव पंचम्युपपत्तेरन्यारादिति सूत्रवैयर्थ्यमापद्यत इत्यर्थः ॥ प्रपंचेति । ध्रुवमपायेऽपादानमित्युक्तापादानत्वप्रपंचनार्थत्वेनान्यारादिति सूत्रस्योपपत्तेर्न वैयर्थ्यमिति भावः ॥ विशिष्टेति । विलक्षणयोगे

पंचम्या वक्तव्यत्वेन विलक्षणो देवदत्तो यज्ञदत्तादित्यत्र पंचम्युपपत्तावपि देवदत्तो यज्ञदत्ताद्विशिष्टो घटः पटाद्व्यावृत्त इत्यादौ विशिष्टव्यावृत्तादिशब्दयोगे कथं पंचमी न कथंचिदित्यर्थः । ननु विशिष्टादेः पृथक्त्वरूपतया विशिष्टादिशब्दस्य पृथक्त्ववाचित्वादन्यारादिति सूत्रेण पृथक्त्ववाचिपदयोगे पंचम्या अनुशिष्टत्वेन विशिष्टव्यावृत्तादियोगे पंचम्युपपद्यत इत्यत आह ॥ नेति । ननु विशिष्टव्यावृत्तादियोगे पंचम्या उपसंख्यानं भविष्यतीत्यत आह ॥ सर्वत्रेति । विलक्षणविशिष्टव्यावृत्तादियोगे पंचम्या उपसंख्याने भिन्नादिशब्दयोगेऽपि तथा भविष्यतीत्यन्यारादिति सूत्रेऽन्य इत्यर्थग्रहणमिति व्याख्यानेन किमित्यर्थः । ननु पृथग्विना नानाभिस्तृतीयान्यतरस्यामिति पृथक्त्ववाचिशब्दयोगे तृतीयाया विकल्पविधानं तावदस्ति । विकल्पविधानं चान्यारादिति सूत्रेण नित्यत्वे पंचम्यां प्राप्तायामिति वक्तव्यं । तच्चान्यशब्देनार्थग्रहणमिति पक्ष एव संभवतीत्यतोऽन्यशब्देनार्थग्रहणमिति व्याख्यायत इत्याशयेन शंकते ॥ पृथगिति ॥ वाक्येति । नञ्प्रयोगमोत्रण पृथक्त्वाप्रतीतेः घटः पटो न भवतीति वाक्यप्रयोगे तु तत्प्रतीतेर्वाक्यप्रतिपाद्यं पृथक्त्वमिति भावः ॥ विधिरूपत्वमिति । स्वरूपभेदस्य विधिरूपत्वेनान्योन्याभावाद्भित्वे चैकत्वं वदता नञ्प्रयोगाविषयत्वेन विधिरूपत्वं वक्तव्यं । तादृशविधिरूपत्वं च नान्योन्याभावाद्विवेचकं भवितुमर्हति । घटान्यत्वस्य नञ्प्रयोगाविषयत्वेन विधिरूपत्वेऽप्यघटत्वशब्दितघटान्योन्याभावापेक्षया विवेचकाभावादिति भावः ॥ अत एवेति । उक्तन्यायेन विधिरूपत्वस्यान्योन्याभावविवेचकत्वासंभवादेव पृथक्त्वस्य विधिरूपत्वमन्योन्याभावाद्विवेचकमित्येतदपि परास्तमित्यर्थः ॥ कथमिति । अश्वादन्य इति

विग्रहवाक्ये पृथक्त्ववाचिपदयोगाभावात्कथं पंचमीत्यर्थः । ननु तत्रान्यशब्द एव पृथक्त्ववाचीत्यत आह ॥ न चेति । अश्वादन्य इति विग्रहवाक्येऽन्यशब्दस्य पृथक्त्वमर्थ इति न युक्तं । समासविग्रहवाक्ययोः समानार्थकत्वनियमेनानश्व इति समासगतनञर्थान्योन्याभावस्यैव विग्रहवाक्यगतान्यशब्दार्थत्वौचित्यादिति भावः ॥ द्वितीय इति ॥ अनश्व इति । समासगतनञर्थः पृथक्त्वमिति द्वितीयपक्षे नञ्प्रयोगविषयत्वेन पथक्त्वस्य निषेधरूपत्वमागतमिति न तस्य विधिरूपत्वेनान्योन्याभावाद्विवेक इति भावः ॥ आकाशादीनामिति । कार्यत्वादिनेति शेषः ॥ विकलांगस्येति । विकलांगस्य साधकत्वादर्शनादित्यर्थः ॥ श्रुतीनामिति । गुणगुण्यभेदप्रतिपादकश्रुतीनामित्यर्थः ॥ केवलेति । अत्यंतभेदप्रतिषेधमित्यर्थः ॥ अखंडमिति । निर्धर्मिकमित्यर्थः ॥ तत्त्वमिति । तत्त्वं समवायस्य सर्वत्रैकत्वं नित्यत्वं च भावेन सर्वत्र सत्त्वेन व्याख्यातमिति सूत्रार्थः ॥ अत एवेति । एकः समवाय इति विशिष्टव्यवहारानुपपत्तेरेव समवायस्यैकत्वसंख्यया संबंधो नेति तृतीयपक्षो न संभवतीत्यर्थः । ननु समवायस्यैकत्वसंख्यया संबंधाभावेऽप्येकः समवाय इति विशिष्टव्यवहार उपपन्न एव । तस्य स्वनिर्वाहकत्वादित्यत आह ॥ स्वनिर्वाहकत्व इति । समवायस्य स्वनिर्वाहकत्वेऽङ्गीक्रियमाणे स्वस्य निर्वाहकं स्वनिर्वाहकं स्वस्येति च कर्मणि षष्ठि । कर्तृकर्मणोः कृतीत्यनुशासनात् ।तथा चैकस्यामेव निर्वाहणक्रियायामेकस्यैव कर्मत्वलक्षणं निर्वाह्यत्वं कर्तृत्वलक्षणं निर्वाहकत्वं चेत्युक्तं भवति । तन्निर्वाह्यत्वं निर्वाहकत्वं च परस्परं धर्मिणा क्रियया चात्यंताभिन्नमुत भिन्नं । आद्ये तच्छब्दानां पर्यायत्वप्रसंगः । द्वितीये भेदस्य भेदिस्वरूपमात्रत्वे तच्छब्दपर्यायत्वप्रसंगात् । भेदांतरवत्त्वे चानवस्था-

प्रसंगात् । तस्य भेदिस्वरूपत्वमंगीकृत्य तच्छब्दानामपर्यायत्वमुपपादनीयमिति सविशेषत्वमेवांगीकर्तव्यमिति भावः ॥ अवयवादीनामिति । समवायेनेति शेषः ॥ स्वनिर्वाहकत्व इति । समवायस्य स्वनिर्वाहकत्वे सविशेषत्वमेवांगीकर्तव्यमित्युक्तमित्यर्थः ॥ अवयवादीनीति । अत्रादिपदेन गुणिक्रियावद्व्यक्तिनित्यद्रव्याणां ग्रहणं । अवयव्यादीनामित्यादिपदेन तु गुणक्रियाजातिविशेषाणां ग्रहणं ॥ परस्परेति । परस्परविरुद्धयोर्भेदाभेदयोरेकत्रावस्थानस्य स्वभावविशेषमंतरेणानुपपत्तेरित्यर्थः ॥ भेद इति । भेदाभेदयोर्वस्तुना सह भेद इत्यर्थः ॥ तस्येति । विशेषस्याभिन्नेऽपि वस्तुन्यपर्यायशब्दप्रवृत्तौ निमित्तत्वादित्यर्थः ॥ कथंचित्सत्यादिकामिति । औपचारिकसत्यादिकमित्यर्थः ॥ व्याख्यातचरमिति । व्यावृत्तेर्निर्विशेषे तु किं व्यावृत्त्यबहुत्वत इतीदं वाक्यं न व्यावृत्त्या प्रयोजनं । व्यावृत्तस्याविशेषत्व इति जन्माधिकरणीयवाक्यव्याख्यानन्यायेन व्याख्यातप्रायमित्यर्थः ॥ १—२—६ ॥

॥ ॐ वैश्वानरः साधरणशब्दविशेषात् ॐ ॥ नापीति । अस्याधिकरणस्य प्रथमपादेऽप्यंतर्भावो न संभवतीत्यर्थः ॥ लिंगाधिकेति । श्रुतिर्लिंगाधिका परेत्यत्र यथा प्रथमपादेऽतस्तद्धर्मोपदेशादित्यत्रांतःस्थत्वरूपलिंगसमन्वयस्येंद्रादिबहुनामसमन्वयलाभार्थत्वेन तस्याधिकरणस्य प्रथमपादेऽतर्भावः । तथा वैश्वानरः साधारणशब्दविशेषादित्यत्र वैश्वानरनामसमन्वयस्य पाचकत्वाद्यनेकलिंगसमन्वयार्थतयैतत्पादांतर्भावः संभवतीत्यंतर्भावः समर्थित इत्यर्थः ॥ अन्यथेति । रूढेत्यस्यान्यगतत्वेन प्रसिद्धेरिति विवरणाकरणे रूढेत्येव ग्रहणे प्राग्व्युत्पादितसमन्वयानां यौगिकनाम्नां परित्यागः स्यादित्यर्थः

॥ एतच्चेति । अन्यगतत्वेन प्रसिद्धत्वं लिंगानामपि विशेषणमित्यर्थः ॥ आनंदमयेति । सा योगादेव लभ्यत इत्यानंदमयाधिकरणांते भगवद्विषयकरूढेर्महायोगसहितत्वेनेतरविषयरूढेः प्राबल्यमिति व्युत्पादितो न्यायः । तस्मादित्यर्थः ॥ १-२-७ ॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतंत्रस्वतंत्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतिचरणतीर्थपूज्यपादानां शिष्येण श्रीमद्रामचंद्रयतिना कृतायां श्रीमन्न्यायसुधाव्याख्यायां प्रथमाध्यायस्य द्वितीयः पादः ॥ १—२ ॥

॥ अयंग्रंथः खंडो रामचंद्र भिसे इत्यनेन " कर्नाटक प्रिंटिंग वर्क्स, धारवाड " मुद्रणालये मुद्रितः ।
सवणूरकुलोत्पन्नराघवेंद्रसूनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ॥

॥ इति श्रीमन्न्यायसुधाटिप्पणी कंभाल्ळूररामचंद्रभिक्षुकृता समाप्ता ॥

॥ प्रथमे द्वितीयः पादः ॥

॥ अथ श्रीमन्न्यायसुधाटिप्पणी कंभाल्लूररामचंद्रभिक्षुकृता प्रारभ्यते ॥

॥ प्रथमे तृतीयः पादः ॥

॥ श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥ भिन्नवाक्यत्वादीति । तृतीयपादस्य पूर्वपादाद्भिन्नवाक्यत्वस्य स्वस्मिन्नेकवाक्यतायाश्च सिद्धय इत्यर्थः ॥ सेति । लिंगानां नाम्नां च स्वस्मिन्वृत्तिरित्यर्थः ॥ तर्हीति । पुनर्वक्ति चेदित्यर्थः । अन्यत्रेत्यस्य प्रतियोग्याकांक्षायामाह ॥ तस्मादिति । हरेरित्यर्थः ॥ सिद्धत्वादिति । समन्वयस्येति शेषः ॥ प्रयोजनमिति । उभयत्र प्रसिद्धशब्दसमन्वयप्रतिपादनस्येति शेषः ॥ प्राधान्येति । प्राधान्यानुरोधेन प्रक्रमानुरोधेन चेत्यर्थः ॥ उत्तरेति । द्युभ्वाद्याय-तनं स्वशब्दादिति द्युभ्वाद्यायतनत्वलिंगसमन्वयस्य प्रथमं प्रतिपादनात्तदनुसारेण लिंगनाम्नामित्युक्तमित्यर्थः ॥ ॐ द्युभ्वा-द्यायतनं स्वशब्दात् ॐ ॥ रुद्रादीनामिति । रुद्रप्रधानवायुजीवानामित्यर्थः ॥ ॐ नानुमानमतच्छब्दात् ॐ ॥ ॥ असामर्थ्येनेति । प्रसज्यप्रतिषेधार्थकनञः क्रियान्विततया तच्छब्देत्यनेन सामर्थ्याभावात्समासानुपपत्तेरित्यर्थः ॥ अकर्तरीति । नन्नु अकर्तरि च कारिके संज्ञायामित्यस्य कर्तृव्यतिरिक्ते कारके संज्ञायां विषये धातोः घञ्प्रत्ययो भवतीत्यर्थः । तथा चाकर्तरीत्यत्र नञः प्रसज्यप्रतिषेधार्थत्वाभावान्नायं निर्देशोऽसमर्थसमासोऽस्तीत्यत्र ज्ञापक इति चेत् । मैवं । अकर्तरीत्यत्र नञः पर्युदासार्थत्वे नञिव युक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिरिति महाभाष्योक्तन्यायेनाकर्तरीत्यनेनैव कर्तृव्यतिरिक्तकारकस्य लभ्यमानतया कारकग्रहणवैयर्थ्यापत्त्या प्रसज्यप्रतिषेधार्थकत्वावश्यंभावेनाकर्तरीति निर्देशस्यासमर्थ-समाससद्भावज्ञापकत्वोपपत्तेः ॥ अव्ययीभाव इति । तथाच नाव्ययीभावादतोम् त्वपंचम्या इत्युक्तेः पंचम्या अम् भावाभावेनातच्छब्दादिति निर्देशः साधुरिति भावः ॥ अथवेति । तथा चास्मिन्पक्षे नञः पर्युदासार्थत्वेनासामर्थ्याभावान्न

समासानुपपत्तिरिति भावः ॥ महायोगेति । महायोगविद्द्रूढिभ्यां आत्मशब्दस्य विष्णौ प्रवृत्तत्वेन केवलरूढ्युपेतत्वाभावादिति भावः । विष्णावेवात्मशब्दस्य रूढत्वादित्येतावन्मात्रस्य यस्मिन्द्यौरित्यादिका श्रुतिः । शिवादिकान्न वक्तीत्यत्र हेतुत्वायोगाच्छेषं पूरयति ॥ तस्य चेति । विष्णावेव प्रसिद्धस्यात्मशब्दस्यात्र श्रवणादित्यर्थः ॥ १—३—१ ॥

॥ ॐ भूमा संप्रसादादध्युपदेशात् ॐ ॥ तस्मादूर्ध्वमिति । प्राणो वा आशाया भूयानित्युक्तप्राणादुपरि यो वै भूमेति भूम्न आम्नातत्वात्प्राणादूर्ध्वं भूम्न उपदेशोऽस्तीति भावः ॥ संप्रसाद इति । एष संप्रसादोऽस्माच्छरीरात्समुत्थायेति श्रुतौ संप्रसादशब्दस्य जीवे प्रयोगात्संप्रसादशब्दितो जीवात्मेति भावः । अस्मिन्पक्षे प्राणो वा आशाया भूयानित्यत्र श्रुतः प्राणशब्दो जीवपर इति द्रष्टव्यं ॥ प्रसिद्धेति । प्रसिद्धप्राणजीवपदत्यागेत्यर्थः ॥ नामेति । वाग्वाव नाम्नो भूयसीत्यादिना वागादीनां नामाद्याधिपत्यस्योक्तत्वात्सर्वस्मादुपर्युपदिष्टस्य भूम्नोऽखिलेशत्वं सिध्यतीति भावः ॥ हेत्वंतरेति । पूर्णसुखत्वरूपहेत्वंतराभिधायकत्वादित्यर्थः ॥ १—३—२ ॥

॥ ॐ अक्षरमंबरांतधृतेः ॐ ॥ ॐ अन्यभावव्यावृत्तेश्च ॐ ॥ एवमिति । अह्रस्वमित्यनेन हि दीर्घपरिमाणं वक्तव्यं । अदीर्घमित्यनेन ह्रस्वत्वं । न चोभयमेकत्र युज्यते । परस्परपरिहारेणैव वृत्तिदर्शनादित्येवमह्रस्वमदीर्घमित्यत्रापि विरोधो द्रष्टव्य इत्यर्थः ॥ द्वितीय इति । अस्थूलादिपदैः स्थूलत्वादिनिवृत्तिमात्रप्रतिपादने ब्रह्म स्थूलपरिमाणमात्रादिशून्यमित्यापन्नमित्यर्थः । ततः किमित्यत आह ॥ तथा चेति । ब्रह्मणोऽस्थूलपदोक्तस्थूलपरिमाणशून्यत्वस्यांगीकारे सर्वत्र

प्रसिद्धोपदेशादित्युक्तसर्वगतत्वविरोधः । स्थूलपरिमाणरहितद्रव्यस्य सर्वगतत्वायोगात् । तथा न तदश्नाति किंचनेत्युक्तात्तृत्वशून्यत्वस्यांगीकारेऽत्ता चराचरग्रहणादित्युक्तात्तृत्वविरोधः । तथाऽलौहितमित्युक्तलोहितरूपशून्यत्वस्यांगीकारे रूपोपन्यासाच्चेत्यत्र तस्य हैतस्य परमस्य नारायणस्य चत्वारि रूपाणि शुक्लं रक्तमित्युक्तरूपविरोधः स्यादित्यर्थः । यद्यप्यस्थूलादिवाक्ये न तदश्नाति किंचनेत्यनत्तृत्वस्यांतेऽभिहितत्वात्सर्वत्र प्रसिद्धोपदेशात् रूपोपन्यासाच्च अत्ता चराचरग्रहणादित्युक्तविरोधः स्यादिति वक्तव्यं । तथाऽपि तेषां सूत्राणां क्रममनुसृत्यैवमुक्तमिति द्रष्टव्यं ॥ उभयेति । अणुत्वमहत्त्वकार्यदर्शनरूपानुमानस्येत्यर्थः ॥ उदाहृतेति । यशोदादिप्रत्यक्षस्येत्यर्थः ॥ प्रमाणेनेति । अणुत्वमहत्त्वाभावग्राहकप्रमाणेनेत्यर्थः ॥ अथ परस्परमिति । अणुत्वमहत्त्वयोः परस्परं विरोधोऽपीत्यर्थः ॥ विपरीतेति । ब्रह्मण्यणुत्वमहत्त्वाभावग्राहकप्रमाणादर्शनादित्यर्थः । ननु ब्रह्माणुत्वमहत्त्वरहितं द्रव्यत्वाद्घटवदित्यादेरनुमानस्यैव विपरीतग्राहकप्रमाणस्य सत्त्वात्कथं तद्दर्शनमित्यत आह ॥ द्रव्यत्वादेरिति ॥ उक्तेति । अणोरणीयान्महतो महीयानित्याद्यागमाविरोधेनेत्यर्थः ॥ उताकाश एवेति । कृत्स्नाकाश एवेत्यर्थः ॥ आद्य इति । परमाणुसंयोगाधिकरणाकाशप्रदेशविशेष आकाशस्वरूपमेवेत्याद्यः पक्षः परमाणुसंयोगः कृत्स्नाकाशवृत्तिरित्यंत्यपक्षेऽतर्भवति । तथा चांत्यपक्षे वक्ष्यमाणदूषणेनैव स दूषितो भविष्यतीति भावः । नन्वर्थांतरपदेनौपाधिकप्रदेशविशेषस्य विवक्षितत्वान्नाभ्युपगमविरोध इत्यत आह ॥ औपाधिकेति । आकाशे परमाणुसंयोगाधिकरणत्वेनौपाधिकप्रदेशविशेषांगीकारे स उपाधिर्यदि परमाणुरेव तदाऽऽत्माश्रयः । यद्यन्यस्तथा तत्संयोगार्थं परमाणुरूपोपाधिकृतप्रदेश-

विशेषांगीकारेऽन्योन्याश्रयः । उपाध्यंतरकृतप्रदेशविशेषांगीकारे चोपाध्यंतरसंयोगस्य परमाणुरूपोपाधिकृतप्रदेशविशेषवृत्तित्वे चक्रकं । उपाध्यंतरसंयोगस्योपाध्यंतरकृतप्रदेशविशेषवृत्तित्वं । तथा तत्संयोगस्याप्युपाध्यंतरकृतप्रदेशविशेषवृत्तित्वं । एवं तस्य तस्यापीत्यंगीकारेऽनवस्थेत्यर्थः ॥ तथात्वापत्तेरिति । कृत्स्नाकाशवृत्तित्वापत्तेरित्यर्थः । इष्टापत्तिमाशंक्याह ॥ तथा चेति । व्यभिचार इति द्रव्यत्वादेरिति शेषः ॥ परस्परेति । अणुत्वमहत्त्वयोः परस्परविरोधासिद्धेरित्यर्थः ॥ स हीति । अणुत्वमहत्त्वयोः परस्परविरोधो हि सर्वत्र सहानवस्थानदर्शनाद्वा कल्पनीयः । किंवा क्वचित्सहानवस्थानदर्शनात्कल्पनीयः । किंवा विमतिविषयादन्यत्र सहानवस्थानदर्शनात्कल्पनीय इत्यर्थः ॥ श्रुत्यादिनेति । अणोरणीयान्महतो महियानिति श्रुत्यादिनेत्यर्थः ॥ तदभावादिति । अवयवाभावादित्यर्थः ॥ अन्येति । अवयववृत्तिसंयोगस्यान्यत्रावयविनि वृत्त्यभ्युपगमेतिऽप्रसंगाच्चेत्यर्थः ॥ अतिप्रसंग इति । अन्यत्र सहानवस्थितयोर्गोत्वाश्वत्वयोरपि क्वचित्सहावस्थानप्रसंगः । अन्यत्र सहानवस्थितं गोत्वादिकं कथं नाम सहावतिष्ठत इति प्रश्ने वस्तुस्वभाव एव तादृश इति परिहारस्य सुलभत्वादिति भावः । न हि वयं निष्प्रमाणकमणुत्वमहत्त्वयोः सहावस्थानमंगीकृत्यान्यत्र सर्वत्र सहानवस्थितमणुत्वादिकं कथं सहावतिष्ठत इति प्रश्ने वस्तुस्वभाव एव तादृश इति परिहारं ब्रूमः । येनोक्तातिप्रसंगः स्यात् । किं नाम प्रमाणेनाणुत्वादेः सहावस्थाने प्रमिते सति । न च गोत्वादेः सहावस्थानं प्रमितं । अतो नातिप्रसंग इत्याह ॥ प्रमाणेति ॥ एवं सतीति । प्रमाणसद्भावेनाणुत्वमहत्त्वयोरेकस्मिन् ब्रह्मणि सहावस्थानांगीकारे

यः सर्वज्ञः सर्ववित् साक्षी चेता केवलो निर्गुणश्चेति सगुणत्वनिर्गुणत्वयोः ब्रह्मणि सहावस्थाने प्रमाणसद्भावेन तत्र तयोः सहावस्थानस्यांगीकार्यत्वावश्यंभावान्निर्गुणवाक्यं हेयसत्त्वादिगुणनिषेधपरमिति व्यवस्था नाश्रयणीया स्यादित्यर्थः ॥ प्रमाणेनेति । अणुत्वमहत्त्वोभयकार्यदर्शनरूपन्यायानुसंधानपूर्वकोभयपरत्वनिश्चयबलादणोरणीयान्महतो महीयानिति प्रमाणेन ब्रह्मणोऽणुत्वमहत्त्वाधारतेत्यत्र सर्वत्र सहानवस्थितमप्यणुत्वादिकं ब्रह्मणि सहावतिष्ठते इत्यंगीकारात्सगुणनिर्गुणवाक्यस्थले चोभयपरत्वग्राहकन्यायानुसंधानपूर्वकोभयपरत्वनिश्चयाभावात् । प्रत्युत सगुणज्ञानस्य सफलत्वेन निर्गुणज्ञानस्य तु निष्फलत्वेन सगुणवाक्यस्यैव स्वार्थे तात्पर्यं न निर्गुणवाक्यस्येति निश्चयाच्चोभयांगीकारायोगेन निर्गुणवाक्यस्य हेयसत्त्वादिगुणराहित्यार्थांतराश्रयणेन वाक्यव्यवस्थैवांगीकार्येति भावः । प्रमाणस्वरूपावधारण इति पाठे अणोरणीयान्महतो महीयानिति प्रमाणस्योभयकार्यदर्शनरूपन्यायानुसंधानपूर्वकोभयपरत्वावधारणेऽन्यत्र सहानवस्थितमणुत्वादिकं ब्रह्मणि सहावतिष्ठत इत्यंगीकारात् । सगुणनिर्गुणवाक्यस्थले च तदभावात् प्रत्युत वैपरीत्याच्चोक्तव्यवस्थैवाश्रयणीयेत्याशयो द्रष्टव्यः । ननु प्रमाणेन प्रतीतिमात्रमलं । किं तत्परत्वावधारणेनेत्यत आह ॥ अन्यथेति । ननु सूत्रकारोऽन्यवस्तुस्वभावभूतानां स्थौल्यादीनामभावं नारायणेऽस्थूलादिश्रुतिर्वक्तीतीदं व्याख्यानमन्यभावव्यावृत्तेरिति स्वशब्देन विधाय विरुद्धैर्लक्षणैर्युतमिति पूर्वव्याख्यानं किमर्थं चशब्देन सूचितवानित्यत आह ॥ बह्विति ॥ कतिपयपदविषयमिति । अस्थूलमित्यनेन तद्विपरीतमणुत्वमुच्यते । अनणिवत्यनेन तद्विपरीतं स्थूलत्वं । तथाऽह्रस्वमित्यनेन तद्विपरीतं दीर्घत्वमदीर्घमित्यनेन तद्विपरीतं ह्रस्वत्वं । न च

विरोधः । ब्रह्मणो विरुद्धैर्लक्षणैर्युतत्वादिति पूर्वव्याख्यानस्यास्थूलमनण्वह्रस्वमदीर्घमित्येतावन्मात्रविषयत्वात्कतिपयपदविषयत्वमिति भावः ॥ १—३—३ ॥

॥ एतत्पादाधिकरणेति । एतत्पादाधिकरणेषु समन्वेतव्या ये विषया ये च पूर्वपक्षन्यायाः सिद्धांतन्यायाश्च तान्संग्रहणेन दर्शयतीत्यर्थः ॥ एतच्चेति । लिंगं साधारणं शब्दान्नित्यादिकं च प्राणानां ग्रंथिरसि रुद्रो वै लोकायतनं वायुना गौतम सूत्रेण अयं च लोकः परश्च लोकः सर्वाणि भूतानि संदृब्धानि भवंति । सर्वे वा एते प्राणाश्च प्राणिनश्च देवाश्च दिव्यानि च लोकाश्च लोकिनश्च विष्णावेवौताःप्रोताश्च भवंतीत्यादेर्द्युभ्वाद्यायतनत्वमज्ञानां लिंगं ॥ १ ॥ प्राणो वा आशाया भूयान् विष्णुर्देवेभ्यो भूयान् तस्माद्भूयान्नामेत्यादेर्ज्ञानां साधारणः ॥ २ । विष्णोश्चेतनप्रकृतेश्चाविनाशित्वसाम्यादक्षरशब्दः साधारणः ॥ ३ ॥ कारणत्वसाम्याद्विष्णोरचेतनप्रकृतेश्च सदेवेत्यादिसृष्टिस्थानं च साधारणं ॥ ४ ॥ लिंगं हृत्पद्मस्थितत्वं साधारणं ॥ ५ ॥ कथं नु तद्विजानीयामित्यानुकूल्येन ग्रहणं कस्येति विचार्य । अनुग्रहः ॥ ६ ॥ पुनः शब्द ईशानः ॥ ७ ॥ वज्रं ॥ ८ ॥ ज्योतिः ॥ ९ ॥ आकाश इति ॥ १ ॥ लिंगं स्वप्नादिदर्शनं । कस्येति ॥ ११ ॥ शब्दो ब्राह्मण इति ॥ १२ ॥ यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः ओतं प्राणा ओता इत्यत्रोक्तानां लिंगानामन्यत्र रुद्रादिविषये बाहुल्यं । प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः प्राणेश्वरः कृत्तिवासाः पिनाकी मनो वै रुद्र ओतं च प्रोतं च रुद्रो वाव लोकाधार इत्यादिकं शब्दबाहुल्यं प्राणो वा आशाया भूयानित्युक्त्वा प्राणाद्भूयसोऽनुक्तिः । अत्तेत्युक्तत्वात् न तदश्नाति

किंचनेति विरुद्धता । बहुस्यां प्रजायेयेति अन्यस्यान्यभावादृष्टिः । दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यमित्यनेन यावान्वा अयमाकाशस्तावानेषोंऽतर्हृदय इत्यस्यान्वयाभावः । तदेतदिति मन्यंते । कथं नु तद्विजानीयामिति तेषां सुखं शास्वतमित्युक्तज्ञानिसुखग्रहणमिति विपरीतश्रुतिभ्रमः । ऊर्ध्वं प्राणमुन्नयतीत्यादिलिंगानां प्राणादन्यत्रावकाशराहित्यमिति भ्रमः । एवमेवैष प्राण इतरान्प्राणान् पृथक् पृथगेव संनिधत्ते इत्यादिवाक्यभ्रमः । वज्रशब्द उद्यतत्वलिंगं च तादृग्द्वयं । आदित्यादिज्योतिष्ट्वमुभयलोकसंचरणमादित्यैनैवायं ज्योतिषास्त इत्यवधार्यमित्यादीनां परमात्मन्यवकाशाभावः । बहुतादृग्वै नामेति प्रसिद्धिद्योतकनिपातद्वयं रूढियोगेनोक्तं । यौगिकार्थस्यांगीकारे विरोधिजीवेश्वराभेदे ईश्वरोक्तावप्यर्थाज्जीव एवोच्यत इत्यर्थात्तथाऽवगतिः । ब्राह्मणशब्दस्य पापालेपलिंगस्य च चतुर्मुखस्य परमात्मना भेदं विनाऽवकाशराहित्यार्थादभेदप्राप्तिरीति समस्तमेतत् । तेषामेव लिंगशब्दानां प्राणानां ग्रंथिरसीत्यादीनां विष्णौ मुख्यवृत्तिरिति बलवत्त्वं तस्य रुद्रावरणादिकर्तृत्वं मुख्यप्राणस्य विष्णोः सकाशात् भूयस्त्वानुक्तिः । चशब्देन एष तु वा अतिवदति । यः सत्येनातिवदति । प्राणाद्विष्णोर्भूयस्त्वोक्तिश्च सर्वाधारप्रकृत्याधारत्वं विष्णोरन्यस्य विरुद्धं । पतिं विश्वस्यात्मेश्वरं । विश्वात्मानं परायणमिति श्रुतेः । अनशनोक्तिस्त्वनुपजीवनार्थत्वेनैव सावकाशा । अचेतनस्येक्षणा दृष्टिः बहुभावश्रुतिस्त्वन्यभावं विना तत्तनियामकतया स्वरूपबहुत्वार्थत्वेनैव युज्यते । आकाशपक्ष एवान्वयाभावः । विष्णुपक्षे तु योऽन्वेष्टव्यो भगवांस्तस्यांतर्हृदये यावान्वाऽयमाकाशस्तावानाकाशस्तास्मिन्द्यावापृथिवी अंतरेव समाहिते स भगवानात्माऽपहतपाप्मेत्यन्वयः । यज्ज्ञानाच्छाश्वतं सुखं । स भगवान्यद्ब्रह्मानिर्देश्यं सुखमिति वदंति ।

तदेतत्स्वरूपमिति मन्यंते। अतः पूर्ववादाद्विपरीतैव श्रुतिः। पूर्ववादोक्तयोजना तु भ्रम एव । लिंगानां परमात्मन्यवकाशो विद्यत
एवेति तद्राहित्यं भ्रम एव। वामनश्रुतेरेवानवकाशप्रतीतेरीशानशब्दोक्तो विष्णुरेव। वज्रशब्दस्य उद्यतत्वस्य च विष्णावेवावकाशः
॥ उद्यमितत्वमेवोद्यतत्वमिति ॥ अयं पुरुष इति। संसारी आत्मशब्दोदित एव विष्णुः । अत आदित्यादिज्योतिष्ट्वं
संसारिण एव आदित्येनैवेत्यवधारणं बाह्यज्योतिष्ट्वं प्राधान्यापेक्षयेत्यादि लोकसंचरणं जीवमादाय तस्यैवादुःखेन स्वातंत्र्यात्।
वै नामेति निर्वहितृत्वे श्रुत्यादिप्रसिद्धबाहुल्यं प्रसिद्धाकाशस्योक्तमनामरूपत्वं विरुद्धं। सुषुप्त्युत्क्रांत्योर्जीवेशयोर्भेदोक्तेरसंगतत्वा-
दिति चेश्वरस्यैवेत्यर्थाद्भवति। जीवस्य तदयुक्तेरीशे सावकाशत्वाच्च । ब्रह्मणा वेदेन गम्यत इति ब्राह्मणशब्दो विष्णावेव
युज्यत इत्यर्थादजशब्दोऽपि तस्मिन्नेव चतुर्मुखस्य कर्मफलाभावायुक्तेस्तयोर्भेदोऽर्थादापद्यते। उक्तविरोधश्च तत्रैव भेदश्रुति-
बाहुल्यात्तल्लिंगं स शब्दश्चतुर्मुखे सावकाश इति ॥ समस्तमेतदिति। न्यायविवरणे स्वयमेवाचार्यैर्व्याख्यातमिति।
तत्रैवावगंतव्यं। अतो नास्माभिर्व्याख्यायत इति भावः। लिंगवचनविपरिणामेन सर्वत्रान्वितेन साधारणशब्देन सर्वेषामुभ-
यत्र प्रसिद्धिः। द्विस्थिता इत्यनेन तु पूर्वोत्तरपक्षे हेतुमतोक्तेति द्रष्टव्यं। हृत्पद्मस्थितत्वादीनामुभयत्र प्रसिद्धत्वानुपपादनं तु
द्युभ्वाद्यायतनत्वादीनां श्रुत्यंतरादिभिरुभयत्र प्रसिद्धत्वस्योपपादितत्वात्तन्न्यायेन तेषामुभयत्र प्रसिद्धत्वं स्वयमेव ज्ञास्यंती-
त्याशयेनेति ध्येयं ॥ वै नामेति। प्रसिद्धिद्योतकनिपातद्वयं। रूढित्यागेनोक्तयौगिकार्थस्यांगीकारे विरोधीति न्यायविवरणानु-
सारेण बहुताद्दत्त्वमुक्तस्य विरोध्यर्थात्तथा गतिरिति पठितव्यं। विरोधोऽर्थात्तथा गतिरिति पाठेऽपि विरोधशब्दः कर्तृव्युत्पत्त्या

विरोधिपर इति द्रष्टव्यं ॥ साक्षादिति। साक्षात्सूत्रोक्तानपि सिद्धांतन्यायानाहेत्यर्थः ॥ अत एवेति। उक्तानां सिद्धांत-
न्यायानां सूत्रसूचितत्वान्मुक्तोपसृप्येत्यादिना उच्यमानानां सिद्धांतन्यायानां तु साक्षात्सूत्रोक्तत्वादेव पूर्वं दृश्यंत इत्युक्त्वा
अत्र वेदेशेन प्रदर्शिता इत्युक्तमित्यर्थः । सर्वतस्तथेत्यस्य पूर्वेण संबंधप्रकारं दर्शयति । प्राणाधिक्यतस्तथा
सर्वत्राधिक्यमितीति प्राणादाधिक्यं सर्वत आधिक्यं च भूमा संप्रसादादध्युपदेशादिति सूत्रोक्तमिति भावः। सर्वतस्तथेत्य-
स्योत्तरेण संबंधप्रकारं दर्शयति ॥ स्वभावस्येति। ईश्वरस्वभावस्य सर्वतो वैलक्षण्यमन्यभावव्यावृत्तेश्चेति सूत्रोक्तं समुच्चया-
र्थकतथाशब्देनोक्तमंबरांतधृतेत्यादिकं तु अक्षरमंबरांतधृतेः सा च प्रशासनादिति सूत्राभ्यामुक्तमिति भावः । प्रेक्षापूर्वक्रिया
तथेत्यत्र समुच्चयार्थकतथाशब्दस्योपयोगो नास्ति। ईक्षतिकर्मव्यपदेशात्स इत्यत्र युक्त्यंतरानुक्तेत्यभिप्रेत्य तथाशब्दस्योत्तरत्रैव
संबंध इत्याह ॥ प्रेक्षापूर्वाक्रिया तथेति। तथाशब्द उत्तरत्र संबंध्यत इति ॥ तेनेति। अरस्य ण्यस्य चेशत्वमित्युत्तरवाक्ये
संबंधेन समुच्चयार्थकतथाशब्देन दहर उत्तरेभ्य इति प्रधानसूत्रोक्तानां अपहतपाप्मत्वादीनां ग्रहणमित्यर्थः। न च वाच्यं
द्युभ्वाद्यधिकरणीयप्रधानसूत्रोक्तात्मशब्दरूपसिद्धांतन्यायस्य मुक्तोपसृप्येत्यादिसंग्रहकारिकायामनुक्तिरयुक्तेति। विष्णावेवात्म-
शब्दस्य रूढत्वान्न शिवादिकान् श्रुतिर्वक्तीति पूर्वमेवात्मशब्दरूपन्यायस्योक्तत्वेनात्रानुक्त्युपपत्तेः। अपहतपाप्मत्वादीनां
ग्रहणमित्युपलक्षणं। गतिशब्दाभ्यामित्युक्तयोः सुप्तगम्यत्वब्रह्मशब्दयोः धृतेश्च महिम्न इति सूत्रोक्तस्य धृतिरूपलिंगस्यैष
सेतुर्विधारण इति श्रुतियुक्ताया य एषोऽतर्हृदय आकाशस्तस्मिन्निति वाजसनेयश्रुतिसमाख्यायाश्च प्रसिद्धश्चेति सूत्रोक्ताया-

स्तत्रापि दहरं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यमिति तैत्तिरीयश्रुतिसमाख्यायाश्च ग्रहणमित्यपि द्रष्टव्यं । यद्वा अपहतपाप्मत्वादीनामित्यादिशब्देन धृत्यादयोऽपि गृह्यंत इति व्याख्येयं । सूर्याद्यनुकृतिस्तथेत्यत्र तथाशब्देनानुकृतेस्तस्य चेति सूत्रस्थचशब्दोपात्तं तस्य भासा सर्वमिदं विभातीति श्रुत्युक्तं सर्वप्रकाशकत्वं गृह्यत इत्यभिप्रेत्याह ॥ तथा सर्वप्रकाशकत्वमिति ॥ ज्योतिःशब्दस्येति । विष्णुरेव ज्योतिः विष्णुरेव ब्रह्मेति श्रुतिबलाज्ज्योतिःशब्दस्य विष्णोरन्यत्रासंभव इति भावः । आकाशोऽर्थांतरत्वादिव्यपदेशादित्यत्र ते यदंतरा तद्ब्रह्मेति श्रुतस्य सूत्रस्थार्थांतरत्वशब्दोक्तस्य नामरूपराहित्यस्य स्पष्टत्वादनामरूपतेत्येतन्न व्याख्यातं । ननु सुषुप्त्युत्क्रांत्योर्भेदेनेति सूत्रोक्तप्राज्ञेनात्मना संपरिष्वक्त इत्यादिश्रुत्या व्यपदिष्टस्य जीवेश्वरभेदस्य धर्मिग्राहकत्वेनाभेदग्राहकप्रमाणं प्रत्युपजीव्यं यत्प्रमाणं तात्सिद्धत्वेऽप्युपजीव्यं यत्प्रमाणं तद्रूपत्वाभावात्कथं भेदस्युपजीव्यप्रमाणतेत्युक्तमित्यत आह ॥ उपजीव्यमिति ॥ प्रसंगेति । प्रसंग उपोद्घातोऽवसरप्राप्तिकारणत्वं कार्यत्वमेककार्यकारित्वमित्येवं भेदादित्यर्थः । ननु स्मारकाभावात्कथं प्रसंगरूपासंगतिरित्यत आह ॥ असंगश्चेति ॥ प्रकृते चेति । देवानां वेदविद्याधिकारसमर्थनस्य मध्ये वामनमासीनं विश्वे देवा उपासत इत्युक्तं सर्वदेवोपास्यत्वोपपादनं प्रयोजनं । शूद्राणां वेदविद्यानधिकारसमर्थनस्य तु मनुष्याधिकारित्वादिति सामान्योक्तेः शूद्रेतरविषयत्वान्न शूद्रानधिकारप्रतिपादकप्रमाणविरोध इत्येतदुपपादनं प्रयोजनमस्तीत्यर्थः । यद्यप्यत्राधिकरणे शुगस्य तदनादरश्रवणादिति सूत्रे शुचा द्रवणमेव शूद्रशब्देनोक्तमिति । भाष्ये च शोकेनाद्रवणं शूद्रशब्दप्रवृत्तिनिमित्तमुक्तं । छंदोगोपनिषद्भाष्ये तु राजा पौत्रायणः

शोकात् शूद्रेति मुनिनोदित इति शोकमात्रं शूद्रशब्दप्रवृत्तिनिमित्तमित्युक्तं । अतोऽन्योन्याविरोध इति प्रतिभाति । तथाऽपि शोकेन आततीति शोकात् । अतसातत्यगमन इत्यस्मात् आङ् पूर्वात् क्विपि आदिरिति रूपमतो न विरोध इति द्रष्टव्यं । हेतुगर्भमेतत् राजविशेषणं । अधिकारश्च तद्धानिप्रसंगादेव चिंतिताविति पुलिंगस्तु नोपपद्यत इत्याशयेन शंकते ॥ नन्विति ॥ अनुष्ठितेति । अनुष्ठितं साधनं यस्य तदित्यर्थः ॥ देवतेति । देवतापदप्राप्तिफलकत्वादित्यर्थः । ननु देवैर्देवतापदस्य प्राप्ततया तत्पदप्राप्तिफलार्थं मध्वाद्युपासनास्वधिकाराभावेऽपि तदुपासनासाध्यज्ञानार्थं तत्र तेषामधिकारोऽस्त्वित्यत आह ॥ सर्वज्ञत्वेनेति ॥ अत एवेति । देवानां सर्वज्ञत्वेनोपासनासाध्यज्ञानस्य नित्यसिद्धत्वादेव । क्वचिद्वेदोक्तोपासनादावधिकार इति द्वितीयपक्षोऽपि न संभवतीत्यर्थः ॥ १—३—४ ॥

॥ ॐ भावं तु बादरायणोऽस्ति हि ॐ ॥ असिद्ध इति । अन्यार्थमित्यत्रेवासिद्धेऽर्थे विधिरित्यत्राप्युपासाया इत्येतदनुवर्तत इत्यर्थः । नन्वन्यार्थमुपासाया विधिस्तथाऽसिद्धेऽज्ञातेऽर्थे उपासाया विधिर्विद्याधिराजस्य मतमिति योजना न युक्तेत्याशंक्याध्याहारेण योजना कर्तव्येत्याह ॥ अत्रेति । अन्यार्थमसिद्धेऽर्थे विधिस्तथा विद्याधिराजस्य मतमित्यत्रेतिशब्दाध्याहारेणान्यार्थमुपासाया विधिस्तथा असिद्धेऽर्थे उपासाया विधिरिति विद्याधिराजस्य मतमिति योजना कार्येत्यर्थः

॥ तदिति । मोक्षफलविशेषार्थमसिद्धज्ञानविशेषार्थं चेत्यर्थः । ननु हिरण्यगर्भज्ञानस्यासंकोचेनाशेषवस्तुविषयत्वं न संभवतीत्यतो व्याचष्टे ॥ अशेषेति ॥ एवेतीति । एवार्थकतुशब्दः संबध्यत इत्यर्थः । तत्संबंधेन लब्धमर्थमाह ॥ न त्विति ॥ ब्रह्मेति । ब्रह्मणोऽशेषवस्तुगमिति हिरण्यगर्भज्ञानस्य पृथगुक्तिः । यदा हिरण्यगर्भज्ञानमपि परब्रह्मातिरिक्ताशेषवस्तुविषयमेव न तु सर्वविषयं । तदेतरेषां देवानां ज्ञानं सर्वविषयं न भवतीति किमु वक्तव्यमिति कैमुत्यार्थमित्यर्थः । ननु सर्वज्ञानां देवानां सर्वं न प्रकाशत इत्येतद्विरुद्धमित्याशंकायां परमेश्वरव्यतिरिक्तानां सर्वज्ञत्वासिद्धिव्युत्पादनायान्येषां क्रमशो ज्ञानं मितवस्तुगतं सदा इत्येतदेव वक्तव्यं । नित्यं वृद्धिक्षयापेतं विष्णोः पूर्णं तु वेदनमिति विष्णुसंवेदनोक्तिस्तु व्यर्थेत्यत आह ॥ विष्णिवति । विष्णुसंवेदनोक्तिस्तु सर्वविषयत्वस्य विष्णुज्ञानलक्षणत्वेनेतरेषां ज्ञानस्य सर्वविषयत्वमसंभावितमिति सूचयितुमित्यर्थः ॥ अत्र चेति । मोक्षे फलविशेषोऽस्तीत्यत्र परमेश्वरव्यतिरिक्तानां सर्वज्ञत्वं नास्तीत्यत्र च यावत्सेवाविशेषत्वे तावत्सुखविशेषता । संभवाच्च प्रकाशस्य परमेकमृते हरिमिति भाष्योदाहृतवचनं प्रमाणमित्यर्थः ॥ मोक्ष इतीति । मोक्षे फलविशेषोऽस्तीत्यादिनोक्तं यत्प्रमेयं तत्परामर्शार्थ इतिशब्द इत्यर्थः ॥ अस्यापीति । इत्यादयो विशेषा विद्यापतेर्वेदव्यासस्य हृदि सदा वर्तंते । जैमिन्याद्यास्तु सामान्यवेदिन इत्यस्यापि उपपादनाय नित्यं वृद्धिक्षयापेतं विष्णोः पूर्णं तु वेदनमित्यादिपूर्ववाक्यमनुसंधेयमित्यर्थः ॥ विद्येशेत्युपसंहार इति । तथाच विद्येशमतमेतस्मान्नैव सद्भिर्विद्यत इत्यस्योपसंहाररूपत्वाद्विद्याधिराजस्य मतमविरोधस्ततस्तयोरित्यत्रोक्तस्य भगवन्मतजैमिनिमताविरोधस्यात्रोक्तावपि न पुनरुक्तिरिति भावः । जैमिन्याद्यास्तु सामान्यवेत्तृत्वादिति मूले वेत्तृशब्दः विद विचारण इत्यस्माद्विचारसाध्यज्ञानलक्षकादुत्पन्नः । तेन विद ज्ञान इत्यस्य सेट्त्वाद्वेदितृत्वादिति भाव्यमिति चोद्यमानवकाशमिति बोध्यं ॥ १—३—८ ॥ ॥६॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतंत्रस्वतंत्रश्रीमद्व्यासतीर्थमुनिवर्यपौत्रश्रीपतितीर्थपूज्यपादानां शिष्येण कंभालूररामचंद्रभिक्षुणा कृतायां श्रीमन्न्यायसुधाव्याख्यायां प्रथमाध्यायस्य तृतीयः पादः ॥ १—३ ॥

॥ अयंग्रंथः खंडो रामचंद्र भिसे इत्यनेन "कर्नाटक प्रिंटिंग वर्क्स, धारवाड" मुद्रणालये मुद्रितः ।
सवणूरकुलोत्पन्नराघवेंद्रसूनुना गोविंदेन धारवाडग्रामे प्रकाशितश्च ॥

॥ इति श्रीमन्न्यायसुधाटिप्पणी कंभाल्रूररामचंद्रभिक्षुकृता समाप्ता ॥

॥ प्रथमे तृतीयः पादः ॥